पत्रालयद्वारा संस्कृतम्

शिक्षा
SHIKSHAA

संस्कृतभारती
बेङ्गलूरु

प्रकाशनम् -
संस्कृतभारती
'अक्षरम्', ८ उपमार्गः, २ घट्टः
गिरिनगरम्, बेङ्गलूरु - ५६० ०८५

प्रथमं मुद्रणम् - २०१५, १०००

मुद्रणम् -
वागर्थ, न.रा कालोनि, बेङ्गलूरु - १९

ISBN 978-81-88220-93-9

SHIKSHAA (ENGLISH) - A Third Leval book for learning Samskrit through Correspondence (English) wihich contains 12 lessons. *Publisher* - **SAMSKRITA BHARATI** - 'Aksharam', 8th Cross, II Phase, Girinagar, Bangalore - 560 085. Ph : 26721052 / 26722576 E-mail : samskritam@gmail.com

Pages - 262 + 4, First Print - Aug - 2015

Printed at - Vagartha. N. R. Colony B' lore - 560 019

अनुक्रमणिका

Please note the following instructions

1. Please mention the course title and your registration number in all your correspondence with us.
2. If book is lost, you can get the same by paying Rs.100. 00.
3. Any change in the address should be informed to us immediately.
4. The examinations are held on THIRD SUNDAY of February / August months. We have a few centres for examinations. We shall send the admission ticket informing the details of the date, place, time of examination etc., for the students who have to write at the centres. Where there is no centre, students will be writing the examination from their residence. Detailed instructions along with the question paper (in a sealed cover) would be sent well before the date of examination.
5. The marks card and certificate would be sent to you by ordinary post before the end of March / September.
6. Please feel free to contact us for any clarification.

SAMSKRITA BHARATI

SAMSKRIT THROUGH CORRESPONDENCE

'AKSHARAM', 8th Cross, 2nd Phase, Girinagar,

BANGALORE - 560 085

Phone : 26721052 / 26722576, E-mail : samskritam@gmail.com

ॐ

।। जयतु भारतम् - जयतु भारती ।।

संस्कृतभारती

पत्रालयद्वारा संस्कृतम्

SAMSKRIT THROUGH CORRESPONDENCE

Aksharam, 8th Cross, 2nd Phase, Girinagar, Bangalore - 560 085

शिक्षा - प्रथमः पाठः

।। सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।।

In ambiguous matters noble men seek the counsel of their own conscience.

Dear Friend,

Namaskaras to you. Our best wishes to you on your pursuit of knowledge through our Postal Samskrit coaching scheme. We presume that you have set aside a few precious hours of your day for the study of Samskrit.

Here is the first lesson of the third semester **'शिक्षा'** for you. मङ्गलम् अस्तु ।

RECAPITULATION

At Parichaya level you have learnt about विशेष्यविशेषणभावः, कर्तरि, कर्मणि and भावे प्रयोगः in detail. Let us recapitulate these.

- Adjective and the noun qualified are always in the same gender, number and case.

  Eg., उत्तमः बालकः, उत्तमा बालिका, उत्तमं पुस्तकम्

  - Note that the gender is the same.

उत्तमे बाले, उत्तमां बालाम्, उत्तमस्य पुस्तकस्य
- The case ending is the same.
उत्तमेन बालकेन, उत्तमाभ्यां बालकाभ्याम्, उत्तमैः बालकैः
- The number is the same.

- In Samskrit, numerals are also adjectives. Therefore the above rule applies to numerals also.
  Eg. - एकः पुरुषः, एका महिला, एकं पुस्तकम् - Gender.
  एकस्मै पुरुषाय, एकां महिलाम्, एकस्मिन् पुस्तके - Case ending.
  एकेन पुरुषेण, द्वाभ्यां पुरुषाभ्याम्, त्रिभिः पुरुषैः - Number.
- प्रथमः, द्वितीयः, ... दशमः, ...विंशतितमः and so on, are ordinals (क्रमवाचकाः) that end in पूरणप्रत्यय । They are called पूरणप्रत्ययान्ताः ।
- The particles (निपात) चित् and चन are added to किंशब्द in the sense of 'some one', 'a certain' (अनिश्चयार्थः)
  Eg. - कश्चन बालकः क्रीडति । - A certain boy is playing.
  केनचित् एषा वार्ता श्राविता । - This news was told by some one.
- लिङ्लकार is used to denote possibility (सम्भावनार्थः) and injunction (विध्यर्थः)
  Eg. - अद्य सायं महती वृष्टिः भवेत् । There may be heavy rain this evening.] सम्भावना - possibility.
  भवान् धर्मं पालयेत् । You shall follow Dharma.] विधिः - injunction.
- You have learnt the passive verbal forms in Present and Past tense, and Imperative and Potential moods.
  Eg. - रामेण पाठः पठ्यते । - Present tense
  रामेण पाठः अपठ्यत / पठितः । - Past tense
  रामेण पाठः पठ्यताम् । - Imperative mood
  रामेण पाठः पठनीयः / पठितव्यः । - Potential mood

- You have also learnt the verbal forms in Impersonal voice (भावे प्रयोगः) in वर्तमान, भूत and भविष्यत् and also आज्ञार्थ and विध्यर्थ ।

  Eg. - वृक्षेण कम्प्यते । - Present
  पर्णैः अपत्यत / पतितम् । - Past
  त्वया यत्यताम् । - Imperative (आज्ञार्थः)
  भवता उपवेष्टव्यम् । - Potential (विध्यर्थः)

१. कृदन्ताः
शतृ (पुं.) - प्रथमा

You are familiar with verbal forms such as गच्छति = गच्छ(ति), अभवत् = अभव(त्), पठन्तु = पठ(न्तु) etc. In the examples above the bracketed portion is known as आख्यातप्रत्यय or तिङ्प्रत्यय ।

Just like the तिङ्प्रत्यय another set of affixes known as कृत्प्रत्यय is also added to verb roots. The words thus formed are known as participles or कृदन्ताः । They are not verbs although they sometimes do the function of a verb. They are mostly noun forms and adjectival forms. (However, not all Kridantas are noun forms. Some of them like those ending in क्त्वा, तुमुन् etc., are indeclinables. क्तवतु, क्त etc., are used instead of a verb. But they are not तिङन्त forms. They are also noun forms only.)

There are many कृत् affixes used to denote various senses. In 'Parichaya' course under the heading पदसङ्ग्रहः you have got familiar with some कृदन्त forms. In the lessons of Shiksha course you will learn in detail about the Present participle forms (वर्तमानकृदन्ताः)

Read the following sentences -

१. छात्रः **पठन्** निद्रां कृतवान् । - The student fell asleep reading.
२. बालः **क्रीडन्** मुदितवान् । - The boy felt happy playing.
३. सः **नमन्** प्रार्थयति । - Saluting he is praying.
४. अशोकः **गच्छन्** धेनुं दृष्टवान् ।

५. भक्तः देवं **पश्यन्** प्रदक्षिणं कृतवान् ।
६. एषः [1]सुरां **पिबन्** लोकमेव [2]विस्मृतवान् ।
७. यः **धावन्** आगतवान् सः गोपालः ।
८. वटुः श्लोकं **स्मरन्** [3]उच्चारितवान् ।
९. रजकः वस्त्रं **क्षालयन्** तिष्ठति ।
१०. लेखकः **लिखन्** एव गानं शृणोति ।
११. शिशुः [4]**स्खलन्** पतितवान् ।
१२. गायकौ **गायन्तौ** नेत्रे निमीलितवन्तौ ।
१३. यात्रिकौ मार्गं **पृच्छन्तौ** तीर्थयात्रां कृतवन्तौ ।
१४. कपयः **खादन्तः** एव उत्पतितवन्तः ।
The monkeys jumped up while eating.
१५. दुर्जनाः **निन्दन्तः** एव तृप्तवन्तः ।
The wicked were satisfied (by) scolding (others).
१६. सर्वे **मिलन्तः** सम्भाषणम् आरब्धवन्तः ।
As all gathered, they began conversing.
१७. नृपाः न्यायम् **अनुसरन्तः** प्रजाः रक्षितवन्तः ।
१८. भारवाहाः पेटिकां **वहन्तः** एव पानीयं पीतवन्तः ।
१९. आरक्षकाः सर्वान् **परिशीलयन्तः** अग्रे गतवन्तः ।
२०. मार्गदर्शकाः इतिहासं **वर्णयन्तः** देवालयं दर्शयन्ति ।

In the above sentences the words पठन्, क्रीडन् etc. printed in bold type are ending in शतृप्रत्ययः । They are known as शत्रन्ताः ।

The rules connected with शतृ(अत्)प्रत्ययः

१. **शतृप्रत्यय** denotes present continuous tense. It means that the क्रिया has begun and not ended still. (only 'अत्' remains of the **प्रत्यय 'शतृ'**)

उदा - पठ् + शतृ (अत्) - पठत् (पठत् is the प्रातिपदिक of पठन्)
लिख् + शतृ (अत्) - लिखत्

1. liquor, 2. forgot, 3. recited, 4. faltering.

क्रीड् + शतृ (अत्) - क्रीडत्
उपविश् + शतृ (अत्) - उपविशत्

२. **शतृप्रत्यय** is added only to Parasmaipada roots. Atmanepada roots take **शानच् प्रत्यय** in the same sense. (You will learn more about **शानच् प्रत्यय** in the following lessons.)

३. A participle ending in **शतृप्रत्यय** takes different forms in the three genders.

उदा - पतत् - पतन् (पुं॰), पतन्ती (स्त्री॰), पतत् (न॰)

४. These present participles are declined in all the three genders, seven vibhaktis and three vachanas. (In the following lessons you will be introduced to these step by step.)

Note:

1. The masculine nominative singular **शत्रन्त** closely resembles the **लट्-प्रथमपुरुष-बहुवचन** form of a root. If we remove the final **ति** from this the remaining portion is the **पुंलिङ्ग-शत्रन्त-प्रथमा-एकवचन** form of that root.

उदा -	*ए.व.*	*ब.व.*	*शत्रन्तं रूपम्*
	लिखति	लिखन्ति (लिखन् + ति)	लिखन्
	पिबति	पिबन्ति (पिबन् + ति)	पिबन्
	खादति	खादन्ति (खादन् + ति)	खादन्

2. The following are the **शत्रन्त** forms of roots in **पुंलिङ्ग प्रथमाविभक्तिः** ।

उदा -	पठन्	पठन्तौ	पठन्तः
	लिखन्	लिखन्तौ	लिखन्तः

अभ्यासः

I. *अधोनिर्दिष्टानां लट्लकारबहुवचनान्तं रूपं शत्रन्तपुंलिङ्गप्रथमैकवचनान्तं रूपं च उदाहरणानुसारं लिखत ।*

उदा - पतति पतन्ति पतन्

१. क्रीडति	------	------
२. नमति	------	------
३. गच्छति	------	------
४. पश्यति	------	------
५. धावति	------	------
६. मिलति	------	------
७. यच्छति	------	------
८. स्मरति	------	------
९. वहति	------	------
१०. ताडयति	------	------
११. नृत्यति	------	------
१२. भजति	------	------
१३. दण्डयति	------	------
१४. कुप्यति	------	------
१५. प्रविशति	------	------

II. *अधोनिर्दिष्टानां क्रियापदानां शत्रन्तपुंलिङ्ग-एकवचनान्तं रूपं बहुवचनान्तं रूपं च उदाहरणानुसारं लिखत ।*

उदा - पाठयति	पाठयन्	पाठयन्तः
१. अनुसरति	------	------
२. आलपति	------	------
३. स्खलति	------	------
४. गायति	------	------
५. पृच्छति	------	------
६. वर्णयति	------	------
७. परिशीलयति	------	------
८. कीलयति	------	------
९. भाययति	------	------
१०. प्रविशति	------	------

III. *उदाहरणानुगुणं वाक्यानि परिवर्तयत ।*

उदा - शिशुः धावति । पतति । शिशुः धावन् पतति ।

१. अनुजः आगच्छति । वदति । ....

२. पिता पश्यति । पृच्छति । ....

३. राघवः जिघ्रति । तुष्यति । ....

४. श्रीनिवासः वादयति । नृत्यति । ....

५. रजकः क्षालयति । पश्यति । ....

६. बालकः इच्छति । स्पृशति । ....

७. शिक्षकः पाठयति । लिखति । ....

८. कृष्णः चोरयति । चिन्तयति । ....

IV. *शत्रन्तं पदं प्रयुज्य एकं वाक्यं कुरुत ।*

उदा - युवकाः यानं चालयन्ति । सम्भाषणं कुर्वन्ति ।
युवकाः यानं चालयन्तः सम्भाषणं कुर्वन्ति ।

१. व्याघ्राः हरिणं पश्यन्ति । शीघ्रं धावन्ति ।
....

२. अर्चकाः मन्त्रं वदन्ति । अर्चनां कुर्वन्ति ।
....

३. धीवराः जालं प्रसारयन्ति । गीतं गायन्ति ।
....

४. बालकाः आसन्दे उपविशन्ति । पुस्तकं स्वीकुर्वन्ति ।
....

५. तरुणाः धनं सम्पादयन्ति । आनन्दम् अनुभवन्ति ।
....

६. अध्यापकाः पाठं बोधयन्ति । प्रश्नान् पृच्छन्ति ।
....

(**Note :** Compare your answers with those on the end of this book **(P.No. - 229)** and ascertain their correctness.)

२. पदसङ्ग्रहः

The lessons of 'Parichaya' have taught the verbal forms and

participle forms and their usages. This is to refresh your memory.

गर्ह् - to abuse, censure, blame.

1. गर्हति - blames - शिशुपालः कृष्णं गर्हति ।
2. गर्ह्यते - is blamed - कौरवेण कृष्णः गर्ह्यते ।
3. गर्हिष्यति - will blame - अध्यापकः श्वः गर्हिष्यति ।
4. गर्हितव्यम् - should be blamed - दुश्चरितं (bad conduct) गर्हितव्यम्/ गर्हणीयम् ।
5. गर्हितः (पुं) - He was blamed - तेन बालः गर्हितः ।
   गर्हिता (स्त्री) - She was blamed - तेन बाला गर्हिता ।
   गर्हितम् (नपुं) - It was blamed - तेन कुलं गर्हितम् ।
6. गर्हितवान् (पुं) - He blamed - जटायुः रावणं गर्हितवान् ।
   गर्हितवती (स्त्री) - She blamed - सीता अपि गर्हितवती ।
7. गर्हन् (पुं) - (He) blaming - यजमानः गर्हन् गतवान् ।
   गर्हन्ती (स्त्री) - (She) blaming - दासी गर्हन्ती प्रविष्टवती ।
8. गर्हित्वा / विगर्ह्य] having blamed - साधुं गर्हित्वा / विगर्ह्य स सन्तुष्टः ।
9. गर्हितुम् - to blame - नीचः गर्हितुम् उद्युक्तः ।

As shown above try to make sentences with the following forms of roots.

ग्लै - to tire out, fade, to be tired

१. ग्लायति २. ग्लायते ३. ग्लास्यति

४. ग्लातव्यम् - ग्लानीयम् ५. ग्लानः - ग्लाना - ग्लानम् ६. ग्लानवान् - ग्लानवती ७. ग्लायन् - ग्लायन्ती ८. ग्लात्वा - प्रग्लाय ९. ग्लातुम्

ग्रह् - to take, to hold

१. गृह्णाति २. गृह्यते ३. ग्रहीष्यति

४. ग्रहीतव्यम् - ग्रहणीयम् ५. गृहीतः - गृहीता - गृहीतम् ६. गृहीतवान् - गृहीतवती ७. गृह्णन् - गृह्णती ८. गृहीत्वा - प्रतिगृह्य ९. ग्रहीतुम्

घ्रा - to smell

१. जिघ्रति २. घ्रायते ३. घ्रास्यति

४. घ्रातव्यम् - घ्राणीयम् ५. घ्रातः - घ्राता - घ्रातम् ६. घ्रातवान् - घ्रातवती ७. जिघ्रन् - जिघ्रन्ती ८. घ्रात्वा - आघ्राय ९. घ्रातुम्

३. प्रहेलिका

In the lessons of Parichaya some riddles were given. Here are some more.

पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः ।
चलते वायुवेगेन पदमेकं न गच्छति ।।

A chariot is moving on the hill and the charioteer is standing on the ground. It is going with the speed of the wind, but not moving even a single foot forward.

Answer - Here chariot means the pottters wheel. It rotates on a hill (stand), the charioteer (Potter) stands on the ground. Though it rotates fast it does not move one step forward.

४. सुभाषितम्

१. दम्भेन लोभेन भिया ह्रिया वा
प्रायो विनीतो जन एष सर्वः ।
वैराग्यतस्त्वाह्लदयं विनीतम्
नरं वरं दुर्लभमेव मन्ये ।।

पदविभागः

दम्भेन, लोभेन, भिया, ह्रिया, वा, प्रायः, विनीतः, जनः, एषः, सर्वः, वैराग्यतः, तु, आह्लदयम्, विनीतम्, नरम्, वरम्, दुर्लभम्, एव, मन्ये ।

सन्धिः

प्रायः + विनीतः, विनीतः + जनः, जनः + एषः, एषः + सर्वः, वैराग्यतः + तु + आह्लदयम्

तात्पर्यम्

I am of the opinion that most people are humble only for one of the following reasons. Either to show of or due to greed or out of fear or shame. I feel that a great man who is without any

desire and is modest from his heart, is difficult to find.

प्रतिपदार्थः

प्रायः - Mostly, सर्वः एषः जनः - all these people, दम्भेन लोभेन भिया ह्रिया वा विनीतः - are modest out of hypocrisy, greed, fear, or shame. वैराग्यतः आहृदयं विनीतं वरं नरं तु दुर्लभम् एव मन्ये - But I think it is difficult to find a great man who is modest from the bottom of his heart due to absence of any wordly desire.

२. यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिद्ध्यति ।।

पदविभागः

हि, एकेन, गतिः, भवेत्. These are the only two words that are joined in the sloka.

सन्धिः

हि + एकेन, गतिः + भवेत्

तात्पर्यम्

A chariot cannot move with one wheel. It has to have two wheels. Likewise, providence and man's effort are the two wheels of life. If a man doesnot put in any effort at all and just wishes that his desires are fulfilled, he will be disappointed. For, good luck alone doesnot bring any results.

प्रतिपदार्थः

यथा = Just as, एकेन चक्रेण रथस्य गतिः न भवेत् = a chariot cannot move with one wheel, एवं = in the same way, पुरुषकारेण विना = without man's effort, दैवं = providence, न सिद्ध्यति = does not bring success.

५. काव्यकथा

In the previous semester we have read the story of the epic poem Raghuvamsha. Let us now read the story of 'Shishupalavadha' of the poet Magha.

॥ शिशुपालवधम् ॥

नारदस्यागमनम्

भगवान् श्रीविष्णुः लोकरक्षणाय कृष्णावतारं गृहीतवान् । सः वसुदेवस्य पुत्रो[a] जातः । द्वारकायाश्च[b] नृपः अभवत् । कदाचित् श्रीकृष्णं द्रष्टुं नारदमहर्षिः द्वारकाम् आगतवान् । कृष्णः नारदं पूजितवान् । योगक्षेमं च अपृच्छत् । नारदमुनिः एवम् उक्तवान् - ''कृष्ण ! भवान् सर्वं जानाति । सर्वज्ञो[c] हि भवान् । तथापि[d] देवेन्द्रस्य सन्देशं गृहीत्वा आगतोऽस्मि[e] । कृपया श्रूयताम्[1]'' इति ।

पुरा हिरण्यकशिपुर्नाम[f] दैत्यो[g] लोकान् पीडयति स्म । अखिलोऽपि[h] लोकः तस्मात् भीतः । तदा भवान् नरसिंहावतारं गृहीत्वा तं राक्षसं नखैः [2]छित्त्वा हतवान् । मृतः हिरण्यकशिपुः [3]जन्मान्तरे रावणो[i] जातः । पुनरपि[j] जनान् मुनीन् च पीडयितुम् आरब्धवान् । भवानपि पुनः दशरथस्य पुत्रः श्रीरामो[k] भूत्वा [4]सीतापहारकं तं हतवान् । यथा लोके नटः अन्यं वेषं [5]धृत्वा रङ्गभूमिम् आगच्छति, तथा स[l] राक्षसः इदानीं 'शिशुपाल[m]' इति [6]नाम्ना उत्पन्नः । तस्य दौर्जन्यम् असहनीयम् । जनाः दुःखिताः सन्ति । पूर्वं यथा भवान् राक्षससंहारं कृत्वा लोकोपकारं कृतवान् तथा इदानीमपि शिशुपालस्य वधं करोतु'' इति इन्द्रसन्देशं नारदः श्रावितवान् ।

श्रीकृष्णः नारदस्य वचनं श्रुत्वा 'तथास्तु[n]' [o]इत्यङ्गीकृतवान् । सन्तोषेण नारदमहर्षिः द्वारकानगरात् निवृत्तवान्[7] ।

प्रश्नाः

१. श्रीकृष्णं द्रष्टुं कः आगतवान् ?

२. नारदः कस्य सन्देशं गृहीत्वा आगतवान् ?

---

a. पुत्रः + जातः b. द्वारकायाः + च c. सर्वज्ञः + हि d. तथा + अपि e. आगतः + अस्मि f. हिरण्यकशिपुः + नाम g. दैत्यः + लोकान् h. अखिलः + अपि i. रावणः + जातः j. पुनर् + अपि k. श्रीरामः + भूत्वा l. सः + राक्षसः m. शिशुपालः + इति n. तथा + अस्तु o. इति + अङ्गीकृतवान् ।

---

1. May you listen. 2. having torn, 3. in another birth, 4. he who took away Sita, 5. having worn, 6. by name, 7. returned.

३. रावणः पूर्वजन्मनि कः आसीत् ?
४. कस्य दौर्जन्यम् असहनीयम् ?
५. शिशुपालस्य वधात् किं भविष्यति ?

६. अन्वयरचना

During the course of Parichaya you have learnt about **पदविभागः**, **अन्वयः**, **अन्वयार्थः** and **तात्पर्यम्**. **अन्वयरचना** consists of analysing a complete sentence or a sloka. It is done by identifying the verb there in and putting several questions with respect to it that to elicit **कर्तृ**, **कर्म** etc., as answers. When you learn the **अन्वयरचनाक्रमः** you will know the **अन्वयः** (prose order) and there by the meaning of a sloka. At this stage let us learn more about **अन्वयरचना** ।

रामः विद्यालयं गच्छति । Let us analyse this sentence.

1. Identify the verb first.
2. Then put the question कः/का/किम् (प्र.वि.) to find the कर्तृपदम् ।
3. To know the कर्मपदम् put the question कं/कां/किम्(द्वि.वि.)
   When the कर्तृपद or कर्मपद is in द्विवचनम् or बहुवचनम् the question should be suitably changed. Let us now apply these rules to the above example.

गच्छति - क्रियापदम्
कः गच्छति ? - रामः - *कर्तृपदम्*
कं गच्छति ? - विद्यालयम् - *कर्मपदम्*

For better understanding let us analyse a few more sentences.

१. बालकः फलं खादति ।

खादति - क्रियापदम्
कः खादति ? - बालकः - *कर्तृपदम्*
किं खादति ? - फलं - *कर्मपदम्*

२. सः वृक्षौ पश्यति ।

पश्यति - क्रियापदम्

कः पश्यति ? - सः - *कर्तृपदम्*
कौ पश्यति ? - वृक्षौ - *कर्मपदम्*

(Since the कर्मपदम् is in द्विवचनम् the question is also in द्विवचनम्)

३. वृषभौ भारं वहतः ।

वहतः - क्रियापदम्
कौ वहतः ? - वृषभौ - *कर्तृपदम्*
कं वहतः ? - भारम् - *कर्मपदम्*

(In this sentence the कर्तृपदम् is in द्विवचनम् । Therefore the question is also in द्विवचनम् ।)

४. जनाः कार्यं कुर्वन्ति ।

कुर्वन्ति - क्रियापदम्
के कुर्वन्ति ? - जनाः - *कर्तृपदम्*
किं कुर्वन्ति ? - कार्यम् - *कर्मपदम्*

(In this sentence the कर्तृपदम् is in बहुवचनम् । Therefore the question is also in बहुवचनम् ।)

५. अध्यापिका छात्रान् बोधयति ।

बोधयति - क्रियापदम्
का बोधयति ? - अध्यापिका - *कर्तृपदम्*
कान् बोधयति ? - छात्रान् - *कर्मपदम्*

(The कर्मपदम् here is in बहुवचनम् । Hence the question pertaining to it is in बहुवचनम् ।)

६. धनिकः धेनुं हस्तेन निर्धनाय गोष्ठात् गङ्गातीरे ददाति ।

ददाति - क्रियापदम्
कः ददाति ? - धनिकः - *कर्तृपदम्*
कां ददाति ? - धेनुम् - *कर्मपदम्*
केन ददाति ? - हस्तेन
कस्मै ददाति ? - निर्धनाय
कस्मात् ददाति ? - गोष्ठात्

कुत्र ददाति ? - गङ्गातीरे

In this sentence there are words ending in तृतीया, चतुर्थी, पञ्चमी and सप्तमी । To elicit them as answers the questions are also put in the respective vibhaktis.

७. उत्तमः बालकः बहुमूल्यां लेखनीं क्रीतवान् ।

In this sentence there are adjectives to कर्तृपदम् and कर्मपदम् । So, to elicit these visheshanas we must use the interrogative word कीदृश in the respective gender. कीदृशः - पुं, कीदृशी - स्त्री and कीदृशम् - नपुं are used to elicit the कर्तृपदम् and कीदृशम् - पुं, कीदृशीम् - स्त्री and कीदृशम् - नपुं are used to elicit the कर्मपदम् ।

After eliciting the कर्तृपदम्, by adding कीदृश (प्र.वि.) to it and questioning we get its विशेषण as the answer. Similarly, after eliciting the कर्मपदम् by adding कीदृशम् (द्वि.वि.) to it and questioning we get its विशेषण as answer.

The अन्वयरचना of the above sentence will be as follows.

क्रीतवान् - क्रियापदम्
कः क्रीतवान् ? - बालकः - कर्तृपदम्
कीदृशः बालकः ? - उत्तमः बालकः
कां क्रीतवान् ? - लेखनीम्
कीदृशीं लेखनीम् ? - बहुमूल्याम्

८. बालकः पाठं पठित्वा शीघ्रं विद्यालयम् अगच्छत् ।

अन्वयरचना for this sentence is as follows.

अगच्छत् - क्रियापदम्
कः अगच्छत् ? - बालः
कम् अगच्छत् ? - विद्यालयम्
कथम् अगच्छत् ? - शीघ्रम्
किं कृत्वा अगच्छत् ? पठित्वा
कं पठित्वा ? - पाठम्

शीघ्रम् is an adverb (क्रियाविशेषणम्). To get this as an answer the question should be 'कथम् ?' पठित्वा is a क्त्वान्ताव्ययम् । For this word the question is 'किं कृत्वा ?' The द्वितीयान्त word पाठम् is related to the word पठित्वा in the sentence. Therefore the question to elicit it is 'कं पठित्वा ?'

This is the method followed in अन्वयरचना । According to the meaning questions are put to elicit the various words in the sentence.

There are some more points to be noted in connection with अन्वयरचना । We shall mention them in due course as and when the need arises.

अन्वयरचना is mainly useful in understanding the meaning of slokas. Let us now see how to do the अन्वयरचना of a sloka.

Here is a sloka which you have learnt earlier -

परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः
परोपकारार्थमिदं शरीरम् ।।

पदविभागः

परोपकाराय, फलन्ति, वृक्षाः, परोपकाराय, वहन्ति, नद्यः, परोपकाराय, दुहन्ति, गावः, परोपकारार्थम्, इदम्, शरीरम् (अस्ति) ।

अन्वयरचना

You know the meaning of this sloka.

We shall now see how its अन्वयरचना will be.

1. To start with split up the words in the sloka carefully.
2. Identify the verbs and know that there are as many sentences as the verbs.

3. In each sentence bring together the words ending in the same vibhakti.
4. Put appropriate questions with respect to each word.

पदविभाग of the above sloka has been done. It has four sentences in it.

१. परोपकाराय वृक्षाः फलन्ति ।
२. परोपकाराय नद्यः वहन्ति ।
३. परोपकाराय गावः दुहन्ति ।
४. परोपकारार्थम् इदं शरीरम् (अस्ति) ।

In the fourth sentence the क्रियापदम् is not found. It has been guessed and the sentence completed. This feature is known as अध्याहार in Samskrit.

In each of the sentences above we do not find more than one word of the same vibhakti. Therefore the question of putting together of words in the same vibhakti does not arise. Now, questions are to be put with respect to the verbs, one at a time.

१. फलन्ति - *क्रियापदम्*
के फलन्ति ? - वृक्षाः
किमर्थं फलन्ति ? - परोपकाराय

२. वहन्ति - *क्रियापदम्*
काः वहन्ति ? - नद्यः
किमर्थं वहन्ति ? - परोपकाराय

३. दुहन्ति - *क्रियापदम्*
काः दुहन्ति ? - गावः
किमर्थं दुहन्ति ? - परोपकाराय

४. (अस्ति) - *क्रियापदम्*
किम् अस्ति ? - शरीरम्
कीदृशं शरीरम् ? - इदम्
किमर्थम् अस्ति ? - परोपकारार्थम्

Here is another sloka for अन्वयरचना ।

> **व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।**
> **पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ।।**

पदविभागः

पौत्रम्, अकल्मषम् । The remaining words in the sloka are already split.

तात्पर्यम्

I salute that Vyasa who was the great grand son of Vasishtha, grandson of Shakti, son of parashara, father of Shuka, was faultless and was a storehouse of penance. (नप्ता - great grand son (grandson's son), पौत्रः - grand son (son's son), आत्मजः - son, तातः - father.)

वाक्यविश्लेषणम्

- क्रियापदम् - वन्दे
- द्वितीयान्तपदानि - व्यासम्, वसिष्ठनप्तारम्, पौत्रम्, अकल्मषम्, पराशरात्मजम्, शुकतातम्, तपोनिधिम् ।
- षष्ठ्यन्तपदम् - शक्तेः (This is related to the word पौत्रम्)

अन्वयरचना

वन्दे - *क्रियापदम्*
कं वन्दे ? - व्यासम्
कीदृशं व्यासं वन्दे ? - वसिष्ठनप्तारम्
पुनः कीदृशं वन्दे ? - पौत्रम्
कस्य पौत्रम् ? - शक्तेः
पुनः कीदृशं वन्दे ? - अकल्मषम्

Note:
- There are several adjectives ending in द्वितीयाविभक्ति here. Therefore, once the question कीदृशम् is put and subsequently the question is put as 'पुनः कीदृशम् ?'
- Since शक्तेः is related to पौत्रम्, the question कस्य पौत्रम् ? is put to get 'शक्तेः' as answer.

Following this method try to analyse simple sentences and write their अन्वयरचना ।

७. व्यञ्जनसन्धयः

You have learnt about the different types of स्वरसन्धिः । Now you will know about व्यञ्जनसन्धिः । A consonant followed by a vowel or another consonant, undergoes change. This is called व्यञ्जनसन्धिः । There are many kinds of व्यञ्जनसन्धिः । Important among them are given below.

१. श्चुत्वसन्धिः

Study the following examples -

१. वैकुण्ठे शेषतल्पे **हरिश्शेते** ।
२. रामः **लक्ष्मणश्च** अरण्यं गतौ ।
३. सायङ्काले मन्दं **मरुच्चलति** ।
४. आकाशे **शरच्चन्द्रः** प्रकाशते ।
५. सञ्जीविनी मृतम् **उज्जीवयति** ।
६. बालः **मृच्छकटिकां** रचितवान् ।
७. **तज्ज्ञात्वा** पठ ।
८. **कश्चन** भिक्षुकः आगतः ।
९. भवान् यत् वदति **तच्चिन्त्यम्** ।
१०. **कियच्चिरं** प्रतीक्षणीयं मया ?

In the examples above words printed in bold are examples of व्यञ्जनसन्धिः, where two consonants are joined. The last letter of the former word and the first letter of the following word, are consonants.

The bold words in the above sentences must be split up as follows -

१. हरिश्शेते = हरिस् + शेते (**स्** + श् = श्)
२. लक्ष्मणश्च = लक्ष्मणस् + च (**स्** + च् = श्)
३. मरुच्चलति = मरुत् + चलति (**त्** + च् = च्)

४. शरच्चन्द्रः = शरत् + चन्द्रः (**त्** + च् = च्)
५. उज्जीवयति = उत् + जीवयति (**त्** + ज् = ज्)
६. मृच्छकटिका = मृत् + शकटिका (**त्** + श् = च्)
७. तज्ज्ञात्वा = तत् + ज्ञात्वा (**त्** + ज्ञ् = ज्)
८. कश्चन = कस् + चन (**स्** + च् = श्)
९. तच्चिन्त्यम् = तत् + चिन्त्यम् (**त्** + च् = च्)
१०. कियच्चिरम् = कियत् + चिरम् (**त्** + च् = च्)

Observe the first example here. In brackets it is shown that **स्** + श् = श् . When सकार and शकार are juxtaposed सकार is replaced with शकार. The letter that is replaced (**स्**) by another is shown in boldtype. Try to understand the other examples similarly.

श्चुत्वसन्धेः नियमः

When सकार and तवर्ग letters come in contact with शकार and चवर्ग letters the former are replaced by the latter respectively. This is known as श्चुत्वसन्धिः ।

In the table shown below, when any of the letters of the first column comes before or after any of the letters of the second, those in the first column are replaced by those in the third respectively.

स्	श्	श्
त	च	च
थ	छ	छ
द	ज	ज
ध	झ	झ
न	ञ	ञ

अभ्यासः

I. Join the words.

१. शिशुस् + शेते = ...
२. रामस् + शालाम् = ...

३. सन् + जयः = ...
४. सत् + जनः = ...
५. तत् + छाया = ...
६. एतत् + च = ...
७. सत् + चित् = ...
८. तत् + ज्वलति = ...
९. विद्युत् + जिह्वः = ...
१०. बृहत् + छत्रम् = ...

II. Split the Sandhi and point out which two letters are joined.

१. विष्णुश्चालयति = ... + ... (.... + ... = ...)
२. गुणिश्चयः = ... + ... (.... + ... = ...)
३. सुहृज्जगाम = ... + ... (.... + ... = ...)
४. सुहृज्जटायुः = ... + ... (.... + ... = ...)
५. नदीश्च = ... + ... (.... + ... = ...)
६. अन्यच्छत्रम् = ... + ... (.... + ... = ...)
७. विपच्च = ... + ... (.... + ... = ...)
८. सच्छक्तिः = ... + ... (.... + ... = ...)
९. उच्चाटनम् = ... + ... (.... + ... = ...)
१०. तज्जीवनम् = ... + ... (.... + ... = ...)

२. ष्टुत्वसन्धिः

Read the following examples.

१. मल्लिनाथेन कुमारसम्भवस्य बृहट्टीका लिखिता ।
२. सः उड्डयनं करोति ।
३. पतङ्गः आकाशे उड्डयते ।
४. रामेण धनुष्टङ्कारः कृतः ।
५. कन्याष्षोडश कूपात् जलम् आनयन्ति ।
६. बालिकाष्षोढा विभक्ताः । (षोढा - into six groups)
७. पतड्डमरुकं सः गृहीतवान् ।
८. तड्डोलायमानम् अस्ति ।

The Sandhi words printed in bold type above are split as follows.

१. बृहट्टीका = बृहत् + टीका = (**त्** + ट् = ट्)
२. उट्टङ्कनम् = उत् + टङ्कनम् (**त्** + ट् = ट्)
३. उड्डयते = उत् + डयते (**त्** + ड् = ड्)
४. धनुष्टङ्कारः = धनुस् + टङ्कारः (**स्** + ट् = ष्)
५. कन्याष्षोडश = कन्यास् + षोडश (**स्** + ष् = ष्)
६. बालिकाष्षोढा = बालिकास् + षोढा (**स्** + ष् = ष्)
७. पतड्डमरुकम् = पतत् + डमरुकम् (**त्** + ड् = ड्)
८. तड्डोलायमानम् = तत् + डोलायमानम् (**त्** + ड् = ड्)

ष्टुत्वसन्धेः नियमः

When **सकार** and the letters of **तवर्ग** come before or after **षकार** and **टवर्ग** the former are replaced by the latter respectively. This is known as **ष्टुत्वसन्धिः** ।

In the table when any of the letters in the first column comes before or after any of those in the second, the letters in the first column are replaced by those in the third respectively.

स्	ष्	ष्
त्	ट्	ट्
थ्	ठ्	ठ्
द्	ड्	ड्
ध्	ढ्	ढ्
न्	ण्	ण्

अभ्यासः

III. Join Sandhi.

१. तत् + टीका = ...
२. नदत् + डमरुकम् = ...
३. दलास् + षट् = ...

४. चक्रिन् + ढौकसे = ...

५. असकृत् + टङ्कनम् = ...

६. बालिकास् + षोडश = ...

IV. Disjoin Sandhi and point out the letters that have joined according to sandhi rule.

उदा - एतड्डमरुकम् = एतत् + डमरुकम् (त् + ड् = ड्)

१. सट्टिप्पणी = ... + ... (..... + ... = ...)

२. बालष्षष्ठः = ... + ... (..... + ... = ...)

३. बृहट्टङ्कशाला = ... + ... (..... + ... = ...)

४. असकृड्डयनम् = ... + ... (..... + ... = ...)

५. स्याड्ढक्का = ... + ... (..... + ... = ...)

६. भयकृड्डामरः = ... + ... (..... + ... = ...)

७. हसड्डिम्भः = ... + ... (..... + ... = ...)

८. शरड्डम्बरः = ... + ... (..... + ... = ...)

८. लौकिकन्यायाः

There are some popular maxims in Samskrit language. Appropriate use of these adds charm to speech. In this series we give two maxims in each lesson of Shiksha course.

1. **काकतालीयन्यायः** - When any two events occur together by chance it is Kakataliya occurence.

   A crow sits on a palm tree. Immediately a palm leaf (branch) breaks loose and falls down. The two events though unrelated occur simultaneously. In such happenings this maxim is quoted.

2. **भिक्षुपादप्रसारन्यायः** - A beggar had no place even to stretch his legs. Somebody offered him a place to lie down. But, in course of time the beggar occupied the entire house and threw out the owner himself !

१. सङ्ग्राह्यविषयाः

अ. Here is a description of the boundary of our country in the Puranas.

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ।।

The region to the north of the ocean and to the south of Himalayas, is known as भारतवर्षम् । The inhabitants here are called भारतीयाः । (Here the word वर्ष refers to a continent with in Jambudvipa. Of the nine Varshas in जम्बूद्वीप, भारतम् is the ninth.)

रत्नाकराधौतपदां हिमालयकिरीटिनीम् ।
ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम् ।।

Oh Bharatamata ! I salute you. Your feet are washed by the ocean king. Himavan is your crown. Brahmin sages and Royal sages are the jewels on your body.

आ. Contribution of Bharatha to the field of Mathematics and Science.

- Invention of Zero
- Indian numerals
- Decimal system
- Algebra
- Trignometry
- Ayurveda school of medicine
- Atomic theory
- Surgery/Cosmetic surgery
- Yoga

शिक्षा - प्रथमः पाठः

प्रश्नाः

I. *अधोलिखिते वाक्ये विभक्तीः निर्दिशत ।*

१. भिक्षुकः क्षुधायाः शमनाय पादाभ्याम् एव ग्रामात् ग्रामं गत्वा भिक्षां याचते सर्वत्र ।

II. *अधोनिर्दिष्टानां शत्रन्तपुंलिङ्गरूपाणि लिखत ।*

१. रक्षति ....

२. वहति ....

३. भषति ....

४. धावन्ति ....

५. गच्छन्ति ....

III. *उत्तरयत ।*

१. आहृदयं विनयशीलतायाः कारणं किम् ?

२. केन विना दैवं न सिद्ध्यति ?

३. रथस्य गतिः केन न भवति ?

IV. *अन्वयरचनां कुरुत ।*

१. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।

२. धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।

V. *संयोज्य लिखत ।*

१. मनस् + चञ्चलम् २. गच्छत् + जनः

३. धीमत् + छात्रः ४. सकृत् + चालय

५. बहवस् + चोराः

(**Note:** Answers for the above exercises are given in the end of this book (**P.No. - 229**). After completing them, check your answers.)

शिक्षा - द्वितीयः पाठः

।। मनो हि हेतुः सर्वेषाम् इन्द्रियाणां प्रवर्तने ।।

Mind is the cause of all the activities of sense organs.

- *Ramayana*

१. कृदन्ताः

शतृ - प्रथमा (विशेषक्रियापदानि)

In the previous lesson you got familiar with the प्रथमाविभक्ति forms of present participles (शत्रन्ताः) like पठन्, गच्छन् (one who is reading, one who is going) etc. Now you will learn the forms of some irregular verbs.

Study the following examples -

१. पिता कार्यं **कुर्वन्** पुत्रं दृष्टवान् ।

While doing his work the father saw the son.

२. अरविन्दः गीतं **शृण्वन्** चित्रं लिखति ।

Aravinda draws a picture while listening to a song.

३. राकेशः पादत्राणं **क्रीणन्** धनस्यूतात् धनं स्वीकृतवान् ।

४. शिशुः **रुदन्** पितामहीम् आहूतवान् ।

५. वृद्धः इदानीं घनाहारं स्वीकर्तुं **शक्नुवन्**[1] अस्ति ।

६. एतत् अकार्यम् इति **जानन्** अपि सः उत्कोचं[2] स्वीकरोति ।

७. बालकः कन्दुकं **क्रीणन्** मार्गं पश्यति ।

---

1. being capable of 2. bribe (द्वि.वि.)

८. लेखकः प्रशस्तिं **प्राप्नुवन्** गतदिनानि स्मृतवान् ।
९. रवीन्द्रः पुत्रं **गृह्णन्** यानम् आरूढवान् ।
१०. शिक्षकः उत्तरं **ददत्**[3] कक्ष्यातः गतवान् ।
११. सैनिकः दण्डनायकात् **बिभ्यत्**[4] प्रतिगतवान् ।
१२. ते नूतनप्रकोष्ठे रज्जुं **बध्नन्तः** गीतवन्तः ।
They sang tying a rope in the new room.
१३. नायकाः मित्रस्य कष्टं **जानन्तः** साहाय्यं कृतवन्तः ।
१४. शिशवः मातरं **स्मरन्तः रुदन्तः** आसन् ।
१५. ते प्रतिवर्षं जन्मदिनोत्सवे रुग्णेभ्यः फलं **ददतः** आसन् ।
१६. जनाः वार्ताः **शृण्वन्तः** हर्षोद्गारं कृतवन्तः ।
१७. अन्धाः भित्तिं **गृह्णन्तः** सोपानानि आरूढवन्तः[5] ।
१८. कार्यकर्तारः कार्यं **कुर्वन्तः** गीतं गीतवन्तः ।
१९. कौरवाः **जानन्तः**[6] अपि अधर्मम् आचरितवन्तः ।
२०. बालाः सर्पात् **बिभ्यतः** धावितवन्तः ।
Children who were scared of the serpent ran away.

Note :

1. In the previous lesson you learnt the **शत्रन्त** forms of regular verbs like **गच्छन्, पिबन्** etc. Given here are the **शत्रन्त** forms of some **विशेषक्रियापदानि** । Carefully read them and memorise.
2. In the tenth sentence above **'ददत्'** is the **शत्रन्त** form. You may wonder why it is different from **पठन्** । You have learnt about the grouping of roots into ten ganas. The **शत्रन्त** forms of the roots of the third gana donot have **नकारः** । Hence the form **ददत्** । The plural of the same will be **ददतः** । Similarly in **बिभ्यत्, दधत्** etc., there is no **नकारः** ।
3. The plural forms of all the irregular verbs used in the above sentences, are given in the exercise below.

---

3. giving, 4. being afraid, 5. climbed, 6. knowing.

अभ्यासः

I. *अधस्तनक्रियापदानां बहुवचनान्तं रूपं दृष्ट्वा शत्रन्तपुंलिङ्गैकवचनान्तं रूपं लिखत ।*

उदा -	करोति	कुर्वन्ति	कुर्वन्
१.	शृणोति	शृण्वन्ति	....
२.	बध्नाति	बध्नन्ति	....
३.	रोदिति	रुदन्ति	....
४.	शक्नोति	शक्नुवन्ति	....
५.	जानाति	जानन्ति	....
६.	क्रीणाति	क्रीणन्ति	....
७.	आप्नोति	आप्नुवन्ति	....
८.	गृह्णाति	गृह्णन्ति	....
९.	ददाति	ददति	....
१०.	बिभेति	बिभ्यति	....

II. *अधोनिर्दिष्टानां क्रियापदानां शत्रन्तपुंलिङ्ग-एकवचनान्तं रूपं बहुवचनान्तं रूपं च लिखत ।*

उदा -	जानाति	जानन्	जानन्तः
१.	गृह्णाति	....	....
२.	क्रीणाति	....	....
३.	रोदिति	....	....
४.	ददाति	....	....
५.	करोति	....	....
६.	शक्नोति	....	....
७.	बिभेति	....	....
८.	आप्नोति	....	....
९.	बध्नाति	....	....
१०.	शृणोति	....	....

III. *आवरणे दत्तानां क्रियापदानां साहाय्येन उचितैः शत्रन्तरूपैः रिक्तस्थलानि पूरयत ।*

उदा - नर्तकाः गीतं .... (श्रृण्वन्ति) नर्तितवन्तः ।
नर्तकाः गीतं श्रृण्वन्तः नर्तितवन्तः ।

१. छात्राः ....(रुदन्ति) पाठं लिखितवन्तः ।
२. भक्ताः जपं .... (कुर्वन्ति) आनन्दम् अनुभवन्ति ।
३. अर्चकाः तीर्थं .... (ददति) उपविष्टवन्तः सन्ति ।
४. शिक्षकाः पुस्तकानि..........(क्रीणन्ति) शालाम् आगतवन्तः ।
५. विद्यार्थिनः शिक्षकेभ्यः ....(बिभ्यति) गृहपाठं समापितवन्तः ।
६. अभिमानिनः पक्षस्य ध्वजं आपणेषु .... (बध्नन्ति) अग्रे गतवन्तः ।

IV. *आवरणे दत्तानां क्रियापदानाम् शत्रन्तपुंलिङ्गैकवचनान्तेन रूपेण रिक्तस्थानानि पूरयत ।*

(गृह्णाति, बध्नाति, जानाति, प्राप्नोति, रोदिति, शक्नोति, बिभेति)

उदा - सुग्रीवः रुदन् रामस्य साहाय्यं पृष्टवान् ।

१. सः कार्यं कर्तुं .... अपि तूष्णीं स्थितवान् ।
२. शङ्करः प्रादेशिकभाषां ....अपि स्वमातृभाषया एव उत्तरितवान् ।
३. सर्वेशः नूतनान् अनुभवान् .... कार्यश्रेण्याम् अग्रे गतवान् ।
४. पङ्गुः दण्डं .... मार्गे चलति ।
५. नर्तकः पादयोः किङ्किणीं ....शीघ्रं धावितवान् ।
६. दुष्टात् .... कर्मकरः कार्ये दोषं कृतवान् ।

(**Note :** Compare your answers with those on the end of this book **(P.No. - 230)** and ascertain their correctness.)

२. पदसङ्ग्रहः

गण – To Count

१. गणयति २. गण्यते ३. गणयिष्यति

४. गणयितव्यम् - गणनीयम् ५. गणितः - गणिता - गणितम् ६. गणितवान् - गणितवती ७. अ) गणयन् - गणयन्ती आ) गणयमानः ८. गणयित्वा - विगणय्य ९. गणयितुम् ।

चर् – to graze/ wander about

१. चरति २. चर्यते ३. चरिष्यति

४. चरितव्यम् - चरणीयम् ५. चरितः - चरिता - चरितम् ६. चरितवान् - चरितवती, ७. चरन् - चरन्ती ८. चरित्वा - सञ्चर्य ९. चरितुम्

चिञ् – to collect

१. चिनोति २. चीयते ३. चेष्यति

४. चेतव्यम् - चयनीयम् ५. चितः - चिता - चितम् ६. चितवान् - चितवती ७. चिन्वन् - चिन्वती ८. चित्वा - विचित्य ९. चेतुम् ।

चिति (चिन्त्) – to think

१. चिन्तयति २. चिन्त्यते ३. चिन्तयिष्यति

४. चिन्तयितव्यम् - चिन्तनीयम् ५. चिन्तितः - चिन्तता - चिन्तितम् ६. चिन्तितवान् - चिन्तितवती ७. अ) चिन्तयन् - चिन्तयन्ती, आ) चिन्तयमानः ८. चिन्तयित्वा - विचिन्त्य ९. चिन्तयितुम् ।

छिदिर् – to break up, cut up

१. छिनत्ति २. छिद्यते, ३. छेत्स्यति

२. छेत्तव्यम् - छेदनीयम् ५. छिन्नः - छिन्ना - छिन्नम् ६. छिन्नवान् - छिन्नवती ७. छिन्दन् - छिन्दती ८. छित्त्वा - विच्छिद्य ९. छेत्तुम् ।

३. प्रहेलिका

राजन् ! कमलपत्राक्ष ! तत्ते भवतु चाक्षयम् ।
आसादयति यद्रूपं करेणुः करणैः विना ।।

Oh ! lotus eyed king ! May you have plenty that form of करेणु (she - elephant) without karanas (the sense organs). This is the

superficial meaning.

Answer to the puzzle - From the word करेणु, if the consonants क्, र्, ण् are removed, the form that remains is अ + ए + उः । अ + ए = ऐ + उः - आयुः । So, the verse means "May you live long oh king !".

४. सुभाषितम्

३. दानं भोगो नाशस्तिस्त्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ।।

पदविभागः

दानम्, भोगः, नाशः, तिस्त्रः, गतयः, भवन्ति, वित्तस्य । यः, न, ददाति, न, भुङ्क्ते, तस्य, तृतीया, गतिः, भवति ।

सन्धिः

भोगः + नाशः, नाशः + तिस्त्रः, तिस्त्रः + गतयः, गतयः + भवन्ति, यः + न, गतिः + भवति

तात्पर्यम्

There are three ways of spending money. Charity, enjoyment and loss. A person who neither gives charity nor enjoys will lose his money.

प्रतिपदार्थः

वित्तस्य दानं, भोगः, नाशः - तिस्त्रः गतयः भवन्ति । There are three courses to money charity, enjoyment and loss. यः न ददाति न भुङ्क्ते तस्य तृतीया गतिः भवति - If a person neither gives nor enjoys himself, his money takes the third course i.e, loss.

४. व्यसनानन्तरं सौख्यं स्वल्पमप्यधिकं भवेत् ।
काषायरसमासाद्य स्वाद्वतीवाम्बु विन्दते ।।

पदविभागः

व्यसनानन्तरम्, सौख्यम्, स्वल्पम्, अपि, अधिकम्, भवेत्, काषायरसम्, आसाद्य, स्वादु, अतीव, अम्बु, विन्दते ।

सन्धिः

व्यसन + अनन्तरम्, अपि + अधिकम्, स्वादु + अतीव, अतीव + अम्बु

तात्पर्यम्

After going through miseries even a small joy seems big. After tasting astringent flavour (of medicines, gooseberry etc) water tastes very sweet indeed.

प्रतिपदार्थः

व्यसनानन्तरम् = After experiencing sorrow, **स्वल्पम् अपि सौख्यम्** = even a small joy, **अधिकम् भवेत्** = seems big. (Just as) **काषायरसमासाद्य** = after tasting astringent flavour, **अम्बु अतीव स्वादु विन्दते** = one finds water very sweet.

(Here for both **भवेत्, विन्दते** the **तात्पर्यार्थ** is taken and not their literal meaning)

५. काव्यकथा

।। मन्त्रालोचनम् ।।

यदा नारदमुनिः द्वारकानगरात् निवृत्तवान्, [a]तदैव इन्द्रप्रस्थनगरात् युधिष्ठिरः अन्यं सन्देशं श्रीकृष्णाय प्रेषितवान् । युधिष्ठिरः राजसूययागं कर्तुं सङ्कल्पं कृतवान् आसीत् । यागस्य मध्ये विघ्नो[b] भवति इति धर्मराजः भीतः आसीत् । अतः सः श्रीकृष्णम् आहूतवान् ।

श्रीकृष्णः चिन्तितवान् - 'एकत्र देवकार्यम्, अन्यत्र बन्धुकार्यम् । किं करोमीति[c] सन्देह[d] उत्पन्नः । समस्यां परिहर्तुं सः मन्त्रालोचनं[1] कर्तुं निश्चितवान् । ज्ञानवृद्धः उद्धवः अग्रजो[e] बलरामश्च आगतवन्तौ । त्रयो[f] मिलित्वा मन्त्रालोचनम् अकुर्वन् ।

श्रीकृष्णः - ''नारदमहर्षिः देवेन्द्रस्य सन्देशं गृहीत्वा आगतवान् ।

---

a. तदा + एव b. विघ्नः + भवति c. करोमि + इति d. सन्देहः + उत्पन्नः e. अग्रजः + बलरामः f. त्रयः + मिलित्वा

---

1. confidential deliberations

दुष्टशिशुपालस्य वधः [2]करणीयः इति सूचितवान् । युधिष्ठिरो[g] यागाय माम् आहूतवान् । तस्य विघ्नभयम् अस्ति । एवं कार्यद्वयं सम्प्राप्तम् । धर्मराजस्य अनुजाः वीराः शूराश्च । तस्मात् धर्मराजः तेषां साहाय्येन यागं करोति । शिशुपालस्तु दुष्टो[h] दिने दिने वर्धते[3] । नीतिकाराः वदन्ति - 'व्याधिः वर्धमानः शत्रुः च [i]नोपेक्षणीयौ[4]' इति । अयं ममाभिप्रायः[j] । अत्र [5]युक्तायुक्तं विचार्य कथयन्तु'' इति उक्तवान् ।

प्रश्नाः

१. युधिष्ठिरः किं कर्तुं सङ्कल्पितवान् आसीत् ?
२. धर्मराजस्य भीतिः का ?
३. मन्त्रालोचनार्थं कौ आगतौ ?
४. देवेन्द्रः किं सूचितवान् ?
५. कौ न उपेक्षणीयौ ?

६. अन्वयरचना

In this section we have, for you, selected verses from the Bhagavadgita.

(The verses are taken from the first chapter of the Gita. As it is not possible to include all the verses of this chapter in these ten lessons, only a few slokas have been extracted. In some places the latter half of one sloka is combined with the former half of the next sloka.)

The blind Dhritarashtra wanted to see the happenings in the Mahabharata war-field. To fulfil his desire Sanjaya was blessed by Vyasa with a divine vision that enabled him to see the happenings on the warfield while sitting in the camp with Dhritarashtra. This is the story that forms the background for the Bhagavadgita.

The armies of Kauravas and Pandavas are in array on the battlefield. Arjuna wants to see the warriors in the enemy's army.

---

g. युधिष्ठिरः + यागाय h. दुष्टः + दिने दिने i. न + उपेक्षणीयौ j. मम + अभिप्रायः

---

2. should be done, 3. is getting stronger, 4. should not be ignored, 5. right and wrong.

Krishna stops the chariot between the two armies for Arjuna to take a good look at those whom he has to fight. Arjuna is terrified at the sight of his kith and kin there and drops his bow saying he would not fight. There begins the teaching of Krishna. Krishna elaborates on what is Dharma and what is Adharma and proceeds to explain many things to Arjuna.

We begin with the second sloka of the first chapter here. In reply to Dhritarashtra's query 'what did my sons and Pandu's sons do in the battle field', Sanjaya says -

१. दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्क्रम्य राजा वचनमब्रवीत् ।।

पदविभागः

दृष्ट्वा, तु, पाण्डवानीकम्, व्यूढम्, दुर्योधनः, तदा, आचार्यम्, उपसङ्क्रम्य, राजा, वचनम्, अब्रवीत् ।

सन्धिः

पाण्डव + अनीकम्, दुर्योधनः + तदा

तात्पर्यम्

Duryodhana on seeing the army of the Pandavas in array, approached his preceptor Drona and spoke these words.

वाक्यविश्लेषणम्

1. क्रियापदम् - अब्रवीत्
2. प्रथमा - दुर्योधनः, राजा
3. द्वितीया - वचनम्, आचार्यम्, पाण्डवानीकम्, व्यूढम्
4. क्त्वान्तं, ल्यबन्ताव्ययं च - दृष्ट्वा, उपसङ्क्रम्य
5. अव्ययम् - तदा, तु

The main verb here is अब्रवीत् । The object (कर्मपदम्) of it is वचनम् । आचार्यम् is the कर्म of the क्रिया 'उपसङ्क्रम्य' । व्यूढम् is an adjective to पाण्डवानीकम् । These two words are having अन्वय in the क्रिया 'दृष्ट्वा' ।

अन्वयरचना

(व्यूढम् = standing in military array (व्यूहः), अनीकम् = army

(द्वि.वि.), उपसङ्गम्य = having approached)

In a sloka a poet enjoys the freedom of placing any word anywhere to suit the requirement of छन्दस् and figures of speech like अनुप्रास etc. To understand the meaning of it we have to first arrange the words in prose order (अन्वयक्रमः). By putting appropriate questions on the verb we can get the prose order. This is known as अन्वयरचना ।

अब्रवीत् - *क्रियापदम्*
कः अब्रवीत् ? - दुर्योधनः
कीदृशः दुर्योधनः ? - राजा
किम् अब्रवीत् ? - वचनम्
किं कृत्वा अब्रवीत् ? - उपसङ्गम्य
कम् उपसङ्गम्य ? - आचार्यम्
पुनः किं कृत्वा अब्रवीत् ? - दृष्ट्वा
किं दृष्ट्वा ? - पाण्डवानीकम्
कीदृशं पाण्डवानीकम् ? - व्यूढम्
कदा अब्रवीत् ? - तदा

The next sloka is also addressed to Dronacharya by Duryodhana.

२. पश्यैतां पाण्डुपुत्राणाम् आचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ।।

पदविभागः

पश्य, एताम्, पाण्डुपुत्राणाम्, आचार्य, महतीम्, चमूम्, व्यूढाम्, द्रुपदपुत्रेण, तव, शिष्येण, धीमता ।

सन्धिः

पश्य + एताम्

तात्पर्यम्

Oh preceptor ! see this huge army of Pandu's sons, which your disciple, the brilliant Dhrishtadyumna (Drupada's son) has got in array.

वाक्यविश्लेषणम्

1. क्रियापदम् - पश्य
2. प्रथमाविभक्तिः - (त्वम्) - अध्याहृतम्
3. सम्बोधनप्रथमा - आचार्य !
4. द्वितीया - एताम्, महतीम्, चमूम्, व्यूढाम्
5. तृतीया - द्रुपदपुत्रेण, शिष्येण, धीमता
6. षष्ठी - पाण्डुपुत्राणाम्, तव

अन्वयरचना

Before proceeding with **अन्वयरचना**, know a couple of rules connected with it.

1. If there is a word in सम्बोधनप्रथमाविभक्तिः it should be placed as it is in the beginning. There will be no question to elicit that word.
2. In the earlier lesson you have learnt about **अध्याहार** । When there is a **क्रियापदम्** in **मध्यमपुरुष** like **पश्य**, **गच्छसि** etc., the **कर्तृपदम्** **'त्वम्'** is understood. Similarly, when there is a verb in first person and the **कर्तृपदम्** **'अहम्'** is not mentioned, it is to be understood.

In the sloka above there is the verb **'पश्य'** and the **कर्तृपदम्** **'त्वम्'** is not found. So it is supplied.

The **अन्वयरचना** for this sloka is as follows -

आचार्य ! - Vocative case of address
पश्य - क्रियापदम्
कां पश्य ? - चमूम्
केषां चमूम् ? - पाण्डुपुत्राणाम्
कीदृशीं चमूम् ? - एताम्
पुनः कीदृशीम् ? - महतीम्
पुनः कीदृशीं चमूम् ? - व्यूढाम्
केन व्यूढाम् ? - द्रुपदपुत्रेण
कीदृशेन द्रुपदपुत्रेण ? - धीमता

पुनः कीदृशेन ? - शिष्येण
कस्य शिष्येण ? - तव

३. अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥

पदविभागः

अत्र, शूराः, महेष्वासाः, भीमार्जुनसमाः, युधि, युयुधानः, विराटः, च, द्रुपदः, च, महारथः ।

सन्धिः

शूराः + महेष्वासाः, महेष्वासाः + भीमार्जुनसमाः, भीमार्जुनसमाः + युधि, युयुधानः + विराटः, विराटः + च, द्रुपदः + च ।

तात्पर्यम्

Here are valorous men who are great archers ; who match Bhima and Arjuna in war - Yuyudhana (Satyaki), Virata and Drupada, a great warrior.

वाक्यविश्लेषणम्

The words should be grouped as follows -

* क्रियापदम् - (सन्ति) - This is supplied.
* प्रथमा बहुवचनम् - शूराः, महेष्वासाः, भीमार्जुनसमाः
  एकवचनम् - युयुधानः, विराट, द्रुपदः, महारथः
* सप्तमी - युधि
* अव्ययम् - अत्र, च

Here महारथः is an adjective of द्रुपदः । च is a conjunction.
Now let us do the अन्वयरचना ।

अन्वयरचना

(सन्ति)
के सन्ति ? - महेष्वासाः
कीदृशाः महेष्वासाः ? - शूराः
पुनः कीदृशाः ? - भीमार्जुनसमाः
पुनः कः (अस्ति) ? - युयुधानः
पुनः कः ? - विराटः

पुनः कः ? - द्रुपदः च
कीदृशः द्रुपदः ? - महारथः
(The verb सन्ति is supplied to the sentence as a whole. When a question is put for a word in singular the verb should be अस्ति ।)

७. सन्धयः
३. अनुस्वारसन्धिः

Study the following examples.

१. अहं प्रातः देवं नमस्करोमि ।
२. कृष्णं वन्दे जगद्गुरुम् ।
३. वनं गच्छामि, गुहां पश्यामि ।
४. सत्यं वद, धर्मं चर ।
५. दुःखं त्यज, कर्तव्यं पालय ।
६. भोजनं कृत्वा विद्यालयं गच्छ ।
७. सः गीतं श्रुत्वा हर्षं प्राप्तवान् ।
८. पदं स्मृत्वा वाक्यं लेखनीयम् ।

The bold words in the above sentences are split up as follows -

१. (अ) अहम् + प्रातः । (आ) देवम् + नमस्करोमि ।
२. (अ) कृष्णम् + वन्दे ।
३. (अ) वनम् + गच्छामि । (आ) गुहाम् + पश्यामि ।
४. (अ) सत्यम् + वद । (आ) धर्मम् + चर
५. (अ) दुःखम् + त्यज । (आ) कर्तव्यम् + पालय ।
६. (अ) भोजनम् + कृत्वा । (आ) विद्यालयम् + गच्छ ।
७. (अ) गीतम् + श्रुत्वा । (आ) हर्षम् + प्राप्तवान् ।
८. (अ) पदम् + स्मृत्वा । (आ) वाक्यम् + लेखनीयम् ।

Rule:

When a मकार at the end of a word is followed by any consonant, it is replaced by an अनुस्वार (ं) । In all the above examples a पदान्तमकार followed by a व्यञ्जनम् is replaced by an अनुस्वार ।

अभ्यासः

I. Join the words according to Sandhi rule.

१. सर्वम् + नष्टम् = ...
२. अहम् + तम् = ...
३. आपणम् + गत्वा = ...
४. तम् + दृष्ट्वा = ...
५. एवम् + कृत्वा = ...
६. प्रवचनम् + श्रोतुम् = ...
७. सभाम् + गच्छन् = ...
८. पत्रिकाम् + पठ = ...
९. किम् + वदसि = ...
१०. छत्रम् + देहि = ...

II. Disjoin the Sandhi.

१. वादं त्यज = ... + ...
२. सेवां कुरु = ... + ...
३. दीपं ज्वालय = ... + ...
४. ग्रामं गच्छ = ... + ...
५. तं सूचय = ... + ...
६. वनं गत्वा = ... + ...
७. सप्तमं वाक्यम् = ... + ...
८. रामं नम = ... + ...
९. संस्कृतं श्रेष्ठम् = ... + ...
१०. कष्टं नास्ति = ... + ...

४. जश्त्वसन्धिः

Study the following examples -

१. उत्तमाः बालाः सूर्योदयात् **प्रागेव** उत्तिष्ठन्ति ।
२. **षडाननः** शिवस्य पुत्रः ।
३. **जगद्गुरुः** अस्मान् पातु ।

४. तेन **महद्यशः** सम्पादितम् ।
५. **अब्जं** सुन्दरम् अस्ति ।
६. **सम्यगभिहितं** भवत्या ।
७. अपारः **अब्धिः** कस्मिन् आश्चर्यं न जनयति ?
८. स्वरान्ताः व्याकरणे **अजन्ताः** इति उच्यन्ते ।
९. बालः **षडपि** कदलीफलानि खादितवान् ।
१०. अशोकः **सम्राडिति** ख्यातः आसीत् ।

The above examples when the Sandhi is split, are as follows -

१. प्रागेव - प्राक् + एव (**क्** + ए = ग्)
२. षडाननः - षट् + आननः (**ट्** + आ = ड्)
३. जगद्गुरुः - जगत् + गुरुः (**त्** + गु = द्)
४. महद्यशः - महत् + यशः (**त्** + य = द्)
५. अब्जम् - अप् + जम् (**प्** + ज = ब्)
६. सम्यगभिहितम् - सम्यक् + अभिहितम् = (**क्** + अ = ग्)
७. अब्धिः - अप् + धिः (**प्** + धि = ब्)
८. अजन्ताः - अच् + अन्तः (**च्** + अ = ज्)
९. षडपि - षट् + अपि (**ट्** + अ = ड्)
१०. सम्राडिति - सम्राट् + इति (**ट्** + इ = ड्)

Rule:

When a वर्गीयव्यञ्जनम् except ङ, ञ, ण, न and म (वर्गपञ्चमाक्षराणि), which is at the end of a word (पदान्तम्), is followed either by a vowel or a soft consonant (मृदुव्यञ्जनम्), it is replaced by the third letter of the same वर्ग । This is called जश्त्वसन्धिः ।

* The consonants from 'क' to 'म' are called वर्गीयव्यञ्जनानि ।

क, ख, ग, घ, ङ - कवर्गः
च, छ, ज, झ, ञ - चवर्गः
ट, ठ, ड, ढ, ण - टवर्गः
त, थ, द, ध, न - तवर्गः

प, फ, ब, भ, म - पवर्गः

* The last three consonants in each वर्ग and य,व,र,ल,ह are known as मृदुव्यञ्जनानि / soft consonants.

ग, घ, ङ		ज, झ, ञ
ड, ढ, ण		द, ध, न
ब, भ, म		य, व, र, ल, ह

जश्त्वसन्धिः can be represented in a tabular form thus -

पूर्वः	परः	आदेशः
वर्गीय-व्यञ्जनम् (ङञणनम-एतानि विहाय)	स्वरः अथवा मृदुव्यञ्जनम्	ग ज ड द ब

अभ्यासः

III. Join Sandhi.

१. दिक् + अम्बरः = ...
२. तत् + एव = ...
३. धिक् + धनम् = ...
४. प्रावृट् + जलम् = ...
५. स्त्रक् + इयम् = ...
६. अच् + वर्णः = ...
७. अप् + जातम् = ...
८. सम्राट् + अस्ति = ...
९. वदेत् + इति = ...
१०. षट् + अधिकम् = ...

IV. Disjoin sandhi and write which two letters have undergone sandhi.

उदा - वाग्वादः = वाक् + वादः (क् + वा = ग्)
१. बृहद्रात्रः = ... + ... (.... + ... = ...)

२. धीमद्वरः = ... + ... (.... + ... = ...)

३. वाग्बाणः = ... + ... (.... + ... = ...)

४. वागीशः = ... + ... (.... + ... = ...)

५. महदस्ति = ... + ... (.... + ... = ...)

६. षड्वादने = ... + ... (.... + ... = ...)

७. मधुलिड्डयते = ... + ... (.... + ... = ...)

८. सुबन्तम् = ... + ... (.... + ... = ...)

९. उद्गच्छति = ... + ... (.... + ... = ...)

१०. अबादीनाम् = ... + ... (.... + ... = ...)

८. लौकिकन्यायाः

३. देहलीदीपन्यायः - देहली means 'threshold'. A lamp placed on the threshold sheds light to the inside and outside. When it is possible to achieve two results by doing one work or when a single word is having अन्वय in two places this maxim is cited.

४. सूचीकटाहन्यायः - सूची is a needle. कटाहः is a frying pan. A person goes to a blacksmith with a request for a कटाहः । A little later another person comes to the same blacksmith requesting for a needle. Now the blacksmith uses his discretion and makes the needle first because it takes less time and then starts the work on the order for कटाहः । By doing this he avoids any delay for the person who wants a small job done. The maxim is quoted in such situations where priority of jobs is fixed based on the time they consume.

१. सङ्ग्राह्यविषयाः

अ) A sloka to be recited early in the morning. (immediately after waking up, looking at the palms)

१. कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले स्थिता गौरी प्रभाते करदर्शनम् ॥

Goddess Lakshmi resides at the tip of the hand, Saraswathi is in the middle of the palm and Gauri is at the base of the hand. Therefore, seeing the palm in the morning is considered auspicious.

Before stepping on the ground.

२. समुद्रवसने देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

Oh Goddess, the consort of Vishnu ! (Bhudevi) I bow to you. You have the ocean for your clothing and the mountains are your bosom. Forgive me for touching you with my feet.

आ) Some of the holy places of Indians situated outside the boundary of Bharatha.

- Manasasarovar (China)
- Kailasa parvata (China)
- Pashupatishvara (Nepal)
- Gourishankara peak (Nepal)
- Takshashila (Pakisthan)
- Panini's birth place (Lahore - Pakisthan)
- Most part of Sindhu river (Pakisthan)

● ●

शिक्षा - द्वितीयः पाठः

प्रश्नाः

I. *एतेषां क्रियापदानां शत्रन्तरूपं परिष्कृत्य लिखत ।*

	अशुद्धरूपाणि	शुद्धरूपाणि
उदा - शृणोति -	शृणुवन्	शृण्वन्
१. शक्नोति -	शक्नोवन्	....
२. बिभेति -	बिभ्यन्	....
३. क्रीणाति -	क्रयन्	....
४. रोदिति -	रोदन्	....
५. बध्नाति -	बध्नयन्	....
६. ददाति -	ददन्	....

II. *अधो निर्दिष्टानि वाक्यानि शुद्धानि उत अशुद्धानि इति निर्दिशत ।*

१. दानं भोग इति वित्तस्य द्वयी गतिः । ( )
२.'नाशः' इत्येषा तृतीया गतिः । ( )
३. व्यसनानन्तरं प्राप्तम् अल्पं सौख्यं खेदाय । ( )
४. काषायरससेवनात् पूर्वम् अम्बु स्वादु भवति । ( )
५. पाण्डवानां सेना द्रुपदेन व्यूढा । ( )

III. *एतेषां क्रियापदानां शत्रन्तपुंलिङ्गैकवचनं ल्यबन्तरूपं च लिखत ।*

	शत्रन्तं रूपम्	ल्यबन्तं रूपम्
१. गण्	....	....
२. चर्	....	....
३. चि	....	....
४. चिन्त	....	....
५. छिद्	....	....

(**Note:** Answers for the above exercises are given in the end of this book **(P.No. - 230)**. After completing them, check your answers.)

शिक्षा - तृतीयः पाठः

।। भवितव्यानां द्वाराणि भवन्ति सर्वत्र ।।

Destiny takes its own course everywhere.

१. कृदन्ताः

अ) शतृ (पुं) - द्वितीया

In the previous lesson you learnt the nominative forms of present participles such as पठन्, गच्छन् etc. Now you will learn the accusative singular and plural forms of the same. These participle forms generally act as adjectives to another word.

Study these sentences.

१. पिता **पठन्तं** बालं दृष्ट्वा हृष्टवान् ।

Father felt happy on seeing the boy reading.

Here 'पठन्तम्' is a विशेषणम् of 'बालम्' which is in द्वितीया-विभक्तिः । Therefore it is also used in accusative singular form.

२. जनाः वनं **गच्छन्तं** रामम् [1]अवलोक्य [2]रुदितवन्तः ।

३. [3]आरक्षकाः **अपहरन्तं** चोरं बद्धवन्तः ।

४. सः **पतन्तं** बालं दृष्ट्वा [4]हसितवान् ।

५. [5]**व्याप्नुवन्तं** मेघं दृष्ट्वा मयूराः नर्तितवन्तः ।

---

1. on seeing 2. cried (wept) 3. policemen 4. laughed 5. covering (spreading/pervading)

६. **धावन्तं** [6]मृगं रामः अनुसृतवान् ।
७. **नृत्यन्तं** मयूरम् अवलोक्य सर्पाः [7]पलायितवन्तः ।
८. [8]नवनीतं **चोरयन्तं** कृष्णं गोपी [9]भर्त्सितवती ।
९. अर्चयन्तं भक्तं देवः अनुगृहीतवान् ।
१०. उत्तरम् [10]**अजानन्तं** छात्रं गुरुः [11]उत्थापितवान् ।
११. **गायन्तं** गायकं जनाः प्रशंसितवन्तः ।
१२. विषयं **स्मरन्तं** भाषणकारं दृष्ट्वा सर्वे हसितवन्तः ।
१३. **भवान्** [12]**क्रीडतः** बालकान् पश्यतु । See the boys playing.
१४. तूष्णीं **तिष्ठतः** [13]कर्मकरान् स्वामी आक्षिप्तवान् । The master took to task the servants who were idling.
१५. सम्यक् उत्तरं **वदतः** बालकान् आचार्यः [14]श्लाघितवान् ।
१६. वेदं **रक्षतः** पण्डितान् को वा न मानयति[15] ?
१७. **निन्दतः** दुर्जनान् जनाः दूरीकुर्वन्ति ।
१८. न्यायम् **अनुसरतः** अधिकारिणः सर्वे [16]आद्रियन्ते ।
१९. **लिखतः** छात्रान् मा आह्वय[17] ।
२०. मार्गं **पृच्छन्तं** पान्थं[18] प्रति मार्गं दर्शितवान् ।

आ) शतृ (नपुं) - प्रथमा द्वितीया च

'पठत्' is the neuter gender form of 'पठन्'. The neuter forms of present participles differ from the masculine forms only in **प्रथमा** and **द्वितीयाविभक्तिः** । **तृतीया** onwards, the forms of neuter are similar to those of masculine. Therefore we give below a few sentences containing participle forms of neuter gender in **प्रथमा** and **द्वितीयाविभक्तिः** ।

१. प्रथमाविभक्तिः (नपुं)

१. उद्याने पुष्पं **विकसत्** अस्ति ।
Flower is blossoming in the garden.

पुष्पम् is a neuter gender word. Hence **विकसत्** which is an adjective

---

6. deer (द्वि. ए.) 7. ran away 8. butter (द्वि. ए.) 9. scolded 10. one who does not know (द्वि. ए.) 11. made (him) stand up 12. playing (द्वि. ब.) 13. servants (द्वि. ब.) 14. praised 15. not honours ? 16. respect 17. do not call 18. passer by

to it, is also in the same gender.

२. संस्कृतप्रचारकार्यं सम्यक् **प्रचलत्** अस्ति ।
३. भवतः अध्ययनं कथं **प्रचलत्** अस्ति ?
४. वृक्षात् पर्णं **पतत्** अस्ति ।
५. यन्त्रागारे[1] यन्त्रं शब्दं **कुर्वत्** अस्ति ।
६. जलबन्धात्[2] जलं **निर्गच्छत्** अस्ति ।
७. चुल्लेः[3] उपरि पात्रे स्थितं क्षीरम् **उद्गच्छत्**[4] अस्ति ।
८. शब्दं **कुर्वत्** लोकयानं[5] मार्गे अतिष्ठत् ।
९. **नश्यत्** वस्त्रं निर्धने खेदं जनयति ।
१०. विमानं शब्दं **कुर्वत्** आकाशात् अपतत् ।
११. **स्फुरत्**[6] नेत्रं शुभम् अशुभं वा सूचयति ।
१२. आकाशे नक्षत्राणि **स्फुरन्ति** सन्ति ।
Stars are twinkling in the sky.
१३. मार्गे यानानि **गच्छन्ति** सन्ति ।
१४. वृक्षात् **पतन्ति** पर्णानि वायुना नीतानि ।
१५. लोके **प्रचलन्ति** युद्धानि शान्तिप्रियाणां हृदये खेदं जनयन्ति ।

२. द्वितीयाविभक्तिः (नपुं)

१. मानवः **नश्यत्** वस्त्रं यथा त्यजति तथा आत्मा **नश्यत्** शरीरं त्यजति ।
२. वृक्षात् **पतन्ति** आम्रफलानि बालाः सङ्गृह्णन्ति[7] ।
३. सम्यक् कार्यम् **अकुर्वत्**[8] यन्त्रं तन्त्रज्ञः[9] समीकरोति ।
४. युद्धकाले आकाशे **गच्छत्** शत्रुविमानं सैनिकाः पातयन्ति[10] ।
५. नगरात् आगतः ग्रामीणः वेगेन **गच्छन्ति** यानानि दृष्ट्वा आश्चर्यचकितः ।
६. उद्याने **विकसन्ति** पुष्पाणि पश्यन्तः जनाः सन्तोषम् अनुभवन्ति ।

---

1. in the factory 2. from the dam 3. stove/oven 4. rising 5. bus 6. throbbing 7. collect 8. not working 9. Engineer 10. cause (them) to fall

७. पतनात् जातात् व्रणात् **स्रवत्** रक्तं दृष्ट्वा बालः रोदनं कृतवान् ।

Note:

1. In the first lesson of Parichaya you have learnt about विशेषणम् and विशेष्यम् in detail. You have learnt that the two will be in the same gender, number and case. The present participle forms (शत्रन्त) are used as adjectives. Hence the above rule applies here also.

   उदा - पिता पठन्तं बालं दृष्ट्वा हृष्टवान् । Here पठन्तम् is a विशेषणम् of बालम् । Hence it is in पुंलिङ्ग, द्वितीयाविभक्ति and एकवचनम् ।
2. The प्रथमा and द्वितीया forms of present participles in neuter gender are as follows. गच्छत् गच्छती गच्छन्ति । Therefore the usages will be like विकसत् पुष्पं, स्फुरती नक्षत्रे, गच्छन्ति यानानि etc.
3. The masculine nominative forms will be like गच्छन् गच्छन्तौ गच्छन्तः ।

अभ्यासः

I. *अधः दत्तानां द्वितीयान्तरूपाणि (एकवचने) लिखत ।*

उदा - क्रीडन् छात्रः - क्रीडन्तं छात्रम्

१. रुदन् शिशुः ....
२. पचन् सुरेन्द्रः ....
३. खादन् जनकः ....
४. धावन् अग्रजः ....
५. पिबन् पितृव्यः ....
६. स्खलन् नरेन्द्रः ....
७. आरोहन् शिक्षकः ....
८. चोरयन् गोपालः ....
९. उत्तिष्ठन् प्रभाकरः ....
१०. चिन्तयन् आचार्यः.............. ....

II. *एतेषां बहुवचनरूपाणि लिखत ।*

उदा - क्रीडन्तं छात्रम् - क्रीडतः छात्रान्

१. गायन्तं गायकम् ....
२. स्मरन्तं नाविकम् ....
३. पृच्छन्तं शिक्षकम् ....
४. सूचयन्तं नायकम् ....
५. क्षालयन्तं रजकम् ....
६. पश्यन्तं वीक्षकम् ....
७. अनुसरन्तं पुत्रम् ....
८. पठन्तं चालकम् ....

III. *अधस्तनं कोष्ठकं दृष्ट्वा उदाहरणानुसारं गणेशः किं किं कृतवान् इति लिखत ।*

गणेशः	पठन् पुत्रः लिखन् छात्रः रुदन् शिशुः स्खलन् वृद्धः गायन् स्नेहितः हसन् जनकः चिन्तयन् अनुजः	आहूतवान् । स्मृतवान् । उन्नीतवान् । गृहीतवान् । श्लाघितवान् । दृष्टवान् । पृष्टवान् ।

उदा - गणेशः पठन्तं पुत्रम् आहूतवान् ।

१. .... ।
२. .... ।
३. .... ।
४. .... ।
५. .... ।
६. .... ।

IV. *रेखाङ्कितानां शब्दानां बहुवचनरूपाणि उपयुज्य अधस्तनवाक्यानि पुनः लिखत ।*

उदा - भवान् जपन्तं भक्तं मा पीडयतु ।

भवान् जपतः भक्तान् मा पीडयतु ।

१. महेशः धावन्तं बालकं स्पृष्टवान् ।

२. माता क्षीरं पिबन्तं बालं दृष्टवती ।

३. सन्मार्गे गच्छन्तं सज्जनं जनाः श्लाघन्ते ।

४. गायन्तं गायकं नर्तकः आहूतवान् ।

५. भक्त्या नमन्तं साधकं देवी उत्थापितवती ।

६. दूरदर्शनं पश्यन्तं पुत्रं जनकः तर्जितवान् ।

(**Note :** Compare your answers with those on the end of this book **(P.No. - 231)** and ascertain their correctness.)

२. पदसङ्ग्रहः

जनी - to be born

१. जायते, २. जन्यते , ३. जनिष्यते,

४. जनितव्यम् - जननीयम् ५. जातः - जाता - जातम् । ६. जातवान्, जातवती, ७. जायमानः - ना, ८. जनित्वा, प्रजन्य, ९. जनितुम्

जागृ - to wake up

१. जागर्ति, २. जागर्यते, ३. जागरिष्यति

४. जागरितव्यम्, जागरणीयम् ५. जागरितः - ता - तम् । ६. जागरितवान् - वती, ७. जाग्रत् - ती, ८. जागरित्वा, प्रजागर्य, ९. जागरितुम्

ज्वल् - to burn

१. ज्वलति, २. ज्वल्यते, ३. ज्वलिष्यति

४. ज्वलितव्यम्, ज्वलनीयम् ५. ज्वलितः - ता - तम् । ६. ज्वलितवान् - वती, ७. ज्वलन् - न्ती, ८. ज्वलित्वा, सञ्ज्वल्य, ९. ज्वलितुम्

डीङ् - to fly

१. डयते, २. डीयते, ३. डयिष्यते,

४. डयितव्यम्, डयनीयम् ५. डयितः - ता - तम् । ६. डयितवान् - वती, ७. डयमानः - ना, ८. डयित्वा, उड्डीय, ९. डयितुम्

णद् - to sound

१. नदति, २. नद्यते, ३. नदिष्यति,

४. नदितव्यम् - नदनीयम्, ५. नदितः - ता - तम् ६. नदितवान् - वती
७. नदन् - न्ती, ८. नदित्वा, सन्नद्य, ९. नदितुम्

३. प्रहेलिका

विराजराजपुत्रारेः यन्नाम चतुरक्षरम् ।
पूर्वार्धं तव वैरीणां परार्धं तव सङ्गरे ।।

May you have the latter half and your enemies the former half of the four lettered name of the enemy of the son of Virajaraja.

Answer - विः = bird विराजः = Garuda, the king of birds, विराजराजः = Vishnu, the master of Garuda, विराजराजपुत्रः = Vishnu's son - Manmatha, विराजराजपुत्रारिः = Manmatha's enemy - Lord Shiva, his four lettered name - मृत्युञ्जयः, its former half मृत्युः = death - for the enemies of the king, the latter half जयः = victory for the king.

४. सुभाषितम्

५. शास्त्राण्यधीत्यापि भवन्ति मूर्खाः
यस्तु क्रियावान् पुरुषः स विद्वान् ।
सुचिन्तितं चौषधमातुराणां
न नाममात्रेण करोत्यरोगम् ।।

पदविभागः

शास्त्राणि, अधीत्य, अपि, भवन्ति, मूर्खाः, यः, तु, क्रियावान्, पुरुषः, सः, विद्वान्, सुचिन्तितम्, च, औषधम्, आतुराणाम्, न, नाममात्रेण, करोति, अरोगम् ।

सन्धिः

शास्त्रणि + अधीत्य, अधीत्य + अपि, यः + तु, सः + विद्वान्, च + औषधम्, करोति + अरोगम् ।

तात्पर्यम्

A person though well versed in the various branches of study is still a fool, when he does not put it into practice. He who practises what he preaches, is a genuine scholar. A mere

mention of a good drug will not cure an ailing person. Only when it is taken will he be cured.

प्रतिपदार्थः

शास्त्राणि अधीत्य अपि मूर्खाः भवन्ति - Some are fools even after studying the (various) branches of science. यः पुरुषः क्रियावान् सः विद्वान् - He who puts the knowledge into practice is a scholar. सुचिन्तितम् औषधं नाममात्रेण आतुराणाम् अरोगं न करोति - A good drug cannot cure a person by just being mentioned.

६. आयत्यां गुणदोषज्ञः तदात्वे क्षिप्रनिश्चयः ।
अतीते कार्यशेषज्ञो विपदा नाभिभूयते ॥

पदविभागः

Write the पदविभाग by yourself.

सन्धिः

कार्यशेषज्ञः + विपदा, न + अभिभूयते

तात्पर्यम्

A person who knows the good and evil consequences of a task to be done and can take a quick decision on an urgent matter and knows what is still remaining of a task done, will never face any difficulty.

प्रतिपदार्थः

आयत्यां गुणदोषज्ञः - A person who knows the good and evil consequences of a task to be done, तदात्वे क्षिप्रनिश्चयः - who can take a quick decision on an urgent matter (and), अतीते कार्यशेषज्ञः - one who knows what is still remaining of a task done, विपदा नाभिभूयते - will never face any difficulty.

५. काव्यकथा

इन्द्रप्रस्थप्रयाणम्

श्रीकृष्णस्य वचनं श्रुत्वा बलरामः [a]स्वाभिप्रायं कथितवान् - "इदानीं जैत्रयात्रा[1] उचिता न तु यज्ञयात्रा । शिशुपालः केवलं लोकपीडको[b] न ।

---

a. स्व + अभिप्रायम्, b. पीडकः + न 1. conquest

तवापि[c] शत्रुः । पूर्वं सः रुक्मिणीं तव भार्याम् अपेक्षितवान् । सा न प्राप्ता । अतः कुपितः सः सदा [d]तवाहितमेव चिन्तयति । एवं बहुवारं[2] सः अपराधं कृतवान् । तस्य क्षमा [e]नोचिता । प्रथमं सः हन्तव्यः । युधिष्ठिरो[f] यागं करोतु अथवा त्यजतु । अस्माकं स्वार्थं वयं साधयाम[3]'' इति दृढं स्वाभिप्रायं प्रकाशितवान् । सभामन्दिरे प्रतिध्वनिः श्रुतः । [4]चित्रदेवताः[g] अपि बलरामस्य अभिप्रायम् एव उक्तवत्यः[5] इव ।

अनन्तरम् उद्धवः स्वमतं कथितवान् । ''केवलम् उत्साहो[h] न कार्यसाधकः । क्षमा अत्यन्तम् आवश्यकी । त्वरा[6] न कर्तव्या । अल्पस्य विषयस्य कृते बहु प्रयासो[i] नोचितः[j] । मूषकं[7] ग्रहीतुं पर्वतस्य खननमिव[8] । अपि च, शिशुपालस्य समीपे राजसमूहः अस्ति । अतः सः जेतुं[9] न सुलभः । किञ्च भवान् यागाय यदि न गच्छति तदा बन्धुद्रोहो[k] भवति । यागे एव युद्धावकाशो[l] भविष्यति । तत्रैव[m] शिशुपालो[n] हन्तव्यः[10] । पूर्वं भवान् शिशुपालस्य अम्बायै[11] एकं प्रतिज्ञावचनं दत्तवान् – 'शिशुपालस्य शतम् अपराधान् मृष्यामि'[12] इति । यदि ततः पूर्वं तस्य हननं[13] भविष्यति तर्हि तव प्रतिज्ञाभङ्गो[o] भविष्यति । अतः यागयात्रा उचिता । तदा कार्यद्वयमपि भविष्यति'' इति उद्धवः युक्तिवचनम् उक्तवान् ।

श्रीकृष्णः उद्धवस्य वचनेन [p]सन्तुष्टोऽभवत् । सः यज्ञयात्रां कर्तुं निश्चितवान् । इन्द्रप्रस्थं प्रति प्रयाणम् [14]आरब्धवान् च ।

प्रश्नाः

१. बलरामः श्रीकृष्णं किम् उक्तवान् ?
२. कुत्र युद्धावकाशः भविष्यति इति उद्धवः उक्तवान् ?
३. श्रीकृष्णः किं प्रतिज्ञावचनं दत्तवान् आसीत् ?

---

c. तव + अपि, d. तव + अहितम्, e. न + उचिता, f. युधिष्ठिरः + यागम्, g. चित्रदेवताः + अपि, h. उत्साहः + न, i. प्रयासः + न, j. न + उचितः, k. बन्धुद्रोहः + भवति, l. युद्धावकाशः + भविष्यति, m. तत्र + एव, n. शिशुपालः + हन्तव्यः, o. प्रतिज्ञाभङ्गः + भविष्यति, p. सन्तुष्टः + अभवत्

---

2. a number of times, 3. achieve, 4. the goddesses in pictures, 5. were speaking as it were, 6. haste, 7.mouse, 8. like digging, 9. to win, 10. must be killed, 11. to mother, 12. I shall forgive, 13. killing, 14. began.

४. श्रीकृष्णः केन सन्तुष्टः जातः ?
५. श्रीकृष्णः किं कर्तुं निश्चितवान् ?

६. अन्वयरचना

४. धृष्टकेतुश्चेकितानः काशीराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥

पदविभागः

धृष्टकेतुः, चेकितानः, काशीराजः, च, वीर्यवान्, पुरुजित्, कुन्तिभोजः च, शैब्यः, च, नरपुङ्गवः

सन्धिः

धृष्टकेतुः + चेकितानः, काशीराजः + च, कुन्तिभोजः + च, शैब्यः + च

तात्पर्यम्

In the army of the Pandavas there are Dhrishtaketu, Chekitana, the valorous Kashiraja, Purujit, Kuntibhoja and the great Shaibya.

वाक्यविश्लेषणम्

* क्रियापदम् - (अस्ति)अध्याहृतम् - The verb has been supplied
* प्रथमाविभक्तिः - धृष्टकेतुः, चेकितानः, काशीराजः वीर्यवान्, पुरुजित्, कुन्तिभोजः शैब्यः नरपुङ्गवः
* अव्ययम् - च, च, च

The word वीर्यवान् is an adjective of काशीराजः । नरपुङ्गवः is an adjective of शैब्यः । One 'च' is a conjunction. The other two 'च's are पादपूरणार्थकौ । Therefore they are not taken in अन्वयरचना ।

अन्वयरचना

(अस्ति) - *क्रियापदम्* (अध्याहृतम्)
कः अस्ति ? - धृष्टकेतुः
पुनः कः अस्ति ? - चेकितानः
पुनः कः अस्ति ? - काशीराजः
कीदृशः काशीराजः ? - वीर्यवान्
पुनः कः अस्ति ? - पुरुजित्

पुनः कः अस्ति ? - कुन्तिभोजः
पुनः कः अस्ति ? - शैब्यः च
कीदृशः शैब्यः ? - नरपुङ्गवः

५. युधामन्युश्च विक्रान्तः उत्तमौजाश्च वीर्यवान् ।
सौभद्रो ◆द्रौपदेयाश्च सर्व एव महारथाः ॥

पदविभागः

युधामन्युः, च, विक्रान्तः, उत्तमौजाः, च, वीर्यवान्, सौभद्रः, द्रौपदेयाः, च, सर्वे, एव, महारथाः.

सन्धिः

युधामन्युः + च, उत्तमौजाः + च, सौभद्रः + द्रौपदेयाः + च विसर्गसन्धिः । सर्वे + एव

तात्पर्यम्

In this army there are Yudhamanyu of great prowess, the valourous Uttamauja, Abhimanyu the son of Subhadra, and the sons of Draupadi. All of them are महारथाः - great warriors.

एको दशसहस्राणि योधयेत् यस्तु धन्विनाम् ।
शस्त्रशास्त्रप्रवीणश्च विज्ञेयः स महारथः ॥

[*Maharatha is a warrior who is capable of combating ten thousand archers, all alone.*]

* क्रियापदम् - (अस्ति/सन्ति) - अध्याहृतम्
* प्रथमाविभक्तिः - *एकवचनम्* - युधामन्युः, विक्रान्तः, उत्तमौजाः, वीर्यवान्, सौभद्रः
  बहुवचनम् - द्रौपदेयाः, सर्वे, महारथाः
* Indeclinables - च, च, च, एव
* The indeclinable एव should go after सर्वे । As in the previous sloka one 'च' is a conjunction and the other two have no role to play in अन्वयरचना ।
* उत्तमौजाः is a सकारान्तपुंलिङ्गशब्दः ।

◆ *Prativindhya, Sutasoma, Shrutavarma, Shrutavirya and Shatanika were the sons of Draupadi by Yudhishthira and the other pandavas respectively.*

अन्वयरचना

(अस्ति)

कः अस्ति ? - युधामन्युः

कीदृशः युधामन्युः ? - विक्रान्तः

पुनः कः अस्ति ? - उत्तमौजाः

कीदृशः उत्तमौजाः ? - वीर्यवान्

पुनः कः अस्ति ? - सौभद्रः

(सन्ति)

के सन्ति ? - सर्वे एव

कीदृशाः सन्ति ? - महारथाः

पुनः के सन्ति ? - द्रौपदेयाः

(In this sloka both एकवचन and बहुवचन words are joined by the conjunction 'च' । Therefore the क्रियापदम् 'सन्ति' has been supplied. However, to elicit an एकवचनान्तपदम् the question should be 'कः अस्ति ?')

६. अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते ॥

पदविभागः

अस्माकम्, तु, विशिष्टाः, ये, तान्, निबोध, द्विजोत्तम, नायकाः, मम, सैन्यस्य, संज्ञार्थम्, तान्, ब्रवीमि, ते ।

सन्धिः

विशिष्टाः + ये, नायकाः + मम, अस्माकम् + तु, संज्ञार्थम् + तान्

तात्पर्यम्

Oh best of Brahmins (twice born) ! know the distinguished ones amongst ourselves, the leaders of my army. These I relate to you for your information.

वाक्यविश्लेषणम्

In this verse there are two sentences as there are two verbs निबोध and ब्रवीमि । द्विजोत्तम is an address.

१ . * क्रियापदम् - निबोध

* प्रथमा - ये, विशिष्टाः, नायकाः. * द्वितीया - तान्

* षष्ठी - अस्माकम् * अव्ययम् - तु

२. * क्रियापदम् - ब्रवीमि

* प्रथमा - (अहम्) * द्वितीया - (तान्)

* षष्ठी - ते, मम, सैन्यस्य. * अव्ययम् - संज्ञार्थम्

* In the first sentence the word अस्माकम् should be taken with नायकाः ।

* In the second sentence मम goes with सैन्यस्य and ते goes with संज्ञार्थम् ।

* द्विजोत्तम is an address. Hence in अन्वयरचना there is no question pertaining to this.

हे द्विजोत्तम !

निबोध - क्रियापदम्

कः निबोध ? - (त्वम्) - अध्याहृतम्

कान् निबोध ? - तान्

कीदृशान् तान् ? - ये नायकाः (सन्ति) तान्

कीदृशाः नायकाः ? - विशिष्टाः

केषां नायकाः ? - अस्माकम्

ब्रवीमि - क्रियापदम्

कः ब्रवीमि ? - (अहम्) - अध्याहृतम्

कान् ब्रवीमि ? - तान् (नायकान्)

कस्य नायकान् ? - सैन्यस्य

कस्य सैन्यस्य ? - मम

किमर्थं ब्रवीमि ? - संज्ञार्थम्

कस्य संज्ञार्थम् - ते

('ब्रवीमि' is a द्विकर्मकक्रियापदम् । - a verb having two objects. The complete sentence is - (अहं) (त्वां) तान् ब्रवीमि । त्वाम् and तान् are the two objects (कर्मपदे) of the verb ब्रवीमि । While तान् is found in the sloka त्वाम् is supplied (अध्याहृतम्). Therefore the latter is not taken in the अन्वयरचना । For greater clarity you may include त्वाम् also as कं ब्रवीमि ? (त्वां) ब्रवीमि ।)

७. सन्धयः

५. परसवर्णसन्धिः

Study the following sentences.

१. सः अधिकान् **अङ्कान्** प्राप्तवान् ।
२. वत्से ! दुरभिमानं **मुञ्च** ।
३. विनयः छात्रस्य **मण्डनम्** ।
४. **आनन्दः** परमं सुखम् ।
५. चोरदर्शनात् **कम्पः** उत्पन्नः ।
६. **अहङ्करोमि** एतत् कार्यम् ।
७. **वक्रञ्चलति** सः सर्पः ।
८. **तण्डमरुं** कः वादयति ?
९. सः धनं **सम्पादयति** ।
१०. तेन **सँल्लापः** क्रियते ।

The words in bold type above are split up thus -

१. अङ्कः = अं + कः
२. मुञ्च = मुं + च
३. मण्डनम् = मं + डनम्
४. आनन्दः = आनं + दः
५. कम्पः = कं + पः
६. अहङ्करोमि = अहं + करोमि ।
७. वक्रञ्चलति = वक्रं + चलति
८. तण्डमरुम् = तं + डमरुम्
९. सम्पादयति = सं + पादयति
१०. सँल्लापः = सं + लापः

These are examples of परसवर्णसन्धिः ।

Rule :

1. When an अनुस्वार is followed by any consonant other than श, ष, स and ह, it is replaced by the fifth letter of that वर्ग । When the अनुस्वार is at the end of a word (पदान्त) the sandhi is optional.

   In the examples 1, 6, 7, 8 and 9 above परसवर्णसन्धि is optional. Therefore अहङ्करोमि and अहं करोमि are two possible forms. Thus you have to understand in the other examples also.

2. When a पदान्ततवर्ग letter is followed by 'ल' a suitable लकार replaces the तवर्ग letter.

Eg. - तत् + लय = तल्लयः
विद्वान् + लिखति = विद्वाँल्लिखति

अभ्यासः

I. Split the Sandhis.

१. गङ्गा = ... + ...
२. अश्चलम् = ... + ...
३. अण्डम् = ... + ...
४. सन्तः = ... + ...
५. कम्पः = ... + ...
६. पुञ्जः = ... + ...
७. कण्टकम् = ... + ...
८. अन्धः = ... + ...
९. बन्धः = ... + ...
१०. शङ्खः = ... + ...

II. Join the following.

१. अं + बा = ... २. सं + धिः = ...
३. अं + कः = ... ४. चं + पूः = ...
५. भां + डारम् = ... ६. शुं + ठी = ...
७. शं + का = ... ८. अं + घ्रिः = ...
९. पं + क्तिः = ... १०. चं + डः = ...

III. In the examples below परसवर्णसन्धि is optional. Write the two forms as shown in the example.

उदा - त्वं + करोषि = त्वङ्करोषि / त्वं करोषि ।

१. धर्मं + चर = ... / ....
२. शं + करः = ... / ....
३. सं + बन्धः = ... / ....
४. सं + चयः = ... / ....
५. सं + पत्तिः = ... / ....
६. सं + घः = ... / ....
७. तं + टङ्कारम् = ... / ....

६. चर्त्वसन्धिः

Study the following examples.

१. रामायणम् **अनुष्टुप्छन्दसा** रचितम् अस्ति ।
२. **अस्मत्पत्रं** भवता प्राप्तं ननु ?
३. **एतादृक्कर्म** किमर्थं कृतम् ?
४. **सत्कीर्तिः** सम्पादनीया सर्वैः ।
५. मात्रा **षट्खाद्यानि** कृतानि अद्य ।
६. **विपत्कालं** कोऽपि न इच्छति ।
७. **परिषत्कार्यं** मया कृतम् ।

In the examples above the sandhi in the words in bold type is as follows.

१. अनुष्टुप्छन्दः = अनुष्टुब् + छन्दः (ब् + छ = प्)
२. अस्मत्पत्रम् = अस्मद् + पत्रम् (द् + प = त्)
३. एतादृक्कीर्तिः = एतादृग् + कीर्तिः (ग् + की = क्)
४. सत्कीर्तिः = सद् + कीर्तिः (द् + की = त्)
५. षट्खाद्यानि = षड् + खाद्यानि (ड् + खा = ट्)
६. विपत्कालः = विपद् + कालः (द् + का = त्)
७. परिषत्कार्यम् = परिषद् + कार्यम् (द् + का = त्)

Rule :

When a वर्गीयव्यञ्जनम् other than ङ, ञ, ण, न, म is followed by a कर्कशव्यञ्जनम् (the first two letters of each वर्ग and श,ष,स are कर्कशव्यञ्जनानि), in place of the former वर्गीयव्यञ्जनम् the first letter of the same वर्ग is substituted.

In a table the rule can be shown thus.

पूर्वः	*परः*	*आदेशः*
वर्गीयाणि व्यञ्जनानि (ङञणनमवर्णान् विहाय)	कर्कशव्यञ्जनानि	क, च, ट, त, प

अभ्यासः

IV. Split up the Sandhi.

१. षट्सप्ततिः = ... + ...

२. ऋत्विक्प्रमुखः = ... + ...
३. मधुलिट्पिबति = ... + ...
४. वणिक्प्रधानः = ... + ...
५. सकृत्प्रतिज्ञः = ... + ...
६. पतत्पर्णम् = ... + ...
७. परिव्राट्सङ्घः = ... + ...

II. Join the Sandhi and write which letter is replaced by which other letter as shown in the example.

उदा - आरभ् + स्यते = आरप्स्यते (भ् + स्य = प्)
१. भूभृद् + पतिः = ... (...... + ... = ...)
२. तद् + पार्श्वम् =.............. (...... + ... = ...)
३. उद् + कर्णः = ... (...... + ... = ...)
४. शरद् + कालः = ... (...... + ... = ...)
५. षड् + कर्माणि = ... (...... + ... = ...)
६. स्वपद् + पुत्रः = ... (...... + ... = ...)
७. रटद् + काकः .... (...... + ...= ......)

८. लौकिकन्यायाः

5. **अन्धपङ्गुन्यायः** – अन्धः means a blind man. पङ्गुः is a lame person. A blind man and a lame man want to go to a different place. Together they think of a way to accomplish this. The blind man carries the lame on his shoulder and starts walking. The lame person guides the blind telling him of humps and pot holes on the way. Thus by mutual co-operation they reach their destination. This maxim is quoted when two persons having complementary qualities work in co-ordination to achieve a goal.

6. **वृद्धकुमारीवाक्यन्यायः** - There was an aged spinster (वृद्ध-कुमारी) । Once Devendra (king of Gods) was pleased with her and he offered her a boon. She asked a boon thus - 'My children must eat plenty of ghee and milk from a gold plate'. In a single sentence/boon she was able to get so many of her desires fulfilled. First of all to get married she had to

become young. Then she had to bear many children. She had to have cows and lot of grains always. Thus the clever old lady spoke one sentence with a lot of implied meaning. When an expression is capable of yielding many meanings this maxim is quoted.

१. सङ्ग्राह्यविषयाः

अ) Slokas to be recited early in the morning.

ब्रह्मा मुरारिस्त्रिपुरान्तकश्च
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
कुर्वन्तु सर्वे मम सुप्रभातम् ॥

Let Brahma, Vishnu, Maheshwara, Surya, Chandra, Mangala, Budha, Guru, Shukra, Shani, Rahu and Ketu make my day a good one.

While bathing -

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

Oh Ganga !, Yamuna!, Godavari !, Saraswati !, Narmada !, Sindhu !, and Kaveri !, come and reside in this water.

आ) In the past our country was very vast. We may call it सांस्कृतिकभारतम् । The following regions were part of भारतम् ।

- Pakisthan
- Bangladesh
- Nepal
- Tibet
- Srilanka
- Myanmar
- Combodia
- Java
- Malaya
- Indonesia

शिक्षा - तृतीयः पाठः

प्रश्नाः

I. *आवरणे दत्तस्य क्रियापदस्य उचितं शत्रन्तरूपं रिक्तस्थाने लिखत ।*

उदा - गच्छत् यानम् (न) (गच्छति)

१. ...... पर्णम् (न)(पतति) २. ...... बालकम् (पु)(धावति)

३. ...... रक्तम् (न)(स्रवत्) ४. ...... पुस्तकम् (न)(नश्यति)

५. ...... भक्तम् (पुं)(जपति) ६. ......कमलम्(न)(विकसति)

७. ..... नक्षत्रम् (न)(स्फुरति) ८. .....शिक्षकम् (पुं)(पाठयति)

९. ..... वस्त्रम् (न)(जीर्णीभवति) १०. ....यन्त्रम्(न)(चलति)

II. *रेखाङ्कितस्य शत्रन्तरूपस्य लिङ्गं विभक्तिं च निर्दिशत ।*

उदा - पठन् बालकः निद्राति । (पुं - प्रथमा)

१. गच्छन्तं बालकं पश्य । (...........)

२. गच्छत् यानं पश्य । (...........)

३. नश्यत् वस्त्रं त्यज । (...........)

४. नश्यन्तं ग्रन्थं समीकारय । (...........)

५. नश्यत् यन्त्रं न क्रेतव्यम् । (...........)

६. विकसत् पुष्पम् उद्याने शोभते । (...........)

III. *संस्कृतेन उत्तरयत ।*

१. विराजः कः ? विराजराजश्च कः ?

२. विद्वान् पुरुषः कः ?

३. किं नाममात्रेण अरोगं न करोति ?

४. अतीते किं ज्ञातव्यम् ?

५. यस्य पादद्वयं न भवति सः कः ?

(**Note:** Answers for the above exercises are given in the end of this book. **(P.No. - 231)** After completing them, check your answers.)

शिक्षा - चतुर्थः पाठः

।। अप्रकटीकृतशक्तिः शक्तोऽपि जनस्तिरस्क्रियां लभते ।।

Though capable, a man is not taken seriously when he doesn't exhibit his potential.

१. कृदन्ताः

अ) शतृ (पुं / नपुं) - तृतीया

१. सन्मार्गे **गच्छता** भवता सर्वं साध्यते ।
२. धर्मं **त्यजता** त्वया किम् आर्जितम्[1]?
३. जातीपुष्पं **जिघ्रता**[2] तेन आनन्दः अनुभूतः ।
४. **गर्जता** व्याघ्रेण इतस्ततः परिभ्रान्तम् ।
५. प्रतिदिनं भगवद्गीतां **पठता** छात्रेण श्लोकाः कण्ठस्थीकृताः ।
६. गृहं **रक्षता** शुनकेन उच्चैः भषितम्[3] ।
७. उत्तरं **लिखता** छात्रेण विषयाः पुनः पुनः स्मृताः ।
८. **पतता** शिशुना उच्चैः रुदितम्[4] ।
९. गानं **शृण्वता** तेन निद्रा कृता ।
१०. द्वारे **तिष्ठता** सेवकेन अन्तः प्रवेशः [5]निवारितः ।
११. **क्रीडद्भिः** बालैः महान् कोलाहलः कृतः ।
१२. सुरां **पिबद्भिः** जनैः [6]नियुद्धं कृतम् ।
१३. वसन्ते **कूजद्भिः** कोकिलैः[7] वनं व्यापृतम् ।

---

1. was earned 2. one who is sniffing (smelling) 3. barked (भावे) 4. cried (भावे) 5. prohibited 6. fight on ground 7. by cuckoos

१४. **निन्दद्भिः** जनैः अन्यस्य दोषाः एव [8]अवलोक्यन्ते ।
१५. चित्रं **पश्यद्भिः** जनैः चित्रस्य दोषाः चर्चिताः ।
१६. प्रश्नं **पृच्छद्भिः** छात्रैः [9]उत्थितम् ।
१७. सः **लिखद्भिः** लेखकैः सह सम्भाषणं करोति ।
१८. [10]**जानद्भिः** अपि जनैः नियमः न अनुपालितः[11] ।
१९. कार्यं **कुर्वद्भिः** मनुष्यैः सन्तोषः अनुभूयते ।
२०. **नमद्भिः**[12] भक्तैः देवः स्तुतः ।

आ) शतृ (पुं/नपुं) - चतुर्थी, पञ्चमी, षष्ठी, सप्तमी च

१. **धावते** बालकाय लेखनीं देहि ।
२. पक्षपातं **कुर्वते** तस्मै एषा कुप्यति ।
३. **पठद्भ्यः** छात्रेभ्यः अलसाः असूयन्ति ।
४. **क्रीडद्भ्यः** बालकेभ्यः पाठः न रोचते ।
५. वेगेन **आगच्छतः** यानात् मम भीतिः ।
६. **उद्गच्छतः**[13] कोपात् सः कम्पते ।
७. अरण्ये सम्मुखम् **आगच्छद्भ्यः** व्याघ्रेभ्यः हरिणाः भीताः ।
८. रात्रौ रक्षणं **कुर्वद्भ्यः** [14]यामिकेभ्यः चोराः बिभ्यति[15] ।
९. **विकसतः** पुष्पस्य सौन्दर्यम् अपूर्वम् ।
१०. युद्धं **कुर्वतः** रामस्य पराक्रमं देवाः श्लाघितवन्तः ।
११. स्पर्धार्थं **गच्छताम्** एतेषां जयः निश्चितः ।
१२. देशरक्षणार्थं युद्धं **कुर्वतां** सैनिकानां देशभक्तिः श्लाघनीया ।
१३. धनम् **अपहरति**[16] चोरे आरक्षकस्य दृष्टिः पतिता ।
१४. अकार्यं **कुर्वति** तस्मिन् विवेकः सर्वथा नास्ति ।
१५. **गच्छति** तस्मिन् याने ५० जनाः सन्ति ।
१६. पाठं **पठत्सु** बालकेषु गोविन्दः प्रथमं स्थानं प्राप्नुयात् ।
१७. तपः **आचरत्सु** भक्तेषु भगवता कृपा प्रदर्शिता ।
१८. व्यर्थं समयं **यापयत्सु**[17] एतेषु कस्यापि कार्यश्रद्धा नास्ति ।

---

8. are seen 9. got up (भावे) 10. by (those) knowing 11. not obeyed. 12. by (those) saluting 13. rising 14. night watchmen 15. are scared 16. (one who was) stealing 17. (those who are) spending.

Note :

1. In the previous lesson it was stated that from तृतीयाविभक्ति to सप्तमीविभक्ति the शत्रन्त forms of पुंलिङ्ग and नपुंसकलिङ्ग are the same. Therefore both masculine and neuter forms are given in the sentences above.

   According to the rule of विशेषणम् and विशेष्यम् the forms are as under. Eg. - गच्छता भवता, क्रीडद्भिः बालैः, धावते बालकाय, पठद्भ्यः छात्रेभ्यः, उद्गच्छतः कोपात् ... etc.
2. The शत्रन्त forms of पुंलिङ्ग and नपुंसकलिङ्ग in all the seven cases are as follows.

१. तकारान्तः पुंलिङ्गः 'पठत्' शब्दः

	ए.व.	*द्वि.व.*	*ब.व.*
प्र. वि.	पठन्	पठन्तौ	पठन्तः
द्वि. वि.	पठन्तम्	पठन्तौ	पठतः
तृ. वि.	पठता	पठद्भ्याम्	पठद्भिः
च. वि.	पठते	पठद्भ्याम्	पठद्भ्यः
प. वि.	पठतः	पठद्भ्याम्	पठद्भ्यः
ष. वि.	पठतः	पठतोः	पठताम्
स. वि.	पठति	पठतोः	पठत्सु
सम्बो. प्र.	हे पठन्	हे पठन्तौ	हे पठन्तः

२. तकारान्तः नपुंसकलिङ्गः 'पठत्' शब्दः

प्र. वि.	पठत्	पठन्ती	पठन्ति
सं. प्र	हे पठत्	हे पठन्ती	हे पठन्ति
द्वि. वि.	पठत्	पठन्ती	पठन्ति

(The rest of the forms are as in पुंलिङ्गम्)

The participles लिखत् (लिखन्, लिखत्), गच्छत्, (गच्छन्, गच्छत्) etc. are declined similarly.

अभ्यासः

I. *अधस्तनशब्दानां सूचितानि विभक्तिरूपाणि एकवचनान्तानि लिखत ।*

उदा - श्रृण्वन् निर्देशकः - तृतीया - <u>श्रृण्वता निर्देशकेन</u>

१. पतन् रजकः - पञ्चमी ....
२. चिन्तयन् विमर्शकः - तृतीया ....
३. विकसत् पुष्पम् - षष्ठी ....
४. कुर्वन् सेवकः - चतुर्थी ....
५. पश्यन् पितामहः - सप्तमी ....
६. उद्गच्छत् क्षीरम् - षष्ठी ....
७. वहन् वायुः - पञ्चमी ....
८. कर्तयन् सौचिकः - सप्तमी ....
९. पृच्छत् मित्रम् - चतुर्थी ....
१०. ताडयन् दुष्टः - तृतीया ....
११. गायन् गायकः - सम्बो. प्र ....
१२. पिबन् मुकुन्दः - सम्बो. प्र ....

II. *अधोनिर्दिष्टानां शब्दानां बहुवचनान्तरूपाणि लिखत ।*

उदा - मिलता मित्रेण - मिलद्भिः मित्रैः

१. खादते युवकाय ....
२. तिष्ठतः भटस्य ....
३. लिखता छात्रेण ....
४. चालयति जने ....
५. धावति वृद्धे ....
६. लिखते लिपिकाराय ....
७. पतता वानरेण ....
८. अभिनयतः नटात् ....
९. आचरते मुनये ....
१०. हे रुदन् बाल ....

III. *अधः कर्तरिप्रयोगे वाक्यानि सन्ति । तेषां कर्मणि/भावे-प्रयोगरूपं लिखत ।*

उदा - सन्मार्गे गच्छन् जनः सर्वं साधितवान् ।
सन्मार्गे गच्छता जनेन सर्वं साधितम् ।

१. निद्रां कुर्वन् सः स्वप्नं दृष्टवान् ।

.... ।

२. द्वारे तिष्ठन्तः रक्षकाः प्रवेशं निवारितवन्तः ।

.... ।

३. विकसत् पुष्पम् अधः पतितवत् ।

.... ।

४. जनानाम् अज्ञानं जानन् ज्ञानी मौनेन स्थितवान् ।

.... ।

५. युद्धं कुर्वन्तः सैनिकाः वीरस्वर्गं प्राप्तवन्तः ।

.... ।

६. वस्त्रं धरन् सन्दीपः पानीयं पातितवान् ।

.... ।

७. उत्तरं चिन्तयन् प्रवीणः पुस्तकम् अन्विष्टवान् ।

.... ।

८. जलं नयन् श्रीधरः दूरदर्शनं दृष्टवान् ।

.... ।

IV. *आवरणे दत्तानां शब्दानाम् उचितैः रूपैः रिक्तस्थानानि पूरयत ।*

उदा - चर्चां कुर्वतां शिक्षकाणां नामानि न जानामि । (कुर्वन्तः)

१. वृक्षात् .... नारिकेलेभ्यः दूरं गच्छ । (पतन्ति)

२. प्रशस्तिं ....बालाय ते धनं दत्तवन्तः । (प्राप्नुवन्)

३. भगवद्गीतां ....भक्तेन आनन्दः अनुभूतः । (शृण्वन्)

४. .... बालकेषु सत्यनारायणः उन्नतः । (पठन्तः)

५. तत्र............ छात्रस्य पिता नटराजः । (नृत्यन्)

६. आतपे .... युवकेभ्यः शीतलपेयं रोचते । (क्रीडन्तः)

७. विदेशतः .... भारतीयैः भारतदेशः श्रद्धया नमस्कृतः । (आगच्छन्तः)

८. उपरिष्टात् .... शिलाखण्डात् जनाः भीताः । (पतन्)

९. .... कर्मकराणां श्रद्धां पश्य । (खनन्तः)

१०. करुणां .... शम्भौ भक्तिः कर्तव्या । (प्रदर्शयन्)

(**Note :** Compare your answers with those on the end of this book **(P.No. - 232)** and ascertain their correctness.)

२. पदसङ्ग्रहः

णश – to get destroyed or lost / perish

१. नश्यति, २. नश्यते, ३. नशिष्यति - नंक्ष्यति,
४. नशितव्यम् - नष्टव्यम्, नशनीयम्, ५. नष्टः - नष्टा - नष्टम्, ६. नष्टवान् - नष्टवती, ७. नश्यन् - नश्यन्ती, ८. नशित्वा - नंष्ट्वा - नष्ट्वा, प्रणश्य, ९. नशितुम् - नंष्टुम् ।

णुद – to nudge / prompt

१. नुदति, २. नुद्यते, ३. नोत्स्यति,
४. नोत्तव्यम् - नोदनीयम्, ५. नुत्तः - नुत्ता - नुत्तम्, नुन्नः - नुन्ना - नुन्नम्, ६. नुत्तवान् - वती, नुन्नवान् - वती, ७. नुदन् - नुदन्ती, नुदती, ८. नुत्वा - प्रणुद्य, ९. नोत्तुम् ।

तनु – to spread

१. तनोति, २. तन्यते - तायते, ३. तनिष्यति,
४. तनितव्यम् - तननीयम्, ५. ततः - तता - ततम्, ६. ततवान् -ततवती, ७. तन्वन् - तन्वती, ८. तनित्वा - तत्त्वा, वितत्य, ९. तनितुम् ।

तप – to scorch / burn

१. तपति, २. तप्यते, ३. तप्स्यति
४. तप्तव्यम् - तपनीयम्, ५. तप्तः, तप्ता, तप्तम्, ६. तप्तवान् - तप्तवती, ७. तपन् - तपन्ती, ८. तप्त्वा - प्रतप्य, ९. तप्तुम् ।

त्यज् – to leave / abandon / sacrifice

१. त्यजति, २. त्यज्यते, ३. त्यक्ष्यति,
४. त्यक्तव्यम् - त्यजनीयम्, ५. त्यक्तः - त्यक्ता - त्यक्तम्, ६. त्यक्तवान् - त्यक्तवती, ७. त्यजन् - त्यजन्ती, ८. त्यक्त्वा - परित्यज्य, ९. त्यक्तुम् ।

३. प्रहेलिका

प्रायेण नीचलोकस्य कः करोतीह गर्वताम् ।
आदौ वर्णद्वयं दत्त्वा ब्रूहि के वनवासिनः ।।

Generally what causes haughtiness in inferior men ? when two

letters are added in the beginning of this word it means forest dwellers. What is it ?

Answer – राः = Wealth

If श and ब are added in the beginning it is शबराः – hunters.

४. सुभाषितम्

७. यः प्रीणयेत्सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यत्
एतत्त्रयं जगति पुण्यकृतो लभन्ते ।।

पदविभागः

यः, प्रीणयेत्, सुचरितैः, पितरम्, सः, पुत्रः, यत्, भर्तुः, एव, हितम्, इच्छति, तत्, कलत्रम्, तत्, मित्रम्, आपदि, सुखे, च, समक्रियम्, यत्, एतत्, त्रयम्, जगति, पुण्यकृतः, लभन्ते ।।

सन्धिः

स : + पुत्रः, यत् + भर्तुः, भर्तुः + एव, तत् + मित्रम्, पुण्यकृतः + लभन्ते ।

तात्पर्यम्

A good son pleases his father with his good behaviour. A devoted wife always wishes for the good of her husband. A true friend is the same in adversity as in prosperity. In this world fortunate people get all these three.

प्रतिपदार्थः

सः – He, यः – who, प्रीणयेत् – pleases, पितरं – his father, सुचरितैः – with his good conduct, पुत्रः – is a true son. तत् – She, यत् – who, इच्छति – wishes, हितम् एव - only the good, भर्तुः – of her husband, *कलत्रम् – is a (true) wife. तत् – He, यत् who, समक्रियम् – behaves the same way , आपदि – in adversity, सुखे च - and in prosperity, *मित्रम् – is a (true) friend. जगति – In this

---

* कलत्रम् and * मित्रम् are two words in neuter gender meaning wife and friend respectively.

world, पुण्यकृतः - fortunate ones, लभन्ते - get, एतत् त्रयम् - all these three.

८. प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ।।

पदविभागः

प्रदानम्, प्रच्छन्नम्, गृहम्, उपगते, सम्भ्रमविधिः, प्रियम्, कृत्वा, मौनम्, सदसि, कथनम्, च, अपि, उपकृतेः, अनुत्सेकः, लक्ष्म्याम्, निरभिभवसाराः, परकथाः, सताम्, केन, उद्दिष्टम्, विषमम्, असिधाराव्रतम्, इदम् ।।

सन्धिः

च + अपि + उपकृतेः, अनुत्सेकः + लक्ष्म्याम्, केन + उद्दिष्टम्

तात्पर्यम्

Giving charity without making it known, extending hospitality to guests when they arrive, doing favours and not talking about it, praising others openly for the favours they have done, not being haughty about wealth and never criticizing others while talking about them. Who has prescribed this discipline to noble men which is like walking on knife's edge ? (These are virtues that are naturally found in the wise only.)

अन्वयः -

प्रच्छन्नं प्रदानं, गृहम् उपगते सम्भ्रमविधिः, प्रियं कृत्वा मौनं, सदसि उपकृतेः कथनं च, लक्ष्म्याम् अनुत्सेकः, परकथाः निरभिभवसाराः, विषमम् इदम् असिधाराव्रतं सतां केन उद्दिष्टम् ?

प्रतिपदार्थः

प्रच्छन्नं प्रदानम् - Donating anonymously, गृहम् उपगते सम्भ्रमविधिः - looking after guests who come home, with great pleasure, प्रियं कृत्वा मौनम् - to be silent after doing a favour, सदसि च उपकृतेः कथनम् -२ acknowledging service given by someone publicly,

लक्ष्म्याम् अनुत्सेकः - be discrete about your wealth, निरभिभव-साराः परकथाः - talking about others without evil intentions, इदं विषमम् असिधाराव्रतम् - this exceedingly difficult task is like walking on knife's edge सतां केन उपदिष्टम् ? - who taught this to the pious ?

५. काव्यकथा

प्रयाणवर्णनम्

श्रीकृष्णः राजसूययागाय इन्द्रप्रस्थं गन्तुं निश्चितवान् । प्रयाणम् आरब्धम् । श्रीकृष्णेन सह सर्वे यादवाः, [a]परिजनाः, अन्तःपुरस्त्रियश्च[1] प्रस्थिताः । द्वारकानगरात् श्रीकृष्णस्य प्रयाणम् । तन्नगरं[2] मनोहरम् । नगरस्य मार्गेषु रत्नानां राशिरेवासीत्[3] । द्वारकानगरं समुद्रतीरेऽस्ति[4] । समुद्र-तीरमार्गेण श्रीकृष्णस्य प्रयाणम् । ततस्ते[5] सर्वेऽपि[6] रैवतकपर्वतस्य समीपम् आगतवन्तः । स पर्वतोऽपि[7] रमणीय[8] एव । पर्वतस्य सौन्दर्यं पश्यन्तस्ते[9] सर्वेऽपि[10] तत्रैव[11] जलक्रीडासु मग्ना[12] अभवन् । ततः सर्वे ते प्रयाणं कुर्वन्तो[13] यमुनानदीसमीपम् अगच्छन् । यमुनां तीर्त्वा[b] ते इन्द्रप्रस्थात् बहिरागताः[14] ।।

श्रीकृष्णस्यागमनवृत्तान्तः[15] राजधान्यां प्रसृतः[c] । युधिष्ठिरो[16] महान्तम् आनन्दम् अनुभूतवान् । परिवारसहितस्य श्रीकृष्णस्य स्वागताय स[17] राजा अनुजैः सह सहसा[d] प्रस्थितः[e] । इन्द्रप्रस्थनगरस्य बहिर्भागे श्रीकृष्णपरिवारः युधिष्ठिरपरिवारश्च[18] अमिलत् । श्रीकृष्णो [19]रथादवतीर्य[f] युधिष्ठिरं

---

1. अन्तःपुरस्त्रियः + च 2. तत् + नगरम्, 3. राशिः + एव + आसीत्, 4. समुद्रतीरे + अस्ति, 5. ततः + ते, 6. सर्वे + अपि, 7. सः + पर्वतः + अपि, 8. रमणीयः + एव, 9. पश्यन्तः + ते, 10. सर्वे + अपि, 11. तत्र + एव, 12. मग्नाः + अभवन्, 13. कुर्वन्तः + यमुनानदीसमीपम्, 14. बहिः + आगताः. 15. श्रीकृष्णस्य + आगमनवृत्तान्तः, 16. युधिष्ठिरः + महान्तम्, 17. सः + राजा, 18. परिवारः + च, 19. श्रीकृष्णः + रथात् + अवतीर्य,

---

a. attendents, b. having crossed, c. spread, d. at once, e. left for, f. having climbed down,

नमस्कृतवान् । युधिष्ठिरोऽपि[20] श्रीकृष्णं [21]प्रीत्यालिङ्गितवान्[g] । ततः सर्वेऽपि[22] यागमण्डपं प्रति प्रस्थिताः ।

प्रश्नाः

१. श्रीकृष्णेन सह के प्रस्थिताः ?
२. रत्नानां राशिः कुत्र आसीत् ?
३. द्वारकानगरं कुत्र अस्ति ?
४. युधिष्ठिरः किमर्थं महान्तम् आनन्दम् अनुभूतवान् ?
५. इन्द्रप्रस्थस्य बहिर्भागे कौ परिवारौ मिलितौ ?

६. अन्वयरचना

७. भवान् भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिर्जयद्रथः ।।

पदविभागः

भवान्, भीष्मः, च, कर्णः, च, कृपः, च, समितिञ्जयः, अश्वत्थामा, विकर्णः, च, सौमदत्तिः, जयद्रथः ।

सन्धिः

भीष्मः + च, कर्णः + च, कृपः + च, विकर्णः + च, सौमदत्तिः + जयद्रथः

तात्पर्यम्

Duryodhana tells the names of the warriors on his own side to his preceptor Drona. You, Bhishma, Karna, Kripa, the victorious in battles, Ashwatthama, Vikarna, Somadatta's son and Jayadratha are there (in my army).

वाक्यविश्लेषणम्

Barring the four 'च' s all other words are in प्रथमाविभक्तिः ।

अन्वयरचना

In the previous verse Duryodhana says 'ये सन्ति तान् ब्रवीमि ।' Therefore, the verb 'अस्ति' should be supplied here.

---

20. युधिष्ठिरः + अपि, 21. प्रीत्या + आलिङ्गितवान्, 22. सर्वे + अपि

---

g. embraced.

अस्ति - क्रियापदम् (अध्याहृतम्)
कः अस्ति ? - भवान्
पुनः कः अस्ति ? - भीष्मः
पुनः कः अस्ति ? - कर्णः
पुनः कः अस्ति ? - कृपः
कीदृशः कृपः ? - समितिञ्जयः
पुनः कः अस्ति ? - अश्वत्थामा
पुनः कः अस्ति ? - विकर्णः
पुनः कः अस्ति ? - सौमदत्तिः
पुनः कः अस्ति ? - जयद्रथः

८. अन्ये च बहवः शूराः मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥

पदविभागः

All are single words in this verse.

सन्धिः

There are no sandhis in this sloka.

तात्पर्यम्

There are many more brave men who have given up their lives (who are prepared to sacrifice themselves) for my sake in this army . They are armed with many weapons and are all experts in warfare.

वाक्यविश्लेषणम्

* प्रथमाबहुवचनम् - अन्ये, बहवः, शूराः, त्यक्तजीविताः, नानाशस्त्रप्रहरणाः, सर्वे, युद्धविशारदाः
* सप्तमी - मदर्थे
* अव्ययम् - च

अन्वयरचना

We must supply the verb सन्ति twice for अन्वयरचना of this sloka. Accordingly, there are two sentences here.

(सन्ति) - क्रियापदम् (अध्याहृतम्)

के सन्ति ? - अन्ये बहवः
कीदृशाः अन्ये ? - शूराः
पुनः कीदृशाः ? - त्यक्तजीविताः
कस्यार्थे त्यक्तजीविताः ? - मदर्थे

(सन्ति) - क्रियापदम् (अध्याहृतम्)
के सन्ति ? - सर्वे
कीदृशाः सर्वे ? - नानाशस्त्रप्रहरणाः
पुनः कीदृशाः ? - युद्धविशारदाः

९. अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥

पदविभागः

अपर्याप्तम्, तत्, अस्माकम्, बलम्, भीष्माभिरक्षितम् । पर्याप्तम्, तु, इदम्, एतेषाम्, बलम्, भीमाभिरक्षितम् ।

सन्धिः

तत् + अस्माकम्, भीष्म + अभिरक्षितम्, तु + इदम्, भीम + अभिरक्षितम्

तात्पर्यम्

This army of ours, protected by the commander-in-chief Bhishma is huge (limitless). The army of these (our enemies) protected by Bhima is small (limited).

(There were eleven Akshauhinis in the Kaurava army and seven in that of the Pandavas. Hence Duryodhana thinks that their army is much bigger compared to that of the Pandavas. However, commentators have interpreted the terms पर्याप्तम् and अपर्याप्तम् to mean sufficient/capable of and insufficient/incapable of. Their intention is that Duryodhana feels diffident that his army, although bigger in numbers, is no match for the much smaller Pandava army)

वाक्यविश्लेषणम्

There are two sentences in this sloka. For both the verb '**अस्ति**' is to be supplied.

		१	२
क्रियापदम्	-	(अस्ति)	(अस्ति)
प्रथमा	-	अपर्याप्तम्, तत् बलम् भीष्माभिरक्षितम्	पर्याप्तम्, इदम् बलम् भीमाभिरक्षितम्
षष्ठी	-	अस्माकम्	एतेषाम्
अव्ययम्	-	तु	

अन्वयरचना

(अस्ति) किम् अस्ति ? - तत् बलम्
कीदृशम् अस्ति ? - अपर्याप्तम्
कीदृशं बलम् ? - भीष्माभिरक्षितम्
केषां बलम् ? - अस्माकम्

(अस्ति) किम् अस्ति ? - इदं बलम्
कीदृशम् अस्ति ? - पर्याप्तम्
कीदृशं बलम् ? - भीमाभिरक्षितम्
केषां बलम् ? - एतेषाम्

७. सन्धयः

७. अनुनासिकसन्धिः

Study the following sentence.

१. **जगन्नाथस्य** मन्दिरं पुर्याम् अस्ति ।
२. **षण्मुखः** शिवस्य पुत्रः ।
३. **दिङ्नागाः** नाम दिग्गजाः ।
४. सर्पः **त्वङ्मोचनं** करोति ।
५. **मन्निवासः** इतः अतिनिकटे एव अस्ति ।
६. **बृहन्नगरम्** एतत् ।

७. यत् भवता उक्तं **तन्न** रोचते मह्यम् ।
८. दुर्गतानाम् **उन्नयनम्** अस्माकं कर्तव्यम् ।
९. **संस्कृतवाङ्मयं** बहुविस्तृतम् अस्ति ।
१०. **'तन्नाम'** इति पदं तेन बहुधा प्रयुज्यते ।

The Sandhi words printed in bold above are split up as follows.

१. जगन्नाथः = जगत् + नाथः (**त्** + ना = न्)
२. षण्मुखः = षट् + मुखः (**ट्** + मु = ण्)
३. दिङ्नागः = दिक् + नागः (**क्** + ना = ङ्)
४. त्वङ्मोचनम् = त्वक् + मोचनम् (**क्** + मो = ङ्)
५. मन्निवासः = मत् + निवासः (**त्** + नि = न्)
६. बृहन्नगरम् = बृहत् + नगरम् (**त्** + न = न्)
७. तन्न = तत् + न (**त्** + न = न्)
८. उन्नयनम् = उत् + नयनम् (**त्** + न = न्)
९. वाङ्मयम् = वाक् + मयम् (**क्** + म = ङ्)
१०. तन्नाम = तत् + नाम (**त्** + न = न्)

These are examples of अनुनासिकसन्धिः ।

RULE : When a classified consonant (वर्गीयव्यञ्जनम्) is followed by the fifth letter of any वर्ग, it is replaced by the fifth letter of the respective वर्ग । This sandhi is optional when it is between two different words. However, when it is between a प्रकृति and a प्रत्यय that begins with an अनुनासिकवर्ण, the sandhi is compulsory.

उदा - वाक् + मूलम् = वाङ्मूलम् / वाग्मूलम्
तद् + मात्रम् = तन्मात्रम् (मात्रम् is a suffix that begins with an अनुनासिकवर्ण 'म्' । So the sandhi is compulsory here.)

अभ्यासः

I. Split the following.

१. त्वन्निवासः = ... + ...
२. सन्नमनम् = ... + ...

३. षण्णामानि = ... + ...
४. जगन्नियामकः = ... + ...
५. तन्निराकरणम् = ... + ...
६. विपन्निवेदनम् = ... + ...
७. बृहन्निःश्रेणी = ... + ...
८. मन्नाम = ... + ...
९. महन्नक्षत्रम् = ... + ...
१०. तस्मान्नरकात् = ... + ...

II. Join the Sandhi.

१. सकृत् + निवेदनम् = ...
२. तत् + निमित्तम् = ...
३. सम्राट् + नयति = ...
४. यत् + मण्डलम् = ...
५. दिक् + मूढः = ...
६. सम्पत् + मान्यता = ...
७. विराट् + नगरी = ...
८. सुहृत् + नाम = ...
९. एतत् + नश्वरम् = ...
१०. तस्मात् + नीडात् = ...

८. ङमुडागमसन्धिः

Study the following sentences.

१. **सर्वस्मिन्नपि** देवः अस्ति ।
२. बालकः **रुदन्नागतः** ।
३. **अस्मिन्नौषधे** उत्तमगुणाः सन्ति ।
४. भवान् कुत्र **गच्छन्नस्ति** ?
५. **एतस्मिन्नेव** मार्गे तस्य गृहम् अस्ति ।
६. सः **हसन्नवदत्** ।
७. सः सम्भाषणं **कुर्वन्नेव** प्राणान् अत्यजत् ।
८. ते **अगच्छन्निति** केन उक्तम् ?

९. **तस्मिन्नविश्वासः** मास्तु भवतः ।
१०. **पूर्वस्मिन्नध्याये** एषः विषयः उक्तः अस्ति ।

The Sandhi words printed in bold above are split up as follows.

१. सर्वस्मिन्नपि = सर्वस्मिन् + अपि
२. रुदन्नागतः = रुदन् + आगतः
३. अस्मिन्नौषधे = अस्मिन् + औषधे
४. गच्छन्नस्ति = गच्छन् + अस्ति
५. एतस्मिन्नेव = एतस्मिन् + एव
६. हसन्नवदत् = हसन् + अवदत्
७. कुर्वन्नेव = कुर्वन् + एव
८. अगच्छन्निति = अगच्छन् + इति
९. तस्मिन्नविश्वासः = तस्मिन् + अविश्वासः
१०. पूर्वस्मिन्नध्याये = पूर्वस्मिन् + अध्याये

In the examples above there is an additional letter (न्) coming as an **आगम** when the Sandhi takes place. This is called **ङमुडागमसन्धिः** । This letter is neither found in the former word nor the latter word.

Rule : When the letters **ङ् ण्** and **न्** that are preceded by a **ह्रस्वस्वर**, are followed by any **स्वर**, there will be an additional **ङ् ण्** and **न्** respectively. In other words, the three letters are doubled. This is **ङमुडागमसन्धिः** ।

अभ्यासः

III. Split the following.

१. पश्यन्नेव = ... + ...
२. प्रत्यङ्ङात्मा = ... + ...
३. उदङ्ङिह = ... + ...
४. सुगण्णीशः = ... + ...
५. अपरस्मिन्नहनि = ... + ...

६. कस्मिन्नेतत् = ... + ...
७. हसन्नाह = ... + ...
८. अभवन्नेव = ... + ...
९. अवदन्नध्यापकाः = ... + ...
१०. शर्मन्नितः = ... + ...

IV. Join the following.

१. श्रीमन् + अम्बरीष = ...
२. आसन् + आसनानि = ...
३. एतस्मिन् + अङ्गणे = ...
४. विद्यार्थिन् + आगच्छ = ...
५. उपाविशन् + आसनेषु = ...
६. स्वामिन् + अद्य = ...
७. उदङ् + आवृत्तिः = ...
८. स्वस्मिन् + एव = ...
९. पठन् + आसीत् = ...
१०. गच्छन् + अपतत् = ...

८. लौकिकन्यायाः

7. **उष्ट्रलगुडन्यायः** - 'लगुडः' is a stick. A camel carries a load of sticks on its back. It is beaten with one of those very sticks by the rider ! This is the reward a beast of burden gets. This maxim is quoted when, in an argument, an opponent is defeated using his own logic.

8. **श्वश्रूर्निर्गच्छोक्तिन्यायः** - **श्वश्रूः** is mother-in-law. **निर्गच्छोक्तिः** is saying 'go away'.
A beggar went to a house where the daughter-in-law turned him away. Crest-fallen he moved on. Meanwhile the mother-in-law who came out, took the daughter-in-law to task for what she had done and called the beggar back. He came back in the hope that he would get alms. But, the mother-in-law said - You fellow ! I am the boss in this

house. This girl has no authority to send you back. I am saying now, "I won't give you anything, get lost".
When an easy method to accomplish a task is condemned and by a labourious method the same goal is achieved, this maxim may be quoted.

९. सङ्ग्राह्यविषयाः

अ) A prayer to be recited before eating a meal.

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ।।

Oh! Parvathi, you are always complete and the dear consort of Shankara ! give me 'bhiksha' for attaining wisdom and detachment to wordly pleasures.

To be recited in the evening after lighting the lamp.

दीपमूले स्थितो ब्रह्मा दीपमध्ये जनार्दनः ।
दीपाग्रे शङ्करः प्रोक्तः सन्ध्याज्योतिर्नमोऽस्तु ते ।।

At the bottom of the lamp resides Brahma, in the middle there is Vishnu and at its end is Maheshwara. Therefore, O' flame of the evening ! salutation to you.

आ) The concept of Yugas is exclusive to Indian mythology. A brief description of it is given below.

Kaliyuga - 4,32,000 years
Dvaparayuga - 8,64,000 years
Tretayuga - 12,96,000 years
Kritayuga - 17,28,000 years

One cycle of the four yugas is a महायुग

71 Mahayugas make a मन्वन्तरम् ।

14 Manvantaras make a Kalpa.

Now it is the first quarter (प्रथमपाद) of Kaliyuga of वैवस्वतमन्वन्तर of श्वेतवराहकल्प ।

शिक्षा - चतुर्थः पाठः

प्रश्नाः

I. *गच्छत् 'शब्दस्य उचितरूपैः रिक्तस्थानानि पूरयत ।*

उदा - गच्छन्तम् बालकम्

१. .... मित्राय २. .... कार्यकर्तारम्

३. .... अश्वेन ४. .... कर्मकरेभ्यः

५. .... अध्यापके ६. .... व्याघ्रैः

७. ....चोरेभ्यः ८. .... क्रूरमृगान्

९. ....छात्राणाम् १०. .... नायकेषु

II. *योजयत ।*

अ	आ
१. पठन्	बालकाय
२. रुदन्तम्	पुरुषस्य
३. धावते	पितामहेन
४. गच्छतः	शिशुम्
५. नृत्यतः	जनैः
६. कथयता	छात्रः
७. धावद्भिः	याने
८. चलति	वाहनात्

III. *शुद्धम् उत अशुद्धम् इति निर्दिशत ।*

उदा - सुखकाले एव यः गृहमागच्छति सः सुहृत् । (अशुद्धम्)

१. धनविषये अधिकः उत्साहः भवेत् । (...........)

२. प्रियं कृत्वा कृतस्य प्रचारः करणीयः । (...........)

३. अन्येन कृतं साहाय्यं सदसि वक्तव्यम् । (...........)

४. यः सुचरितैः पितरं तोषयति सः पुत्रः । (...........)

५. या पत्युः हितम् एव इच्छति सा निन्द्या । (...........)

(**Note:** Answers for the above exercises are given in the end of this book. **(P.No. - 232)** After completing them, check your answers.)

शिक्षा - पञ्चमः पाठः

।। धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।।

The Vedas are the sole authority for those who desire to know Dharma.

१. कृदन्ताः

शतृप्रत्ययान्तस्त्रीलिङ्गशब्दाः

In the previous lesson you got familiar with the participle forms of masculine and neuter gender, such as पठन्, गच्छन्, पतन् .. / पठत्, गच्छत्, पतत् .... with different case terminations. Now we proceed to acquaint you with the feminine forms of the same such as पठन्ती, गच्छन्ती .... etc., in nominative case.

१. वनं **गच्छन्ती** सीता न रुदितवती ।
While going to the forest, Sita didnot weep.

२. **क्रीडन्ती** राधा जननीं दृष्टवती ।
Radha, while playing, looked at her mother.

३. श्लोकं **पठन्ती** बालिका एव गौरी ।

४. देवं **नमन्ती** सुलता श्लोकान् उक्तवती ।

५. पतिम् **अनुसरन्ती**[1] लोपामुद्रा आश्रमं प्रविष्टवती ।

६. भारं **वहन्ती**[2] सङ्गीता अधः पतितवती ।

७. हरिस्मरणं **कुर्वती** माता देवदर्शनं कृतवती ।

८. कथां **लिखन्ती** वेदा गीतं गीतवती ।

---

1. she who was following 2. she who is carrying

९. क्षीरं **ददती**[3] धेनुः तृणं खादितवती ।

१०. सर्वेभ्यः मधुरं **ददती** माता पितरं स्मृतवती ।

११. **क्रीडन्त्यः** बालिकाः इतस्ततः धावन्ति ।
Girls, who are playing, are running hither and thither.

१२. आपणं **पश्यन्त्यः** स्त्रियः तत्रैव स्थितवत्यः ।
Women, who were gazing at the shop, stood there itself.

१३. फलानि **खादन्त्यः** वानर्यः बीजानि क्षिप्तवत्यः ।

१४. नूतनगृहं **क्षालयन्त्यः** कर्मकर्यः धनं प्राप्तवत्यः ।

१५. कार्यक्रमे **गायन्त्यः** गायिकाः मुख्यातिथिं दृष्टवत्यः ।

१६. शाटिकां **क्रीणत्यः**[4] ललनाः कार्यक्रमं न गतवत्यः ।

१७. कृष्णं **स्मरन्त्यः** गोपिकाः रुदितवत्यः ।

१८. गीतं **शृण्वत्यः**[5] नर्तक्यः सर्वं विस्मृतवत्यः ।

१९. पारितोषिकं **ददत्यः** शिक्षिकाः फलं न खादितवत्यः ।

२०. मार्गम् **अजानत्यः**[6] भगिन्यः कष्टम् अनुभूतवत्यः ।

Note:

1. शत्रन्त participle forms in feminine such as गच्छन्ती, लिखन्ती etc, are declined like ईकारान्तस्त्रीलिङ्गगौरीशब्दः ।
2. In प्रथमाविभक्ति the forms are गच्छन्ती गच्छन्त्यौ गच्छन्त्यः ।
3. When you observe the शत्रन्त forms in the above sentences you will find that in some there is नकार as in गच्छन्ती and in some there is no नकार as in ददती । The rule concerning this feature is as follows. You take the लट्लकार प्रथमपुरुष एकवचन form of the same root and see if there is a ह्रस्व - अकार before 'ति' । If there is, then the शत्रन्त form will have नकार in it. If there is any vowel other than ह्रस्व अकार there will be no नकार.

---

3. she who is giving 4. those who are buying 5. those who are listening 6. those who are not aware of

Eg. गच्छति - Here 'ति' is preceded by अ, therefore गच्छन्ती
पठति - Here 'ति' is preceded by अ, therefore - पठन्ती
शृणोति - Here 'ति' is preceded by ओ, therefore - शृण्वती
जानाति - Here 'ति' is preceded by आ, therefore - जानती

4. In the second lesson you were introduced to the masculine forms of certain irregular roots. Now you will learn how to derive the feminine forms of the same.

उदा - कुर्वन् - कुर्वती, जानन् - जानती,
रुदन् - रुदती, क्रीणन् - क्रीणती

विशेषः

The form 'गच्छन्ति' occurs in लट् लकार, प्रथमपुरुष, बहुवचनम् and also नपुंसकलिङ्गम्, शतृप्रत्ययान्तम् । To distinguish between the two forms study the following sentences carefully and note the difference in the meaning of 'गच्छन्ति' ।

i. गच्छन्ति = (They) go. ((लट्) वर्तमानकालः, प्रथमपुरुषः, बहुवचनम्)
उदा - बालकाः विद्यालयं गच्छन्ति ।
Boys are going to college.

ii. गच्छन्ति = Those that are going/moving.
(शतृप्रत्ययान्त-नपुंसकलिङ्ग-प्रथमा/द्वितीयाबहुवचनम्)
उदा - अ. गच्छन्ति यानानि मया दृष्टानि ।
(गच्छन्ति - प्रथमाबहुवचनम्)
Moving vehicles were seen by me.
आ. गच्छन्ति यानानि अहं दृष्टवान् ।
(गच्छन्ति - द्वितीयाबहुवचनम्)
I saw moving vehicles.

In sentence (i) above 'गच्छन्ति' is a verb where as in (ii) it is a विशेषणम् of यानानि and the sentence has another verb. By knowing the difference in the meaning of the word

'गच्छन्ति' in the two sentences you will understand the difference in the forms also.

iii. गच्छन्ती = Those (स्त्री) who are going - (शतृप्रत्ययान्त स्त्रीलिङ्ग - प्रथमा - एकवचनम्)

उदा - बालिका गच्छन्ती खादति ।

The girl is eating while going.

गच्छन्ती is an adjective of बालिका (स्त्रीलिङ्गम्) and is ईकारान्त ।

अभ्यासः

I. *अधस्तनक्रियापदानां शत्रन्तस्त्रीलिङ्ग-एकवचनान्तरूपं लिखत ।*

उदा - वदति - <u>वदन्ती</u>, शृणोति - <u>शृण्वती</u>

1. पठति - .... 2. ददाति - ....
3. स्खलति - .... 4. जानाति - ....
5. परिशीलयति - .... 6. रोदिति - ....
7. चिन्तयति - .... 8. करोति - ....
9. आनयति - .... 10. क्रीणाति - ....

II. *एतेषां बहुवचनरूपाणि लिखत ।*

उदा - पाठयन्ती शिक्षिका - <u>पाठयन्त्यः</u> <u>शिक्षिकाः</u>

1. जानती बालिका ....
2. सूचयन्ती मार्गदर्शिका ....
3. पचन्ती जननी ....
4. शक्नुवती दासी ....
5. लिखन्ती भगिनी ....
6. रुदती सखी ....
7. नयन्ती कर्मकरी ....
8. मिलन्ती अग्रजा ....
9. बध्नती नायिका ....
10. जल्पन्ती वृद्धा ....

III. *उदाहरणानुगुणं वाक्यानि परिवर्तयत ।*

उदा - अध्यापिका उत्तिष्ठति । पाठयति ।

<u>अध्यापिका उत्तिष्ठन्ती पाठयति ।</u>

1. लक्ष्मीः गायति । नृत्यति ।

   .... ।

2. राधा कृष्णं पश्यति । तुष्यति ।

   .... ।

3. श्रव्या मातरम् आह्वयति । रोदिति ।

   .... ।

4. चारुलता उत्तरं स्मरति । लिखति ।

   .... ।

5. दिव्या चिन्तयति । खेदम् अनुभवति ।

   .... ।

6. ललिता जलम् आनयति । स्खलति ।

   .... ।

7. सुमित्रा प्रश्नं पृच्छति । पश्यति ।

   .... ।

8. श्रीमती हासयति । पाठयति ।

   .... ।

IV. *शत्रन्तं पदं प्रयुज्य एकं वाक्यं कुरुत ।*

उदा - गृहिण्यः पाककार्यं स्मरन्ति । जल्पनं स्थगयन्ति ।

<u>गृहिण्यः पाककार्यं स्मरन्त्यः जल्पनं स्थगयन्ति ।</u>

1. गोपालिकाः क्षीरं दुहन्ति । कृष्णं स्मरन्ति ।

   .... ।

2. विद्यार्थिन्यः भगवद्गीतां जानन्ति । तृप्तिं प्राप्नुवन्ति ।

   .... ।

3. बालिकाः रुदन्ति । शालां गच्छन्ति ।

   .... ।

4. सहोदर्यः कार्यक्रमे मिलन्ति । सम्भाषणं कुर्वन्ति ।

   .... ।

5. व्याघ्र्यः वने गर्जन्ति । आहारम् अन्विष्यन्ति ।

.... ।

6. कार्यकर्त्र्यः निर्णयं स्वीकुर्वन्ति । कार्यारम्भं कुर्वन्ति ।

.... ।

7. गृहगोधिकाः कीटं गृह्णन्ति । अधः पतन्ति ।

.... ।

8. वृद्धाः कार्यं कुर्वन्ति । देवं स्तुवन्ति ।

.... ।

(Note : Compare your answers with those on the end of this book **(P.No. - 233)** and ascertain their correctness.)

२. पदसङ्ग्रहः

त्रैङ् – to save

१. त्रायते, २. त्रायते, ३. त्रास्यते

४. त्रातव्यम् – त्राणीयम्, ५. त्रातः – ता – तम्, त्राणः – णा – णम्

६. त्रातवान् – वती, त्राणवान् – वती, ७. त्रायमाणः – णा – णम्,

८. त्रात्वा – परित्राय, ९. त्रातुम् ।

दण्ड् – to punish

१. दण्डयति, २. दण्ड्यते, ३. दण्डयिष्यति

४. दण्डयितव्यम् – दण्डनीयम्, ५. दण्डितः – ता – तम्, ६. दण्डितवान् – वती, ७. दण्डयन् – न्ती, ८. दण्डयित्वा – परिदण्ड्य, ९. दण्डयितुम् ।

दह् – to burn

१. दहति, २. दह्यते, ३. धक्ष्यति

४. दग्धव्यम् – दहनीयम्, ५. दग्धः – दग्धा – दग्धम्, ६. दग्धवान् – वती, ७. दहन् – न्ती, ८. दग्ध्वा – विदह्य, ९. दग्धुम् ।

धाञ् – to sustain, look after

१. दधाति, २. धीयते, ३. धास्यति,

४. धातव्यम् – धानीयम्, ५. हिता – ता – तम् ६. हितवान् – वती,

७. दधत् – ती, ८. हित्वा – प्रधाय, ९. धातुम् ।

ध्यै - to meditate

१. ध्यायति, २. ध्यायते, ३. ध्यास्यति,
४. ध्यातव्यम् - ध्यानीयम्, ५. ध्यातः - ता - तम्, ६. ध्यातवान् - वती, ७. ध्यायन् - न्ती, ८. ध्यात्वा - निध्याय, ९. ध्यातुम् ।

३. प्रहेलिका

राज्ञः सम्बोधनं किं स्यात् ? सुग्रीवस्य तु का प्रिया ?
अधनास्तु किमिच्छन्ति ? आर्तैः किं क्रियते वद ।।

How is a king addressed ? Who was the beloved of Sugriva ? What do poor people wish for ? What do the distressed do ? Give a one-word-answer to all these.

Answer - देवताराधनम् - देव, तारा, धनम्
देवताराधनम् - Worshipping God.

४. सुभाषितम्

१. एते सत्पुरुषाः परार्थघटकाः स्वार्थान् परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ।।

पदविभागः

एते, सत्पुरुषाः, परार्थघटकाः, स्वार्थान्, परित्यज्य, ये, सामान्याः, तु, परार्थम्, उद्यमभृतः, स्वार्थाविरोधेन, ये, ते, अमी, मानुषराक्षसाः, परहितम्, स्वार्थाय, निघ्नन्ति, ये, ये, तु, घ्नन्ति, निरर्थकम्, परहितम्, ते, के, न, जानीमहे ।।

सन्धिः

सामान्याः + तु, स्वार्थ + अविरोधेन, ते + अमी

तात्पर्यम्

Those who help others setting aside their selfish ends, are the noblest; those who help others without upsetting their own ends

are ordinary; those who harm others for their own selfish ends are demons in the guise of human beings; and those who harm others without reason - well, we don't know what to call them.

अन्वयः

ये स्वार्थान् परित्यज्य परार्थघटकाः एते सत्पुरुषाः । ये स्वार्थाविरोधेन परार्थम् उद्यमभृतः (एते) तु सामान्याः । ये स्वार्थाय परहितं निघ्नन्ति ते अमी मानुषराक्षसाः । ये तु परहितं निरर्थकं घ्नन्ति ते के ? न जानीमहे ।

प्रतिपदार्थः

एते - These (are), सत्पुरुषाः - noble man, ये - who, परित्यज्य - having sacrificed, स्वार्थान् - their own ends, परार्थघटकाः - help others. सामान्याः तु - Ordinary people are those, ये - who, उद्यमभृतः - toil, परार्थम् - for others, स्वार्थाविरोधेन - without upsetting their own endeavours. ते अमी - Here are, मानुषराक्षसाः - demons in the garb of human beings, ये - who निघ्नन्ति - destory, परहितम् - others' ends, स्वार्थाय - for their own ends. ये तु - Those who, घ्नन्ति - destroy, परहितम् - others' ends, निरर्थकम् - without any purpose, ते के न जानीमहे - we do not know who they are ! (a language is powerless to describe such monstrosity.)

१०. क्वचित्पृथ्वीशय्यः क्वचिदपि च पर्यङ्कशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥

पदविभागः

क्वचित्, पृथ्वीशय्यः, क्वचित्, अपि, च, पर्यङ्कशयनः, क्वचित्, शाकाहारः, क्वचित्, अपि, च, शाल्योदनरुचिः, क्वचित्, कन्थाधारी, क्वचित्, अपि, च, दिव्याम्बरधरः, मनस्वी, कार्यार्थी, न, गणयति, दुःखं, न, च, सुखम् ॥

सन्धिः

क्वचित् + अपि, क्वचित् + शाकाहारः, दिव्याम्बरधरः + मनस्वी

तात्पर्यम्

A brave person devoted to his duties, does not mind discomforts, nor is he carried away by comforts. In one place he may sleep on the ground and in another on a couch; in one place he may get only greens to eat and else where he may get a delicious meal, somewhere he may wear rags and elsewhere expensive robes; but he will still not give up his pursuit.

प्रतिपदार्थः

क्वचित् - Somewhere, **पृथ्वीशय्यः** - he may have to sleep on the ground, **अपि च क्वचित्** - and elsewhere, **पर्यङ्कशयनः** - he may get a couch to lie on; **क्वचित्** - in one place, **शाकाहारः** - he may get only greens to eat, **अपि च क्वचित्** - and elsewhere, **शाल्योदनरुचिः** - he may get delicious meal to eat; **क्वचित्** - in one place, **कन्थाधारी** - he may have only rags to wear, **अपि च क्वचित्** - and else where, **दिव्याम्बरधरः** - he may get good clothes. **मनस्वी** - A brave man, **कार्यार्थी** - who is in pursuit of something, **दुःखं सुखं च न गणयति** - will never mind the hardships nor will be carried away by comforts.

५. काव्यकथा

शिशुपालस्य वधः

श्रीकृष्णः, युधिष्ठिरः, अन्ये सर्वेऽपि[1] सभाभवनम् आगतवन्तः । कुशलप्रश्नानाम् अनन्तरं राजसूययागः समारब्धः । वैभवपूर्णो[2] यागविधिः समाप्तोऽभवत्[3] । यागस्यान्ते[4] 'सदस्यपूजा' इति विधिरस्ति[5] । 'तां पूजां स्वीकर्तुं कोऽर्हः[6], कस्समर्थः[7] इति धर्मराजो[8] भीष्मं पितामहम् अपृच्छत् । तदा भीष्मः - 'श्रीकृष्ण[9] एव सर्वोत्तमः पूजार्हः' इत्यकथयत्[10] । भीष्मः श्रीकृष्णस्य प्रभावं पराक्रमम् अवतारान् च अवर्णयत् । ततो[11] युधिष्ठिरः

1. सर्वे + अपि 2. वैभवपूर्णः + यागविधिः, 3. समाप्तः + अभवत्, 4. यागस्य + अन्ते, 5. विधिः + अस्ति, 6. कः + अर्हः, 7. कः + समर्थः, 8. धर्मराजः + भीष्मम्, 9. श्रीकृष्णः + एव, 10. इति + अकथयत्, 11. ततः + युधिष्ठिरः,

a. could not bear

कृष्णस्य पूजाम् अकरोत् ।

सभायां कृतां श्रीकृष्णस्य पूजां चेदिराजः शिशुपालो[12] नासहत[13 a] । स [14]श्रीकृष्णस्य शत्रुः । शिशुपालः कोपेन धर्मराजं भीष्मञ्च[15] गर्हितुमारब्धवान् । ''नीचस्य, गोपस्य[b], चोरस्य, कृष्णस्य पूजा किमर्थम् ? अयोग्यस्येयं[16] पूजा भवति । अयं भीष्मो[17] वृथापलितः[c] मूर्खः'' इत्यनिन्दत्[18] । वादविवादः प्रवृत्तः । तदा पुनरपि[19] भीष्मः कृष्णस्य स्तोत्रं कृतवान् । अनेन शिशुपालः [20]कोपेनोन्मत्तोऽभवत्[21 d] । स[22] सभां परित्यज्य बहिर्गतः । शिशुपालपक्षीयाः नृपाः अपि बहिर्गताः ।

ततः शिशुपालः कृष्णेन सह युद्धं कर्तुं निश्चितवान् । तस्य सैनिकाः, परिवारजनाश्च[23] आगामि दुःखं परिकल्प्य[e] दुःखिताः । मध्ये शिशुपालो[24] दूतं युधिष्ठिरस्य सविधे प्रेषितवान् । दूतः सभामागत्य कृष्णाय उपदेशं कृतवान् - ''शिशुपालः शूरः, सः युद्धसन्नाहं करोति । त्वं तं शरणं गच्छ'' इति । इदं श्रुत्वा सात्यकिः कुपितः । स[25] उचितमुत्तरं दत्तवान् । पुनरपि दूतः शिशुपालं प्रशंसन्[f], श्रीकृष्णं निन्दन् वचनान्युक्तवान्[26] । इदं श्रुत्वा सर्वे नृपाः कुपिताः । दूतः प्रतिनिवृत्तवान् । उभयपक्षीयाः युद्धाय स्थितवन्तः । युद्धं घोरं समारब्धम् । अन्ते श्रीकृष्णस्य शिशुपालस्य च द्वन्द्वयुद्धं जातम् । तदा श्रीकृष्णश्चक्रायुधेन[27] शिशुपालं प्राहरत्[g] । तेन आघातेन शिशुपालो [28]मृतः । सज्जनानां सुखञ्जातम्[29] ।।

प्रश्नाः

१. यागस्य अन्ते कः विधिः अस्ति ?

२. भीष्मः कं पूजार्हम् अवदत् ?

३. शिशुपालः किं न असहत ?

---

12. शिशुपालः + न, 13. न + असहत, 14. सः + श्रीकृष्णस्य, 15. भीष्मं + च, 16. अयोग्यस्य + इयम्, 17. भीष्मः + वृथापलितः, 18. इति + अनिन्दत्, 19. पुनर् + अपि, 20. कोपेन + उन्मत्तः, 21. उन्मत्तः + अभवत्, 22. सः + सभाम्, 23. परिवारजनाः + च, 24. शिशुपालः + दूतम्, 25. सः + उचितम्, 26. वचनानि + उक्तवान्, 27. श्रीकृष्णः + चक्रायुधेन, 28. शिशुपालः + मृतः, 29. सुखं + जातम्

---

b. cowherd, c. one who has become grey-haired without achieving anything, d. mad with rage, e. anticipating, f. praising, g. struck.

४. शिशुपालदृष्ट्या कृष्णः कीदृशः ?
५. शिशुपालस्य दूतः कृष्णं किम् उपदिदेश ?

६. अन्वयरचना

**१०. अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवभिरक्षन्तु भवन्तस्सर्व एव हि ॥**

पदविभागः

अयनेषु, च, सर्वेषु, यथाभागम्, अवस्थिताः, भीष्मम्, एव, अभिरक्षन्तु, भवन्तः, सर्वे, एव, हि ।

सन्धिः

एव + अभिरक्षन्तु, भवन्तः + सर्वे, सर्वे + एव

तात्पर्यम्

Staying in your own places in the divisions of the army, all of you protect Bhishma alone, remaining close to him.

वाक्यविश्लेषणम्

- Verb - अभिरक्षन्तु - Protect remaining close by
- Nominative case - अवस्थिताः, भवन्तः, सर्वे
- Accusative case - भीष्मम्
- Locative case - अयनेषु, सर्वेषु
- Indeclinable - यथाभागम्, च, एव, एव, हि
- * While doing अन्वयरचना the indeclinables present in the sloka have to be taken along with other words appropriately. The indeclinables तु, एव, हि emphasise a statement.
- * अवस्थिताः is a passive past participle क्तप्रत्ययान्तभूतकृदन्तः । 'कथम्भूताः' is the question to be put with respect to it.

अन्वयरचना

अभिरक्षन्तु - *क्रियापदम्*
के अभिरक्षन्तु ? - सर्वे भवन्तः एव हि
कम् अभिरक्षन्तु ? - भीष्मम् एव

कथम्भूताः अभिरक्षन्तु ? - अवस्थिताः
केषु अवस्थिताः ? - अयनेषु
कीदृशेषु अयनेषु ? - सर्वेषु

**११. तस्य सञ्जनयन् हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥**

पदविभागः

विनद्य, उच्चैः - remaining words are single words in this verse.

सन्धिः

विनद्य + उच्चैः

तात्पर्यम्

The powerful Bhishma, oldest of the Kurus, the grand sire roared like a lion, cheering him (Duryodhana) and blew his conch.

वाक्यविश्लेषणम्

- Verb - दध्मौ
- Nominative case - सञ्जनयन्, कुरुवृद्धः पितामहः प्रतापवान्
- Accusative case - हर्षम्, सिंहनादम्, शङ्खम्
- Genitive case - तस्य
- Indeclinable - विनद्य (ल्यबन्तम्), उच्चैः
- * There are three words in accusative case in this sloka. Of them, हर्षम् goes with सञ्जनयन्, सिंहनादम् with विनद्य and शङ्खम् with दध्मौ ।

अन्वयरचना

दध्मौ - verb
कः दध्मौ ? - पितामहः
कीदृशः पितामहः ? - कुरुवृद्धः
पुनः कीदृशः ? - प्रतापवान्
किं कुर्वन् दध्मौ ? - सञ्जनयन्
कं सञ्जनयन् ? - हर्षं सञ्जनयन्
कस्य हर्षम् ? - तस्य

कथं दध्मौ ? - उच्चैः
किं कृत्वा दध्मौ ? - विनद्य
कं विनद्य ? - सिंहनादम्

Note :

* उच्चैः is an adverb. Therefore the question pertaining to it i s 'कथम् ?'
* सञ्जनयन् is a शत्रन्तविशेषणम् । Therefore the question pertaining to it is 'किं कुर्वन्' ?

१३. ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥

पदविभागः

ततः, श्वेतैः, हयैः, युक्ते, महति, स्यन्दने, स्थितौ, माधवः, पाण्डवः, च, एव, दिव्यौ, शङ्खौ, प्रदध्मतुः ।

सन्धिः

श्वेतैः + हयैः + युक्ते, पाण्डवः + च, च + एव

तात्पर्यम्

Then Srikrishna and Arjuna stationed in a magnificent chariot yoked with white horses, blew their divine conches.

वाक्यविश्लेषणम्

- Verb - प्रदध्मतुः
- Nominative case - माधवः, पाण्डवः, स्थितौ
- Accusative case - दिव्यौ शङ्खौ
- Instrumental - श्वेतैः हयैः
- Locative - युक्ते, महति, स्यन्दने
- Indeclinable - ततः, च, एव
- The Phrase श्वेतैः हयैः goes with युक्ते
- The verb प्रदध्मतुः is in द्विवचनम् । Therefore the question pertaining to it should be in द्विवचनम् । The कर्मपदम् in this sloka is also in द्विवचनम् । So, the question pertaining to it should also be in द्विवचनम् ।

अन्वयरचना

प्रदध्मतुः - क्रियापदम्
कौ प्रदध्मतुः ? - माधवः पाण्डवः च
कीदृशौ तौ ? - स्थितौ
कुत्र स्थितौ ? - स्यन्दने
कीदृशे स्यन्दने ? - महति
पुनः कीदृशे ? - युक्ते
कैः युक्ते ? - हयैः
कीदृशैः हयैः ? - श्वेतैः
कौ प्रदध्मतुः ? - शङ्खौ
कीदृशौ शङ्खौ ? - दिव्यौ
कदा प्रदध्मतुः ? - ततः

७. सन्धयः

There are some more व्यञ्जनसन्धिs in Samskrit. We give here a brief exposition of these.

१. पूर्वसवर्णसन्धिः

When the third letter of any वर्ग (ग, ज, ड, द, ब) that is at the end of a word (पदान्त) is followed by ह, the हकार is replaced with the fourth letter of that वर्ग optionally.

उदा - १. वाग् + हरति = वाग्घरति । (ग् + **ह** = घ)
२. षड् + हयाः = षड्ढयाः (ड् + **ह** = ढ)
३. तद् + हितम् = तद्धितम् (द् + **हि** = धि)
४. अब् + हविः = अब्भविः (ब् + **ह** = भ)
५. एतद् + हि = एतद्धि (द् + **हि** = धि)

Some more examples are as follows.

१. वणिग् + हसति = वणिग्घसति
२. अब् + ह्रासः = अब्भ्रासः
३. जगद् + हिताय = जगद्धिताय
४. पतद् + हिमम् - पतद्धिमम्

५. सम्राड् + हसति = सम्राड्ढसति
६. सुहृद् + हृष्टः = सुहृद्धृष्टः
७. षड् + हर्म्याणि = षड्ढर्म्याणि
८. वाग् + हीनः = वाग्घीनः
९. धावद् + हरिणः = धावद्धरिणः
१०. तद् + हि = तद्धि

१०. छत्वसन्धिः

When a पदान्तवर्गीयव्यञ्जनम् is followed by a शकार that has either a vowel or any of the letters ह, य, व, र next to it, the शकार is optionally replaced by छकार ।

उदा - १. तद् + शिवः Here श्चुत्वसन्धिःand चर्त्वसन्धिः take place and we get the form -

तच् + शिवः = तच् + छिवः - तच्छिवः - छत्वसन्धिः
२. तद् + श्लोकः = तच्छ्लोकः
३. उत् + श्वासः = उच्छ्वासः
४. विट् + शङ्करः = विट्छङ्करः
५. वाक् + शस्त्रम् = वाक्छस्त्रम्

Some more examples are -

१. तत् + श्रुत्वा = तच्छ्रुत्वा
२. तत् + शीलम् = तच्छीलम्
३. बृहत् + शकटम् = बृहच्छकटम्
४. महत् + शस्त्रम् = महच्छस्त्रम्
५. मृत् + शकटिकम् = मृच्छकटिकम्
६. गच्छत् + छात्रः = गच्छच्छात्रः
७. अभवत् + शिवम् = अभवच्छिवम्
८. श्रीमत् + शरच्छन्द्रः = श्रीमच्छरच्छन्द्रः
९. नटद् + शङ्करः = नटच्छङ्करः
१०. सत् + शीलम् = सच्छीलम्

Note : In most of the exmples above there is **श्चुत्वसन्धि** also.

So far you have learnt the different types of **व्यञ्जनसन्धि** । Do the exercises given below to understand them better.

अभ्यासः

I. Split the sandhis and name them.

१. अहङ्करोमि = ... + ... - ....
२. सच्चित् = ... + ... - ....
३. उड्डयते = ... + ... - ....
४. परिषत्कार्यम् = ... + ... - ....
५. उन्नयनम् = ... + ... - ....
६. महद्यशः = ... + ... - ....
७. तस्मिन्नपि = ... + ... - ....
८. एतद्धि = ... + ... - ....
९. सच्छीलम् = ... + ... - ....
१०. हरिं वन्दे = ... + ... - ....

II. Find the odd one in each group of words.

१. सङ्ग्रहः, संस्कृतम्, सङ्गतिः, सन्देशः ।
२. दिगन्तः, अजन्तः, पतन्निव, भवदपि ।
३. कुर्वन्नेव, हसन्नपि, पतन्निव, भवानपि ।
४. तन्न, तन्नाम, तद्धनम्, तन्नगरम् ।
५. सत्कीर्तिः, सत्फलम्, सद्गुरुः, सत्कर्म ।
६. शुद्धिः, तद्धितम्, एतद्धि, वाग्घीनः ।

III. Write the appropriate fourth word.

१. बालिकास्सप्त - श्चुत्वम्, कन्याष्षोडश - ....
२. रामं वन्दे - अनुस्वारसन्धिः, तल्लयः - ....
३. षडाननः - जश्त्वम्, षण्मुखः - ....
४. अस्मत्पुत्रः - चर्त्वसन्धिः, रुदन्नागतः - ....
५. तद्वरम् - जश्त्वसन्धिः, तत्फलम् - ....

IV. Join the words and name the sandhi.

V. Match the following.

अ	आ
१. पतङ्गमरुकम्	(अ) पूर्वसवर्णः
२. सम्राङ्ङसति	(आ) चर्त्वम्
३. प्रागेव	(इ) ङमुडागमः
४. अनुष्टुप्छन्दः	(ई) ष्टुत्वम्
५. गच्छन्नस्ति	(उ) परसवर्णः
६. दिङ्नागः	(ऊ) जश्त्वम्
७. सम्पादयति	(ऋ) श्चुत्वम्
८. रामश्चिनोति	(ए) अनुनासिकसन्धिः

८. लौकिकन्यायाः

9. **पिष्टपेषणन्यायः** - पिष्टम् is flour पेषणम् is pounding (grains). Grain is pounded to obtain flour. But no one would try to pound the flour. When some body says the same thing over and over again this maxim is cited to say that it is like pounding flour.

10. **अन्धगजन्यायः** - A few blindmen wanted to know what an elephant is like. They went and touched one. One of them

who touched its trunk felt that the elephant was like a Banana stem. Another touched its belly and said that it was like a wall. The third fellow touched its ear and said it was like a winnowing basket. Then they started arguing amongst themself. Thus without entirely understanding a subject if people get into an argument over it, this maxim may be quoted.

१. सङ्ग्राह्यविषयाः

अ. While taking holy water (Theertha)

शरीरे जर्जरीभूते व्याधिग्रस्ते कलेवरे ।
औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः ॥

When the body is worn out and afflicted by diseases Ganga water is the only medicine and Bhagavan Narayana the doctor.

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

We must always meditate on Narayana who is residing in the middle of the Sun's orb; who is seated on a lotus-seat, who is wearing armlets, crocodile shaped ear rings, a crown and a necklace ; who has a golden form; and who is bearing a conch and a discus.

आ. Indian scientists have named the divisions of time upto the smallest durations. See the table below -
one day (24 hrs) = 30 muhurtas (1 Muhurtam = 48 minutes)
one Muhurtam = two Nadika, one Nadika = 15 Laghu,
one Laghu = 15 Kashta, one Kashta = 5 Kshana,
one Kshana = 3 Nimeshas, one Nimesha = 3 Lava,
one Lava = 3 Vedha, one Vedha = 100 Truti,
one Truti = 3 Trasarenu, one Trasarenu = 3 Anu,
one Anu = 2 Paramanu.

●●

शिक्षा - पञ्चमः पाठः

प्रश्नाः

I. *एतेषां क्रियापदानां शत्रन्तपुंलिङ्ग-स्त्रीलिंङ्गरूपाणि एकवचने लिखत ।*

उदा - गच्छति - गच्छन्, गच्छन्ती

१. क्रीडति - ...., ... २. उद्घाटयति - ......, ...

३. नृत्यति - ...., ... ४. कर्तयति - ...., ...

५. प्राप्नोति - ...., ... ६. जिघ्रति - ...., ...

७. शक्नोति - ...., ... ८. विश्वसिति - ......, ...

II. *एतेषु क्रियापदेषु 'ति'तः पूर्वं ह्रस्व-अकारः अस्ति वा न वा इति परिशील्य शत्रन्तस्त्रीलिङ्गरूपं शुद्धम् उत अशुद्धम् इति लिखत ।*

उदा - पठति - पठन्ती - शुद्धम्

१. पश्यति - पश्यन्ती .... २. क्रीणाति - क्रीणन्ती ....

३. जानाति - जानन्ती .... ४. स्मरति - स्मरन्ती ....

५. खादति - खादन्ती ...... ६. ददाति - ददती ....

III. *रिक्तस्थानानि पूरयत ।*

१. .... परित्यज्य ये .... एव चिन्तयन्ति ते सत्पुरुषाः ।

२. स्वार्थस्य .... ये परार्थं चिन्तयन्ति ते ....।

३. स्वार्थाय ये .... ते मानुषराक्षसाः ।

४. ये .... घ्नन्ति ते के इति न ज्ञायते ।

५. मनस्वी कार्यार्थी न .... दुःखं, न च .... ।

(**Note:** Answers for the above exercises are given in the end of this book. **(P.No. - 233)** After completing them, check your answers.)

शिक्षा - षष्ठः पाठः

।। तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ।।
Restraining the senses firmly is known as Yoga.

१. कृदन्ताः

शत्रन्तस्त्रीलिङ्गशब्दाः (द्वि, तृ, च, पं, ष, स)

१. जलम् [1]**आनयन्तीं** सीतां शारदा अपि अनुसृतवती ।
२. **निन्दन्तीं** स्त्रियं दृष्ट्वा अन्याः स्त्रियः कुपितवत्यः ।
३. फलानि **खादन्तीः** [2]वानरीः दृष्ट्वा बालिकाः हसितवत्यः ।
४. [3]**धावन्तीः** गाः पश्य ।
५. पद्यं पुनः पुनः [4]**स्मरन्त्या** तया सुमधुरं न गीतम् ।
६. उत्तरं **लिखन्त्या** विद्यार्थिन्या मध्ये मध्ये आलोच्यते ।
७. भक्ष्याणि [5]**खादन्तीभिः** स्त्रीभिः बहु सम्भाषणं कृतम् ।
८. वस्त्रं **प्रक्षालयन्तीभिः** [6]रजिकाभिः [7]दीर्घोच्छ्वासः क्रियते ।
९. [8]**नृत्यन्त्यै** इदं पारितोषिकं दीयताम् ।
१०. चित्रं **पश्यन्त्यै** बालिकायै तत् चित्रं रोचते ।
११. सीतां **निन्दन्तीभ्यो** राक्षसीभ्यो हनूमान् कुपितवान् ।
१२. तत्र [9]**तिष्ठन्तीभ्यो** ललनाभ्यः सङ्गीतं रोचते ।
१३. [10]**स्फुरन्त्याः** विद्युतः प्रकाशः आगतः ।

---

1. (Sita) who is bringing (द्वि) 2. female monkeys (द्वि) 3. (cows) that are running (द्वि) 4. by her who is remembering 5. by those who are eating 6. by washer women 7. heavy breathing 8. to the one who is dancing 9. to those who are standing 10. from the flashing (lightening)

१४. [11]**आगच्छन्त्याः** व्याघ्र्याः मृगाः भीताः ।
१५. [12]**धावन्त्याः** गोः पुच्छं पश्य ।
१६. **नृत्यन्त्याः** मयूर्याः पदविन्यासं पश्य ।
१७. **पतन्तीनां** शिलानां वेगः महान् ।
१८. **जल्पन्तीनां** [13]कर्मकरीणां दर्शनेन स्वामी कुपितः ।
१९. अकस्मात् [14]**आपतन्तीनाम्** आपदां निवारणं कथम् ?
२०. **वहन्त्यां** [15]कुल्यायां मलिनता नास्ति ।
२१. सम्यक् **पठन्तीषु** एतासु का प्रथमं स्थानं प्राप्नुयात् ?

Note

1. You Know that the forms ending in शतृप्रत्ययः are used as adjectives in sentences. In the examples above you find the same - आनयन्तीं सीताम्, खादन्तीः वानरीः, स्मरन्त्या तया... etc.
2. Following are the feminine forms of शत्रन्त in the seven cases.

ईकारान्तः स्त्रीलिङ्गः 'पठन्ती' शब्दः

प्र. वि.	पठन्ती	पठन्त्यौ	पठन्त्यः
द्वि. वि.	पठन्तीम्	पठन्त्यौ	पठन्तीः
तृ. वि.	पठन्त्या	पठन्तीभ्याम्	पठन्तीभिः
च. वि.	पठन्त्यै	पठन्तीभ्याम्	पठन्तीभ्यः
पं. वि .	पठन्त्याः	पठन्तीभ्याम्	पठन्तीभ्यः
ष. वि.	पठन्त्याः	पठन्त्योः	पठन्तीनाम्
स. वि.	पठन्त्याम्	पठन्त्योः	पठन्तीषु
सम्बो. प्र.	हे पठन्ति	हे पठन्त्यौ	हे पठन्त्यः

अभ्यासः

I. *अधस्तनशब्दानां सूचितविभक्तिसम्बद्धानि एकवचनान्तानि रूपाणि लिखत ।*

उदा - पिबन्ती सीता - (चतुर्थी) - पिबन्त्यै सीतायै

---

11. from the coming (tigress) 12. of the running (cow) 13. of the maid servants 14. of befalling (calamities) 15. in the canal

१. स्खलन्ती वृद्धा - (सप्तमी) ....
२. परिशीलयन्ती अध्यापिका - (पञ्चमी) ....
३. इच्छन्ती शारदा - (षष्ठी) ....
४. हसन्ती मातामही - (सप्तमी) ....
५. पतन्ती पेटिका - (तृतीया) ....
६. स्थापयन्ती वैद्या - (चतुर्थी) ....
७. स्पृशन्ती पुत्री - (तृतीया) ....
८. अवतरन्ती धेनुः - (तृतीया) ....
९. नृत्यन्ती पौत्री - (चतुर्थी) ....
१०. गणयन्ती अधिकारिणी - (षष्ठी) ....

II. *अधस्तनशब्दानां बहुवचनान्तरूपाणि लिखत ।*

उदा - नयन्तीम् अनुवैद्याम् - नयन्तीः अनुवैद्याः

१. प्रवहन्त्यै नद्यै - ....
२. निर्वहन्त्याः भगिन्याः (ष) - ....
३. स्मरन्त्या शिक्षिकया - ....
४. रक्षन्ती माता - ....
५. सृजन्त्यां देव्याम् - ....
६. कोपयन्त्या सख्या - ....
७. सूचयन्त्याः निर्वाहिकायाः (पं) - ....
८. शृण्वत्यै मन्त्रिण्यै - ....
९. अलङ्कुर्वत्यां वध्वाम् - ....
१०. जानत्याः विद्यार्थिन्याः (पं) - ....

III. *आवरणे दत्तानां शब्दानाम् उचितैः रूपैः रिक्तस्थानानि पूरयत ।*

उदा - श्लोकं पठन्तीः बालिकाः अहम् आह्वयामि । (पठन्त्यः)

१. .... हरिणीं रामः अनुसृतवान् । (धावन्ती)
२. तृणानि .... धेनूः गोपालः रक्षति । (चरन्त्यः)
३. .... परीक्षायाः तस्याः भीतिः । (आगच्छन्ती)

४. शिरोवेदनां .... वार्ताभ्यः सः जुगुप्सते । (जनयन्त्यः)
५. सहोदरस्य वचनं .... शोभया उच्चैः हसितम् । (शृण्वती)
६. दीर्घवाक्यं .... ताभिः दोषः कृतः । (लिखन्त्यः)
७. .... महिलायाः मनः शुद्धम् अस्ति । (उपविशन्ती)
८. .... विद्यार्थिनीनां शिक्षकः आगतवान् । (नृत्यन्त्यः)
९. मार्गे .... अनुजायै कन्दुकं न ददातु । (क्रीडन्ती)
१०. स्वगृहं .... प्रतिवेशिनीभ्यः माता कुङ्कुमं दत्तवती । (गच्छन्त्यः)
११. असत्यं .... तस्यां मम विश्वासः नास्ति । (कथयन्ती)
१२. पाठं .... तासु भूमिका बुद्धिमती । (स्मरन्त्यः)
१३. अध्यापिका उत्तरं .... विद्यार्थिनीः पृष्टवती । (जानत्यः)
१४. कार्यं .... कर्मकरीषु भवत्याः कोपः अनुचितः । (कुर्वत्यः)
१५. वार्तां .... कार्यकर्त्रीभिः सन्तोषः अनुभूतः । (शृण्वत्यः)

(**Note :** Compare your answers with those on the end of this book **(P.No. - 234)** and ascertain their correctness.)

२. पदसङ्ग्रहः

पाल् = to protect, raise, take care, rear

१. पालयति २. पाल्यते ३. पालयिष्यति
४. पालयितव्यम् - पालनीयम् ५. पालितः - ता - तम् ६. पालितवान् - वती ७. पालयन् - न्ती ८. पालयित्वा - आपाल्य ९. पालयितुम् ।

पा = to protect

१. पाति २. पायते ३. पास्यति
४. पातव्यम् - पानीयम् ५. पातः - पाता - पातम् ६. पातवान् - वती
७. पान् - न्ती - ती ८. पात्वा - परिपाय ९. पातुम् ।

पुष् = to look after

१. पुष्णाति २. पुष्यते ३. पोषिष्यति
४. पोषितव्यम् - पोषणीयम् ५. पुषितः - ता - तम् ६. पुषितवान् - वती
७. पुष्णन् - ती ८. पुषित्वा - पोषित्वा, परिपुष्य - परिपोष्य
९. पोषितुम् ।

पूञ् = to sanctify, purify

१. पुनाति २. पूयते ३. पविष्यति
४. पवितव्यम् - पवनीयम् ५. पुषितः - ता - तम् ६. पूतवान् - वती
७. पुनन् - ती ८. पवित्वा - उत्पूय ९. पवितुम् ।

प्रीञ् = to please

१. प्रीणाति २. प्रीयते ३. प्रेष्यति
४. प्रेतव्यम् - प्रयणीयम् ५. प्रीतः - प्रीता - प्रीतम् ६. प्रीतवान् - वती
७. प्रीणन् - ती ८. प्रीत्वा - सम्प्रीय ९. प्रेतुम् ।

३. प्रहेलिका

पूजायां किं पदं प्रोक्तं किं वा पुरुषवाचकम् ।
क आयुधतया ख्यातः प्रलम्बासुरविद्विषः ।।

Which is the word used in the sense of 'good' ? Which word means 'a man' ? Which was the weapon of Balarama, the enemy of Pralambasura ?

Answer all the three questions in a single word.

Answer - सुनासीरः - Indra, सु - good, ना - man, सीरः - plough.

४. सुभाषितम्

११. कदर्थितस्यापि हि धैर्यवृत्तेः
न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्नेः
नाधः शिखा यान्ति कदाचिदेव ।।

पदविभागः

कदर्थितस्य, अपि, हि, धैर्यवृत्तेः, न, शक्यते, धैर्यगुणः, प्रमार्ष्टुम्, अधोमुखस्य, अपि, कृतस्य, वह्नेः, न, अधः, शिखाः, यान्ति, कदाचित्, एव ।

सन्धिः

कदर्थितस्य + अपि = सवर्णदीर्घसन्धिः, अधोमुखस्य + अपि =

सवर्णदीर्घसन्धिः, न + अधः = सवर्णदीर्घसन्धिः, शिखाः + यान्ति = विसर्गसन्धिः(लोपः), कदाचित् + एव = जश्त्वसन्धिः

तात्पर्यम्

The courage of a brave man cannot be undone however much he is slighted. Though pointing downwards a flame of fire does not ever point to the ground.

अन्वयार्थः

कदर्थितस्यापि - Though slighted, **धैर्यवृत्तेः** - a brave man's, **धैर्यगुणः** - courage, **प्रमार्ष्टुम् न शक्यते** - cannot be undone. **अधोमुखस्य कृतस्यापि** - Although pointed downwards, **वह्नेः शिखाः** - flames of fire, **न कदाचिदेव** - never, **अधः यान्ति** - point downwards.

१२. नागुणी गुणिनं वेत्ति गुणी गुणिषु मत्सरी ।
गुणी च गुणरागी च विरलः सरलो जनः ॥

पदविभागः

न, अगुणी, गुणिनम्, वेत्ति, गुणी, गुणिषु, मत्सरी, गुणी, च, गुणरागी, च, विरलः, सरलः, जनः ।

सन्धिः

न + अगुणी = सवर्णदीर्घसन्धिः, सरलः + जनः = विसर्गसन्धिः (गुण)

तात्पर्यम्

One who is not virtuous fails to appreciate the virtuous. A virtuous man is envious of the virtuous. A simple man who is both virtuous and fond of virtues, is rarely found.

अन्वयार्थः

अगुणी गुणिनं न वेत्ति - A vicious man doesn't appreciate the virtuous. **गुणी गुणिषु मत्सरी** - A virtuous man envies another virtuous person. **गुणी च गुणरागी च** - One who is both virtuous and also fond of virtue (in others), **सरलः जनः विरलः** - such a simple man is rare.

५. काव्यकथा

'शिक्षा'परीक्षायाः आदिमेषु पञ्चसु पाठेषु 'शिशुपालवध'काव्यस्य कथां वयं ज्ञातवन्तः । इतः परं 'किरातार्जुनीय'काव्यस्य कथां पश्यामः ।

।। किरातार्जुनीयम् ।।

धर्मराजाय द्रौपद्याः उपदेशः

महाभारतस्य कथा प्रसिद्धा । कौरवपाण्डवयोर्द्यूतं[1] समाप्तम् । कौरवा[2] जयं प्राप्तवन्तः । पाण्डवाः पराजिताः । नियमानुसारेण युधिष्ठिरो[3]ऽनुजैः सहारण्यं[4] गतवान् । अरण्ये युधिष्ठिरः दुर्योधनस्य राज्यभारक्रमं ज्ञातुम् एकं किरातं[a] हस्तिनापुरं प्रति प्रेषितवान् । स[5] किरातो[6] ब्रह्मचारिवेषं धृत्वा गतवान् । ततः स[7] वनं प्रत्यागतवान् । युधिष्ठिरं निवेदितवान् च - ''दुर्योधनो[8] राज्यसिंहासने स्थितः । तथापि[9] भवतां विषये स[10] भीतः । स[11] नीतिपूर्वकं राज्यशासनं करोति । सेवकान् मित्राणीव[12] पश्यति । मित्राणि बन्धूनिव, बन्धून् स्वामिभावेन[b] च पश्यति । सामन्ताः सर्वे तस्य आदेशं[c] परिपालयन्ति । राज्ये सर्वत्र [13]कृषिरुत्कृष्टास्ति[14] । गुप्तचरा[15] विश्वासयोग्याः सन्ति । ते अन्यराजानां वृत्तान्तं तस्मै निवेदयन्ति । एवं स[16] प्रबलो[17] महाराजो[18] भविष्यति । अतस्तं[19] जेतुं[d] भवता उपायः कर्तव्यः'' इति ।

युधिष्ठिरो[20] गुप्तचराय पारितोषिकं दत्त्वा तं प्रेषितवान् । ततो[21] भीमादीनां सम्मुखे किरातेनोक्तं[22] विषयं द्रौपद्यै कथितवान् । युधिष्ठिरस्य वचनं श्रुत्वा

---

1. कौरवपाण्डवयोः + द्यूतम् - विसर्गसन्धिः, 2. कौरवाः + जयम् - विसर्गसन्धिः, 3. युधिष्ठिरः + अनुजैः - विसर्गसन्धिः, गुणः, पूर्वरूपसन्धिः 4. सह + अरण्यम् - सवर्ण-दीर्घसन्धिः, 5. सः + किरातः - विसर्गसन्धिः, 6. किरातः + ब्रह्मचारिवेषम् - विसर्गसन्धिः, 7. सः + वनम् - विसर्गसन्धिः, 8. दुर्योधनः + राज्यसिंहासने - विसर्गसन्धिः, 9. तथा + अपि - सवर्णदीर्घसन्धिः, 10. सः + भीतः - विसर्गसन्धिः, 11. सः + नीतिपूर्वकम् - विसर्गसन्धिः, 12. मित्राणि + इव - सवर्णदीर्घसन्धिः, 13. कृषिः + उत्कृष्टा - वि.सन्धिः, 14. उत्कृष्टा + अस्ति - सवर्णदीर्घसन्धिः, 15. गुप्तचराः + विश्वासयोग्याः - विसर्गसन्धिः, 16. सः + प्रबलः - विसर्गसन्धिः, 17. प्रबलः + महाराजः - वि.सन्धिः, 18. महाराजः + भविष्यति - वि.सन्धिः, 19. अतः + तम् - वि.सन्धिः, 20. युधिष्ठिरः + गुप्तचराय - वि.सन्धिः, 21. ततः + भीमादीनाम् - वि.सन्धिः, 22. किरातेन + उक्तम् - गुणसन्धिः,

---

a. hunter (accusative case), b. as his master, c, command (accusative case) d. to conquer,

द्रौपदी उक्तवती - ''हे नाथ ! स्त्रीणाम् उपदेशवचनेषु पुरुषाः प्रायेणानादरं[23] प्रकटयन्ति । [24]तथापि मम हृदयव्यथा वक्तुं मां प्रेरयति । त्वं पत्नीसमां[e] राज्यलक्ष्मीं परित्यक्तवान् । [25]अतोऽयं भीमः कथमस्ति ? पश्य । पूर्वं स[26] सुन्दरमञ्चे शयनं करोति स्म । इदानीं दीनो[27] भूतले शयनं करोति । अयमर्जुनः पूर्वम् उत्तरदेशं जित्वा[f] सुवर्णराशिमानीतवान् । इदानीं स[28] एव वल्कलं[g] धरति । वन्यजीवनं[h] करोति । नकुलसहदेवौ सुकुमारौ कोमलदेहौ । तौ कठिने भूतले शयनं कुरुतः । एतेषां कष्टं दृष्ट्वा तव दुःखं न भवति किम् ? अहम् अतीव दुःखमनुभवामि । महाराज ! त्वं शान्तिं त्यज । शत्रूणां विनाशं कुरु । [29]शान्तिर्मुनीनां स्वभावः । स[30] स्वभावो[31] नृपाणां न । समयनिरीक्षा [32]नोचिता । यो[33] विजयमिच्छति स [34]समयानुसारेण सन्धिं[i] त्यजति । अतो[35] युद्धाय प्रवृत्तिं कुरु'' इति ।

एवमुक्त्वा द्रौपदी [j]तूष्णीमभवत् ।

प्रश्नाः

१. युधिष्ठिरः कं किमर्थं हस्तिनापुरं प्रति प्रेषितवान् ?
२. दुर्योधनः मित्राणि बन्धून् च कथं पश्यति ?
३. पुरुषाः प्रायेण कुत्र अनादरं प्रकटयन्ति ?
४. शान्तिः केषां स्वभावः ? केषां स्वभावः न ?
५. कः सन्धिं त्यजति ?

६. अन्वयरचना

Sri Krishna blew the conch named Panchajanya and Arjuna, Devadatta, following which Bhima, Yudhishtira, Virata, Drupada

---

23. प्रायेण + अनादरम् - सवर्णदीर्घसन्धिः 24. तथा + अपि- सवर्णदीर्घसन्धिः, 25. अतः + अयम् - विसर्गसन्धिः, पूर्वरूपसन्धिः, 26. सः + सुन्दरमञ्चे - विसर्गसन्धिः, 27. दीनः + भूतले - विसर्गसन्धिः, 28. सः + एव - विसर्गसन्धिः, 29. शान्तिः + मुनीनाम् - वि.सन्धिः, 30. सः + स्वभावः - वि.सन्धिः, 31. स्वभावः + नृपाणाम्– वि.सन्धिः, 32. न + उचिता - विसर्गसन्धिः, 33. यः + विजयम् - वि.सन्धिः, 34. सः + समयानुसारेण - वि.सन्धिः, 35. अतः + युद्धाय - विसर्गसन्धिः

---

e. who is like one's wife, f. having conquered, g. bark dress (accusative case), h. life in a forest, i. agreement (accusative), j. kept quiet.

and others also blew their conches.

१३. स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ।।

पदविभागः

सः, घोषः, धार्तराष्ट्राणाम्, हृदयानि, व्यदारयत्, नभः, च, पृथिवीम्, च, एव, तुमुलः, व्यनुनादयन् ।

सन्धिः

सः + घोषः - विसर्गसन्धिः (लोपः)
घोषः + धार्तराष्ट्राणाम् - विसर्गसन्धिः (उकारः)
नभः + च - विसर्गसन्धिः, श्चुत्वम्
च + एव - वृद्धिसन्धिः
तुमुलः + व्यनुनादयन् - विसर्गसन्धिः (उकारः)

तात्पर्यम्

That tumultuous roar resounded in the heaven and the earth and rent the hearts of Dhritarashtra's sons.

वाक्यविश्लेषणम्

* क्रियापदम् - व्यदारयत्
* प्रथमा - सः, घोषः, तुमुलः, व्यनुनादयन्
* द्वितीया - हृदयानि, नभः, पृथिवीम्
* षष्ठी - धार्तराष्ट्राणाम्
* अव्ययम् - च, च, एव
* The word व्यनुनादयन् is to be taken with नभः पृथिवीं च and हृदयानि with धार्तराष्ट्राणाम् ।

अन्वयरचना

व्यदारयत् - क्रियापदम्
कः व्यदारयत् ? - सः घोषः
कीदृशः घोषः ? - तुमुलः
किं कुर्वन् व्यदारयत् ? - व्यनुनादयन्
किं व्यनुनादयन् ? - नभः
पुनः कां व्यनुनादयन् ? - पृथिवीं च एव

कानि व्यदारयत् ? - हृदयानि
केषां हृदयानि ? - धार्तराष्ट्राणाम्

१४. अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ।।

१५. हृषीकेशं तदा वाक्यमिदमाह महीपते ।
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ।।

The sentence in sloka 14 continues into the next sloka. Therefore the अन्वय of the two verses, is given together.

पदविभागः

अथ, व्यवस्थितान्, दृष्ट्वा, धार्तराष्ट्रान्, कपिध्वजः, प्रवृत्ते, शस्त्रसम्पाते, धनुः, उद्यम्य, पाण्डवः ।
हृषीकेशम्, तदा, वाक्यम्, इदम्, आह, महीपते, सेनयोः, उभयोः, मध्ये, रथम्, स्थापय, मे, अच्युत ।

सन्धिः

धनुः + उद्यम्य, सेनयोः + उभयोः + मध्ये - विसर्गसन्धिः (रेफः)
मे + अच्युत - पूर्वरूपसन्धिः

तात्पर्यम्

Oh Great King ! On seeing the sons of Dhritarashtra who were standing in array when the weapons were about to strike, Arjuna the monkey-bannered, raised his bow and spoke these words to Srikrishna (Hrishikesha) - "O Achyuta ! park my chariot in between the two armies".

Till now you learnt how to analyse a sentence by recognising the words in different cases, numbers and genders. Here after you will learn to do the वाक्यविश्लेषण in a tabular form.

Here are a few points to take note of in this connection.

* Those words that end in तिङ् are verbs. (गच्छति, अगच्छत्, जगाम, गच्छतु etc.) क्त्वान्त, ल्यबन्त, and तुमुन्नन्त also denote a क्रिया । While क्त्वान्त and ल्यबन्त words indicate an असमाप्तक्रिया (a क्रिया that is not yet over), a तुमुन्नन्त refers to an उद्देशक्रिया

(a क्रिया whose purpose is intended) in the column of क्रिया and the category to which they belong is indicated in brackets as क्त्वान्त....etc. They also have their own कर्तृ, कर्म etc.

* The words that come in the column named 'कः', are कर्तृपदानि and these are ending in प्रथमाविभक्तिः । Similarly, the words in the column 'कम्' are कर्मपदानि ending in द्वितीयाविभक्तिः । In the same way the words in all the other विभक्ति are also grouped under different columns -
  कः - प्रथमान्ताः कम् - द्वितीयान्ताः
  केन - तृतीयान्ताः, कस्मै - चतुर्थ्यन्ताः
  कस्मात् - पञ्चम्यन्ताः, कदा / कुत्र - सप्तम्यन्ताः
* A word in षष्ठीविभक्ति will be given along with the noun it is related to. So, the table containing the वाक्यविश्लेषणम् of the two slokas above is as follows -

क्रिया	कः	कम्	कदा / कुत्र
१. आह	कपिध्वजः पाण्डवः	१. हृषीकेशम् २. इदं वाक्यम्	प्रवृत्ते, शस्त्रसम्पाते
दृष्ट्वा (क्त्वान्तम्)	कपिध्वजः	व्यवस्थितान् धार्तराष्ट्रान्	
उद्यम्य (ल्यबन्तम्)	पाण्डवः	धनुः	—
२. स्थापय	(त्वम्)	रथम् मे	मध्ये, सेनयोः उभयोः

* There are two main verbs in the slokas above. Accordingly there are two sentences.
* आह - said / spoke. This is a द्विकर्मकक्रिया । Hence there are two कर्मपद s - हृषीकेशम् and इदं वाक्यम् ।
* प्रवृत्ते शस्त्रसम्पाते - Here both the words are in सप्तमीविभक्ति । The expression means 'when the missiles were about to fall'.

This usage of **सप्तमी** denotes time and is known as '**भावलक्षण-सप्तमी** । You will learn more about this in the coming lessons. For now it is enough to know the meaning such a phrase conveys.

अन्वयरचना

महीपते ! is Sanjaya's adderss to Dhritarashtra
आह - क्रियापदम्
कः ? - पाण्डवः
कीदृशः पाण्डवः ? - कपिध्वजः
कम् आह ? - हृषीकेशम्
किम् आह ? - इदं वाक्यम्
किं कृत्वा आह ? - दृष्ट्वा
कदा दृष्ट्वा ? - अथ
कान् दृष्ट्वा ? - धार्तराष्ट्रान्
कीदृशान् धार्तराष्ट्रान् ? - व्यवस्थितान्
पुनः किं कृत्वा आह ? - उद्यम्य
किम् उद्यम्य ? - धनुः
कदा आह ? - तदा, अथ प्रवृत्ते
कस्मिन् प्रवृत्ते ? - शस्त्रसम्पाते

अच्युत ! - Arjuna's address to Krishna
स्थापय - क्रियापदम्
कः स्थापय ? - (त्वम्) (अध्याहृतम्)
कं स्थापय ? - रथम्
कस्य रथम् ? - मे
कुत्र स्थापय ? - मध्ये
कयोः मध्ये ? - सेनयोः
कीदृश्योः सेनयोः ? - उभयोः

७. सन्धयः

विसर्गसन्धिः - १

A visarga followed by a vowel or a consonant undergoes change.

This is known as Visarga Sandhi. There are four kinds of Visarga Sandhi -

1. Visarga is replaced by उकार,
2. Visarga elides,
3. Visarga is replaced by रेफ and
4. Visarga is replaced by सकार ।

Rule - 1

(Visarga is replaced with उकार)

Observe the Sandhi in the sentences given below -

१. अद्य **रामोऽपि** आगतवान् ।
२. वत्स ! **बालोऽसि** त्वम् ।
३. **देवो**ऽवतु सर्वान् । (अवतु = रक्षतु)
४. **धनिकोऽगच्छत्** स्वग्रामम् ।
५. जनैः **धर्मोऽपाल्यत** ।
६. **बालो धावति** वेगेन ।
७. **सेवको वस्तूनि** अनयत् ।
८. **अध्यापको गीतं** पाठयति ।
९. अद्य **अष्टमो दिनाङ्कः** ।
१०. विसर्गस्य **अकारो भवति** ।

In the examples above Visarga is replaced by the letter 'उ'

Rule -

A Visarga preceded by a ह्रस्व - अकार and followed by either a ह्रस्व-अकार or a मृदुव्यञ्जनम्, changes into उकार । (The third, fourth and fifth syllables of each Varga and य,र,ल,व,ह are मृदुव्यञ्जनानि - soft consonants)

उदा - **(अ)** रामः + अपि
राम + : + अपि

When Visarga is replaced by 'उ' - राम + उ + अपि
Now गुणसन्धि takes place - रामो + अपि
Now पूर्वरूपसन्धि takes place and we get the form रामोऽपि
Similarly the sandhi in बालोऽपि, देवोऽवतु, धनिकोऽगच्छत् and

धर्मोऽपाल्यत should be split.

(आ) बालः + धावति

बाल + ः + धावति

बाल + उ + धावति (Visarga is replaced by 'उ')

बालो धावति (the form after गुणसन्धि)

Similarly, सेवको वस्तूनि, अध्यापको गीतम्, अष्टमो दिनाङ्कः, अकारो भवति ।

Some more examples -

१. मोक्षः + अस्ति = मोक्षोऽस्ति
२. युयुधानः + विराटः = युयुधानो विराटः
३. तुमुलः + अभवत् = तुमुलोऽभवत्
४. कुन्तीपुत्रः + युधिष्ठिरः = कुन्तीपुत्रो युधिष्ठिरः
५. धृष्टद्युम्नः + विराटः = धृष्टद्युम्नो विराटः
६. द्रुपदः + द्रौपदेयाः = द्रुपदो द्रौपदेयाः
७. घोषः + धार्तराष्ट्राणाम् = घोषो धार्तराष्ट्राणाम्
८. हृषीकेशः + देवदत्तम् = हृषीकेशो देवदत्तम्

(All the above examples are chosen from the Bhagavadgita. The same method is followed in the coming lessons too.)

अभ्यासः

I. Join Sandhi.

१. देवः + अस्ति = ...
२. सञ्जयः + अवदत् = ...
३. नृपः + अपालयत् = ...
४. प्रथमः + अङ्कः = ...
५. तृतीयः + अध्यायः = ...
६. धर्मः + रक्षति = ...
७. अवकाशः + दीयते = ...
८. रामः + हरिः = ...
९. स्थितः + धर्मराजः = ...
१०. उत्तमः + बालकः = ...

II. Point out the three Sandhis **उकारः**, **गुणः** and **पूर्वरूपम्** as you have seen in**रामोऽपि**, in the following examples.

उदा - गजोऽस्ति - i. गज + उ + अस्ति, ii. गजो अस्ति, iii. गजोऽस्ति

१. देवोऽवतु - i. ....
ii. ....
iii. ....

२. तरुणोऽपि - i. ....
ii. ....
iii.....................

३. इतोऽपसर - i. ....
ii. ....
iii. ....

४. पण्डितोऽभवत् - i. ....
ii. ....
iii. ....

५. बालोऽपरः - i....................
ii. ....
iii. ....

८. लौकिकन्यायाः

11. **अरुन्धतीप्रदर्शनन्यायः** - During wedding the bride is shown the star Arundhati. Arundhati is a small star beside Vasishta in the Saptarshimandala. So, they point to the Vasishta star which is big and noticeable first and then show the small one by its side as Arundhati.

Thus a teacher teaches what is easy for a student to grasp first and then proceeds to the more difficult ones. For eg. While pointing out the distant places on a world map the same procedure is followed.

12. गड्डरिकाप्रवाहन्यायः - गड्डरिका is a flock of Sheep. Sheep always move in a group. If the sheep in front falls into a pit then the one behind it also is sure to fall. This maxim is quoted when a person blindly copies another and ends up in trouble.

९. सङ्ग्राह्यविषयाः

अ. Sloka to be recited in the evening - before going to sleep

रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम् ।
शयने यः स्मरेन्नित्यं दुःस्वप्नस्तस्य नश्यति ।।

Before going to sleep, one who remembers Rama, Kumaraswamy, Hanuman, Garuda and Bheema will not get bad dreams.

Requesting God to forgive us

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विदितमविदितं वा सर्वमेतत् क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शम्भो ।।

O ! Lord Shambhu ! Mahadeva be victorious. Ocean of kindness ! Please forgive all my faults (sins) whether it is done with hands or feet, whether by speech, body or action, ears, eyes or mind, known or unknown.

आ. The universities (seats of education) of Ancient India and the places where they were situated

Takshashila	...	(present) Pakistan
Ujjaini	...	Madhya Pradesh
Saranath	...	Uttara pradesh
Nalanda	...	Bihar
Kanchi	...	Tamilnadu
Navadwipa	...	Bengal
Vallabhi	...	Gujarat
Gunashila	...	Bihar (Women's university)

शिक्षा - षष्ठः पाठः

प्रश्नाः

I. *विशेष्यं दृष्ट्वा शत्रन्तानि रूपाणि परिष्कुरुत ।*

उदा - क्रीडन्त्यः विद्यार्थिनीः - क्रीडन्तीः विद्यार्थिनीः

१. शृण्वत्याः मन्त्रिण्यै - ....

२. स्मरन्त्याः भगिनीः - ....

३. प्रवहन्त्याः नद्याम्- ....

४. लिखन्तीः मातरः- ....

५. धावन्त्यै बालिकया - ....

II. *प्रथमवाक्यस्य आधारेण द्वितीयवाक्ये स्थितानि रिक्तस्थानानि पूरयत ।*

उदा - ताः गच्छन्त्यः सन्ति । गच्छन्तीः ताः आह्वय ।

१. एताः क्रीडन्त्यः सन्ति । .... सूचय ।

२. धेनवः चरन्त्यः सन्ति । .... पश्य ।

३. गृहिण्यः जल्पन्त्यः सन्ति ।............. .... स्मारय ।

४. बालिकाः नृत्यन्त्यः सन्ति ।........... ....ज्ञापय ।

५. विद्यार्थिन्यः लिखन्त्यः सन्ति । .... मा पीडय ।

III. *अन्वयरचनां लिखत ।*

१. सः महान् शब्दः जनानां हृदयानि व्यदारयत् ।

२. रामः भीमम् उत्तमां कथाम् अकथयत् ।

(**Note:** Answers for the above exercises are given in the end of this book. **(P.No. - 234)** After completing them, check your answers.)

शिक्षा - सप्तमः पाठः

।। वज्रादपि हि धीराणां चित्तरत्नमखण्डितम् ।।

The mind of brave men is a precious stone which even a diamond cannot cut.

१. कृदन्ताः

शानच्प्रत्ययः - १

In the earlier lessons you learnt the present participle forms (शत्रन्ताः) like पठन्, गच्छन् etc., of all the three genders ending in the seven case terminations and three numbers. वन्दमानः एधमानः etc., are also present participles (वर्तमानकृदन्ताः) used in the same sense. Roots of Atmanepada take these forms.

Eg. बालः **पठन्** निद्रां कृतवान् ।
The boy who was reading fell asleep.
पठन् - शत्रन्तः - पठ् - परस्मैपदी धातुः
सीता **कम्पमाना** रावणेन सह गतवती ।
Trembling, Sita went with Ravana.
कम्पमाना - शानजन्तः - कम्प् - आत्मनेपदी धातुः

In कम्पमाना the affix used is शानच् । Following are some more forms similar to कम्पमाना ।

१. तत्र **वन्दमानः** भक्तः एव श्रीकरः ।
The devotee bowing down there, is Srikara.

२. निर्मले आकाशे **प्रकाशमानः** चन्द्रः सर्वान् सन्तोषयति ।
The moon shining in a clear sky delights all.

३. कार्यक्रमे **भाषमाणः** सन्तोषः अद्य मम गृहम् आगच्छति ।
४. उद्याने वायुना [1]**कम्पमानाः** वृक्षाः शिरः चालयन्तः इव दृश्यन्ते ।
५. **याचमानाः** भिक्षुकाः दैन्यं प्रदर्शयन्ति ।
६. **लम्बमानं** फलं बालकः गृहीतवान् ।
The boy took the fruit that was dangling.

७. **शोभमानानि** भवनानि जनेषु आनन्दं जनयन्ति ।
Buildings that are decorated, cause delight in people.

८. **पलायमानं**[2] मित्रं शीघ्रं धावति ।
९. कार्यम् **आरभमाणा** शीला देवं प्रार्थितवती ।
Sheela who is beginning her work prayed to God.

१०. **पचमाना** पाचिका पाकशालां स्वच्छं स्थापयति ।
The (lady) cook who is cooking keeps the kitchen clean.

११. **बाधमाना** शिरोवेदना शीघ्रं न निर्गच्छति ।
१२. **अधीयानाः**[3] छात्राः उत्तमफलितांशं प्राप्नुवन्ति ।
१३. कार्यं **कुर्वाणाः**[4] कर्मकर्यः अधिकं धनम् [5]इष्टवत्यः ।
१४. **शयानाः**[6] वृद्धाः प्रातः उष्णपानीयम् इच्छन्ति ।
१५. **भुञ्जानाः**[7] भगिन्यः मधुरं न स्वीकुर्वन्ति ।

Affix 'शानच्'

1. This affix denotes an action (क्रिया) that has begun and not yet ended. Only the part 'आन' remains while the initial श् and final 'च्' elide.
2. It is added only to the roots of Atmanepada.

Eg. - कम्पते - कम्पमानः/ना/नम्
बाधते - बाधमानः/ना/नम्
याचते - याचमानः/ना/नम्

---

1. (trees) that are shaking, 2. one who is running away, 3. those that are studying, 4. those who are doing, 5.wanted, 6. (old men) who are lying down, 7. those who are eating.

3. To know the forms ending in शानच् you must observe the third person plural form in present tense (लट्).

   Eg - वर्धते - वर्धन्ते - वर्धमानः
   चिनुते - चिन्वते - चिन्वानः
   कुरुते - कुर्वते - कुर्वाणः
   भुङ्क्ते - भुञ्जते - भुञ्जानः

4. A word ending in शानच् is declined in all the three genders and numbers and the seven cases.

5. You might have noticed a slight difference among the शानजन्त forms used above. In the words वन्दमानः and शोभमाना there is 'मान' while in कुर्वणा and शयाना there is 'आन' । To understand this observe the लट्-प्रथमपुरुष-एकवचन form. If there is a ह्रस्व - अकार before ते as in वन्दते and शोभते, the letter म् is prefixed to आन and hence the शानजन्त form is वन्दमान and शोभमान । If there is any other vowel as in कुरुते and शेते, only 'आन' (of शानच्) is added.

   Eg. स्पन्दते - स्पन्दमानः, शेते - शयानः

   In स्पन्दते the affix ते is preceded by a ह्रस्व-अकार । Therefore, 'मान' is added. On the other hand in 'शेते', 'ते' is preceded by एकार । Therefore, only 'आन' is added.

6. The roots of Atmanepada generally take these forms.

   Eg. - वन्दते वन्देते वन्दन्ते ; The शानजन्त forms of the root वन्द् will be वन्दमानः/माना/मानम् । Given below is a list of verb roots that resemble वन्द् -

   सह्, सेव्, लभ्, दय्, क्षम्, भज्, वन्द्,भाष्, शिक्ष्, भिक्ष्, त्वर्, चेष्ट्, घट्, जृम्भ्, कम्प्, बाध्, ईह्, याच्, एध्, स्पन्द्, स्पर्ध्, लम्ब्, राज्, रम्, वेप्, शङ्क्, लङ्घ्, प्रति-ईक्ष्, प्र-यत्, आ-रभ्, प्र-काश्, त्रै (त्रायते), डी (डयते), मुद् (मोदते), द्युत् (द्योतते), रुच् (रोचते), शुभ् (शोभते), वृत् (वर्तते), वृध् (वर्धते), बुध् (बुध्यते), युध् (युध्यते),

युज् (युज्यते), विद् (विद्यते), खिद् (खिद्यते), क्लिश् (क्लिश्यते), मन् (मन्यते), दीप् (दीप्यते), प्र-सू (प्रसूयते), जन् (जायते)

7. Here are a few roots that are irregular. Given below are the वर्तमानकाल (लट्) - एकवचन and बहुवचन forms of these, from which you can determine their शानजन्त forms.
चिनुते - चिन्वते, कुरुते - कुर्वते, भुङ्क्ते - भुञ्जते,
अधीते - अधीयते, प्रयुङ्क्ते - प्रयुञ्जते, तनुते - तन्वते,
क्रीणीते - क्रीणते, गृह्णीते - गृह्णते, जानीते - जानते,
विक्रीणीते - विक्रीणते, मनुते - मन्वते, शेते - शेरते (शयानः - शानजन्तरूपम्)

अभ्यासः

I. *अधोनिर्दिष्टानां क्रियापदानां लट्लकार-बहुवचनान्तरूपं शानजन्तपुंलिङ्ग-प्रथमैकवचनान्तं रूपं च लिखत ।*

उदा - कम्पते - <u>कम्पन्ते - कम्पमानः</u>

१. याचते ....
२. जृम्भते ....
३. शङ्कते ....
४. वेपते ....
५. डयते ....
६. कुरुते ....
७. चिनुते ....
८. शेते ....
९. तनुते ....
१०. विक्रीणीते ....

II. *अधोनिर्दिष्टानां बहुवचनान्तरूपाणि लिखत ।*

१. भजमाना भक्ता ....
२. रममाणं मित्रम् ....
३. शोभमानः विद्यालयः ....
४. विद्यमानः छात्रः ....

५. क्षममाणा माता ....
६. गृह्णानः शिक्षकः ....
७. जानानः अधिकारी ....
८. चिन्वाना सखी ....
९. कुर्वाणा कार्यकर्त्री ....
१०. जायमानं सस्यम् ....

III. *आवरणे दत्तानां क्रियापदानां शानजन्तरूपैः रिक्तस्थलानि पूरयत ।*

उदा - लज्जमाना कन्या मौनम् आश्रितवती । (लज्जते)
१. कष्टानि .... सा प्रबुद्धा जाता । (सहते)
२. .... विकासः उपनेत्रेण विना कार्यालयं गतवान् । (त्वरते)
३. .... वृद्धः काफीपानीयं पातुम् इच्छति । (जृम्भते)
४. धेनोः पादाः .... सन्ति । (कम्पन्ते)
५. .... भिक्षुक्यः देवालयस्य पुरतः उपविष्टवत्यः । (याचन्ते)
६. .... मित्रं माम् आहूतवत् । (मोदते)

IV. *उदाहरणानुगुणं वाक्यानि परिवर्तयत ।*

उदा - सैनिकाः युध्यन्ते । पुत्रान् स्मरन्ति ।
युध्यमानाः सैनिकाः पुत्रान् स्मरन्ति ।

१. अर्चकः स्नानं कुरुते । स्तोत्राणि वदति ।
.... ।

२. अश्विनी वाक्यं प्रयुङ्क्ते । चित्राणि दर्शयति ।
.... ।

३. मित्रं शेते । स्वप्नालापं करोति ।
.... ।

४. छात्राः सम्यक् अधीयते । उत्तमान् अङ्कान् प्राप्नुवन्ति ।
.... ।

५. ललनाः सुन्दरं भाषन्ते । जनान् आकर्षन्ति ।
.... ।

६. कीटाः बाधन्ते । सस्यानि नाशयन्ति ।
.... ।

७. राजकुमारः शोभते । सभां प्रविशति ।

.... ।

८. संन्यासी स्पन्दते । परिहारं सूचयति ।

.... ।

(**Note :** Compare your answers with those on the end of this book **(P.No. - 235)** and ascertain their correctness.)

२. पदसङ्ग्रहः

बन्ध् - to tie

१. बध्नाति, २. बध्यते, ३. भन्त्स्यति,

४. बन्द्धव्यम् - बन्धनीयम्, ५. बद्धः - बद्धा - बद्धम्, ६. बद्धवान् - वती, ७. बध्नन् - बध्नती, ८. बद्ध्वा - उद्बध्य ९. बन्धुम् ।

ब्रूञ् - to speak

१. ब्रवीति, २. उच्यते, ३. वक्ष्यति,

४. वक्तव्यम् - वदनीयम्, ५. उक्तः - उक्ता - उक्तम्, ६. उक्तवान् - उक्तवती, ७. ब्रुवन् - ब्रुवती, ८. उक्त्वा - प्रोच्य, ९. वक्तुम् ।

भू - to be

१. भवति, २. भूयते, ३. भविष्यति,

४. भवितव्यम् - भवनीयम्, ५. भूतः - भूता - भूतम्, ६. भूतवान् - वती, ७. भवन् - भवन्ती, ८. भूत्वा - अनुभूय, ९. भवितुम् ।

भ्रमु - to roam about

१. भ्राम्यति, २. भ्रम्यते, ३. भ्रमिष्यति,

४. भ्रमितव्यम् - भ्रमणीयम्, ५. भ्रान्तः - भ्रान्ता - भ्रान्तम्, ६. भ्रान्त-वान् - भ्रान्तवती, ७. भ्रमन् - भ्रमन्ती, ८. भ्रमित्वा - भ्रान्त्वा - परिभ्रम्य, ९. भ्रमितुम् ।

भ्रस्ज् - to fry

१. भृज्जति, २. भृज्ज्यते, ३. भ्रक्ष्यति,

४. भ्रष्टव्यम् - भर्ष्टव्यम् - भर्जनीयम् - भ्रज्जनीयम्, ५. भृष्टः - भृष्टा - भृष्टम्, ६. भृष्टवान् - भृष्टवती, ७. भृज्जन् - भृज्जन्ती - भृज्जती, ८. भृष्ट्वा - विभृज्ज्य, ९. भ्रष्टुम् - भर्ष्टुम् ।

३. प्रहेलिका

वृक्षाग्रवासी न च पक्षिजातिः
तृणं च शय्या न च राजयोगी ।
आपीतवर्णो न च हेमधातुः
अतश्च ताम्रः सुरसः क एषः ?

It resides in a tree, yet it is not a bird. It sleeps on grass, yet it is not a Yogin. It is yellow, yet not gold but delicious copper ! What is it ?

(Answer - आम्रः = Mango fruit, Here the word अतः has two meanings 'therefore' and 'without the letter त', the word ताम्रः minus त is आम्रः)

४. सुभाषितम्

१३. सत्यं तपो ज्ञानमहिंसतां च
विद्वत्प्रणामं च सुशीलतां च ।
एतानि यो धारयते स विद्वान्
न तत्र शास्त्राध्ययनं हि कारणम् ।।

पदविभागः

सत्यम्, तपः, ज्ञानम्, अहिंसताम्, च, विद्वत्प्रणामम्, च, सुशीलताम्, च, एतानि, यः, धारयते, सः, विद्वान्, न, तत्र, शास्त्राध्ययनम्, हि, कारणम् ।।

सन्धिः

तपः + ज्ञानम् - विसर्गसन्धिः(उकारः), यः + धारयते - विसर्गसन्धिः (उकारः), सः + विद्वान् - विसर्गसन्धिः (लोपः), शास्त्र + अध्ययनम् - सवर्णदीर्घसन्धिः ।

तात्पर्यम्

A truly learned man is one who is truthful, does penance, has wisdom, practises non-violence, has respect for scholars and has good conduct. Study of the various branches of science alone does not make a man learned.

अन्वयार्थः

सः विद्वान् - He is a learned man, यः - who, धारयते - possesses, सत्यम् - truthfulness, तपः - penance, ज्ञानम् - wisdom. अहिंसताम् - non-violence, विद्वत्प्रणामम् - regard for scholars, सुशीलतां च - and good conduct. तत्र - In this matter, शास्त्राध्ययनम् - study of the Shastras, न कारणम् - is not the cause.

१४. करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयोः
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥

पदविभागः

करे, श्लाघ्यः, त्यागः, शिरसि, गुरुपादप्रणयिता, मुखे, सत्या, वाणी, विजयि, भुजयोः, वीर्यम्, अतुलम्, हृदि, स्वच्छा, वृत्तिः, श्रुतम्, अधिगतम्, च, श्रवणयोः, विना, अपि, ऐश्वर्येण, प्रकृतिमहताम्, मण्डनम्, इदम् ।

सन्धिः

श्लाघ्यः + त्यागः - विसर्गसन्धिः (सकारः), भुजयोः + वीर्यमतुलम् - विसर्गसन्धिः (रेफः), विना + अपि - सवर्णदीर्घसन्धिः, अपि + ऐश्वर्येण - यण्सन्धिः

तात्पर्यम्

Giving charity adorns the hand; bowing down before elders adorns the head; truthful words adorn the mouth; the strength that brings victory adorns the arms; a clear conscience adorns the heart, well assimilated knowledge adorns the ears, even without material wealth, these adorn great men.

अन्वयार्थः

श्लाघ्यः त्यागः - Laudable charity, करे - is for the hand, गुरुपादप्रणयिता - bowing down to elders, शिरसि - is for the head; अतुलं विजयि वीर्यं - enormous strength that brings victory,

भुजयोः - is for the arms; स्वच्छा वृत्तिः - clean conduct, हृदि - is for the heart, अधिगतं श्रुतम् - well assimilated knowledge, श्रवणयोः - is for the ears; विना अपि - even without, ऐश्वर्येण - material wealth, इदं - all this, मण्डनं - is the decoration, प्रकृतिमहतां - for great men.

५. काव्यकथा

भीमयुधिष्ठिरयोः संवादः[a] । अर्जुनस्य इन्द्रकीलप्रयाणम् ।

द्रौपद्या[1] वचनानन्तरं भीमसेनो[2] वक्तुमारम्भं कृतवान् । स[3] तस्या[4] वचनं श्रेष्ठमिति चिन्तितवान् । भीमः कथयति - ''अग्रज ! द्रौपद्या[5] वचनं रमणीयम् । बृहस्पतिरप्येवं[6] वक्तुं न शक्तः । तस्या[7] वचनम् अर्थगर्भितम् । अतस्तस्याः[8] वचनं स्वीकुरु । तव बुद्धिर्विद्यासु[9] परिणता[b] । कथं कौरवाणां विषये सा नष्टा ? देवा[10] अपि पूर्वमस्माकं पौरुषमभिनन्दन्ति स्म । इदानीं तेऽपहास्यं[11] कुर्वन्ति । पौरुषं प्रधानम् । न दैन्यम् । त्वं द्वादशवर्षाणामवधिनिरीक्षणं[c] करोषि । तद्व्यर्थम्[12] । सम्पदोऽनुभूय[13] को[14] वा प्रत्यर्पयति[d] ? अथवा यदि स्वीकुर्मः, तत् अपमानमस्माकम् । अतः शान्तिमार्गं परित्यज्य वीरमार्गम् आश्रय । युद्धं कुर्मः । शत्रूणां नाशो[15] भवतु'' इति ।

भीमस्य वचनं श्रुत्वा युधिष्ठिरः उपदेशमारब्धवान् - ''तव वचनम् अर्थपूर्णम् । तथापि अहं किञ्चिच्चिन्तयामि[16] । सर्वं कार्यं त्वरया[e] न कर्तव्यम् ।

---

1. द्रौपद्याः + वचनानन्तरम् = वि.सन्धिः (लोपः) 2. भीमसेनः + वक्तुम् = वि.सन्धिः (उ) + गुणसन्धिः, 3. सः + तस्याः = वि.सन्धिः (लोपः), 4. तस्याः + वचनम् = वि.सन्धिः (लोपः), 5. द्रौपद्याः + वचनम् = वि.सन्धिः (लोपः) 6. बृहस्पतिः + अपि + एवम् = वि.सन्धिः (र) + यण्सन्धिः, 7. तस्याः + वचनम् = वि.सन्धिः (लोपः), 8. अतः + तस्याः = वि.सन्धिः (सकारः), 9. बुद्धिः + विद्यासु = वि. सन्धिः (रेफः), 10. देवाः + अपि = वि.सन्धिः (लोपः), 11. ते + अपहास्यम् = पूर्वरूपसन्धिः, 12. तत् + व्यर्थम् - जश्त्वसन्धिः, 13. सम्पदः + अनुभूय = वि. सन्धि (उ) + गुणः + पू.रूपसन्धिः, 14. कः + वा = वि. सन्धिः (उ) + गुणः, 15. नाशः + भवतु = वि.सन्धिः (उ) + गुणः, 16. किञ्चित् + चिन्तयामि = श्चुत्वसन्धिः,

---

a. conversation, b. trained c. awaiting the deadline, d. returns, e. hastily,

विमर्श [17]आवश्यकः । इन्द्रियाणां निग्रहोऽवश्यं[18] कर्तव्यः । शान्तिः प्रधानं साधनम् । दुष्टास्तत्काले[19] सुखमनुभवन्ति । अन्ते विनश्यन्ति'' इति ।

तस्मिन्नेव[20] समये आश्रमं व्यासमुनिरागतवान्[21] । युधिष्ठिरोऽतीव[22] सन्तुष्टः । पूजासत्कारं कृतवान् । अनन्तरं धर्मराजो[23] वक्तुमारब्धवान् - ''मुनिश्रेष्ठ ! तव आगमनेन अस्माकं जन्म सफलम् । त्वं निःस्पृहः[f] । अस्माकं समीपे किं वा पृच्छसि ? [24]अतस्तवागमनप्रयोजनं[25] न पृष्टवान् अहम् । तथापि तव वचनं श्रोतुमिच्छामि'' इति ।

युधिष्ठिरस्य वचनं श्रुत्वा व्यासमहर्षिरुक्तवान्[26] - ''राजश्रेष्ठ ! त्वं सर्वेषु समानां प्रीतिं निक्षिप्तवान् । तव स्वभावोऽभिनन्दनीयः[27] । मुनिष्वपि[28] तवायं[29] स्वभावः स्तुतियोग्यः । तव गुणैरहं[30] सन्तुष्टः । वयं मोक्षं प्राप्तुं प्रयत्नं कुर्मः । कस्मिन्नपि[31] विशेषप्रीतिरस्माकं[32] नास्ति[33] । तथापि[34] साधुजनेषु [35]विशेषप्रीतिर्भवत्येव[36] । अतः उपदेशवचनानि कथयामि । दुर्योधनः शस्त्रास्त्रसङ्ग्रहं कृतवान् । [37]भवत्स्वपि[g] शूरः अर्जुनः शस्त्रसङ्ग्रहं करोतु । सः पशुपतिम् उद्दिश्य तपः कृत्वा 'पाशुपतास्त्रं' सम्पादयतु । अहम् एकं मन्त्रम् उपदिशामि । तेन मन्त्रेण तपः आचरितुं शक्यते । प्रथमं तपसा इन्द्रः आराधनीयः । इन्द्रस्यानुग्रहेण[38] पराक्रमः भवति । अहम् एकं यक्षं प्रेषयामि ।

---

17. विमर्शः + आवश्यकः = वि.सन्धिः (लोपः), 18. निग्रहः + अवश्यम् = विसर्गसन्धिः (उ) + गुणः + पूर्वरूपसन्धिः, 19. दुष्टाः + तत्काले = वि.सन्धिः (सकारः), 20. तस्मिन् + एव = ङमुडागमसन्धिः, 21. व्यासमुनिः + आगतवान् = विसर्गसन्धिः (रेफः), 22. युधिष्ठिरः + अतीव = वि.सन्धिः (उ) + गुणः + पूर्वरूपसन्धिः, 23. धर्मराजः + वक्तुम् = वि.सन्धिः (उ) + गुणः, 24. अतः + तवागमनप्रयोजनम् = वि.सन्धिः (स), 25. तव + आगमनप्रयोजनम् = सवर्णदीर्घसन्धिः, 26. महर्षिः + उक्तवान् = वि.सन्धिः (रेफः), 27. स्वभावः + अभिनन्दनीयः = वि.सन्धिः (उ) + गुणः + पूर्वरूपसन्धिः, 28. मुनिषु + अपि = यण्सन्धिः, 29. तव + अयम् = सवर्णदीर्घसन्धिः, 30. गुणैः + अहम् = वि.सन्धिः (रेफः), 31. कस्मिन् + अपि = ङमुडागमसन्धिः, 32. विशेषप्रीतिः + अस्माकम् = विसर्गसन्धिः (रेफः), 33. न + अस्ति = सवर्णदीर्घसन्धिः, 34. तथा + अपि = सवर्णदीर्घसन्धिः, 35. विशेषप्रीतिः + भवति = वि.सन्धिः (रेफः), 36. भवति + एव = यण्सन्धिः, 37. भवत्सु + अपि = यण्सन्धिः, 38. इन्द्रस्य + अनुग्रहेण = सवर्णदीर्घसन्धिः,

---

f. one who is free of desire, g. amongst you also.

सः अर्जुनं तपोवनं नयति ।'' एवमुक्त्वा व्यासः अदृश्यो[39] जातः ।

यक्ष[40] आगतः । अर्जुनः गमनार्थं सिद्धः । तदा द्रौपदी कथयति - ''फलपर्यन्तं तपस्यामाचर । शत्रूणां जयार्थं सामर्थ्यं सम्पादनीयम् । व्यासवचनमनुसर । अस्माकं मनोरथः सफलो[41] भवतु'' इति ।

अर्जुनो[42] दुर्योधनादीन् शत्रून् स्मृतवान् । स[43] कवचं धृतवान् ; यक्षेण सह गतवान् । आकाशे पुष्पवृष्टिरभवत्[44] ।

प्रश्नाः

१. के पूर्वं पाण्डवानां पौरुषम् अभिनन्दन्ति स्म ?
२. दुष्टाः कदा सुखम् अनुभवन्ति ? कदा च विनश्यन्ति ?
३. कस्य आगमनेन केषां जन्म सफलम् ?
४. कुत्र केषां विशेषप्रीतिः भवति ?
५. इन्द्रः केन आराधनीयः ? ततः किं भवति ?

६. अन्वयरचना

१६. यावदेतान् निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ।।

पदविभागः

यावत्, एतान्, निरीक्षे, अहम्, योद्धुकामान्, अवस्थितान्, कैः, मया, सह, योद्धव्यम्, अस्मिन्, रणसमुद्यमे ।

सन्धिः

यावत् + एतान् - जश्त्वसन्धिः
निरीक्षे + अहम् - पूर्वरूपसन्धिः
कैः + मया - विसर्गसन्धिः (रेफः)

तात्पर्यम्

Arjuna who asked Srikrishna to stop the chariot between the two armies, now tells the reason for his request. "Let me see

---

39. अदृश्यः + जातः = वि.सन्धिः (उकारः) + गुणः, 40. यक्षः + आगतः = वि.सन्धिः (लोपः), 41. सफलः + भवतु = वि.सन्धिः (उकारः), 42. अर्जुनः + दुर्योधनादीन् = वि.सन्धिः (उकारः) + गुणः, 43. सः + कवचम् = वि.सन्धिः (लोपः), 44. पुष्पवृष्टिः + अभवत् = वि.सन्धिः (रेफः)

those who have come here with a desire to fight and know who I have to combat in this battle. Stop the chariot until I take a good look at all of them"

वाक्यविश्लेषणम्

क्रिया	कः	कम्	केन सह	कुत्र	
निरीक्षे	अहम्	योद्धुकामान् अवस्थितान् एतान्			यावत्
योद्धव्यम्	मया		कैः	अस्मिन् रणसमुद्यमे	(इति)

* The indeclinable **यावत्** along with **तावत्** means 'as long as'. Here it is to be taken with the phrase **'रथं स्थापय'** found in the previous sloka. It means **यावत् निरीक्षे तावत् स्थापय** stop the chariot in between the two armies (until I get a complete view of all those present). Therefore the word **यावत्** is not included in the **अन्वयरचना** of the present sloka.

अन्वयरचना

निरीक्षे
कः निरीक्षे ? - अहम्
कान् निरीक्षे ? - एतान्
कीदृशान् एतान् ? अवस्थितान्
पुनः कीदृशान् ? - योद्धुकामान्
किम् इति निरीक्षे ? - कैः सह योद्धव्यम् (इति) ।
केन योद्धव्यम् ? - मया
कुत्र योद्धव्यम् ? - रणसमुद्यमे
कीदृशे रणसमुद्यमे ? - अस्मिन्

१७. योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥

पदविभागः

योत्स्यमानान्, अवेक्षे, अहम्, ये, एते, अत्र, समागताः, धार्तराष्ट्रस्य, दुर्बुद्धेः, युद्धे, प्रियचिकीर्षवः ।

सन्धिः

अवेक्षे + अहम् - पूर्वरूपम्, ये + एते = यान्तादेशः + यलोपः, एते + अत्र = पूर्वरूपम्, दुर्बुद्धेः + युद्धे = विसर्गसन्धिः (रेफः)

तात्पर्यम्

I shall see all those who have come herc to fight with a desire to help the vicious Duryodhana, the son of Dhritarashtra.

वाक्यविश्लेषणम्

क्रिया	कः	कम्	कुत्र
अवेक्षे	अहम्	योत्स्यमानान्	--
(सन्ति)	ये एते समागताः (ते) प्रियचिकीर्षवः दुर्बुद्धेः धार्तराष्ट्रस्य	------	अत्र युद्धे

अन्वयरचना

अवेक्षे - क्रियापदम्
कः अवेक्षे ? - अहम्
कान् अवेक्षे ? - योत्स्यमानान्
(सन्ति)
के सन्ति ? - एते
कीदृशाः एते ? - समागताः
कुत्र समागताः ? - अत्र
पुनः कीदृशाः ? - प्रियचिकीर्षवः
कस्य प्रियचिकीर्षवः ? - धार्तराष्ट्रस्य
कीदृशस्य धार्तराष्ट्रस्य ? - दुर्बुद्धेः
कुत्र प्रियचिकीर्षवः ? - युद्धे

१८. एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ।।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ।

पदविभागः

एवम्, उक्तः, हृषीकेशः, गुडाकेशेन, भारत, सेनयोः, उभयोः, मध्ये, स्थापयित्वा, रथोत्तमम्, उवाच, पार्थ, पश्य, एतान्, समवेतान्, कुरून्, इति ।

सन्धिः

उक्तः + हृषीकेशः + गुडाकेशेन - विसर्गसन्धिः (उकारः) + गुणः
सेनयोः + उभयोः + मध्ये = विसर्गसन्धिः (रेफः)
पश्य + एतान् = वृद्धिसन्धिः

तात्पर्यम्

Oh! King, on being told thus by Arjuna (गुडाकेशः), Srikrishna (हृषीकेशः) took the best of the chariots between the two armies and said 'Oh Partha ! see these Kurus gathered here.

वाक्यविश्लेषणम्

(For continuity in meaning the first half of the next verse is included here itself. Thus you have one and a half sloka here.)

* **उवाच** and **पश्य** are the two main verbs in this sloka. Hence there are two sentences.
* Sanjaya addresses Dhritarashtra as 'भारत' ।
* Srikrishna addresses Arjuna as 'पार्थ' ।

क्रिया	सम्बोधनम्	कर्तृपदम्	कर्मपदम्	कुत्र
उक्तः (क्तान्तः) (कर्मणि)	---	गुडाकेशेन	हृषीकेशः	....
	भारत	---	---	
स्थापयित्वा (क्त्वान्तः)		(हृषीकेशः)	रथोत्तमम्	मध्ये ← सेनयोः उभयोः

१	उवाच		(हृषीकेशः)	(पार्थम्) समवेतान्	
२	पश्य	पार्थ	(त्वम्)	एतान् कुरून्	

अन्वयरचना

भारत ! - सम्बोधनम्
उवाच - क्रियापदम्
कः उवाच ? - हृषीकेशः
कीदृशः हृषीकेशः ? - उक्तः
कथम् उक्तः ? - एवम्
केन उक्तः ? - गुडाकेशेन
किं कृत्वा उवाच ? - स्थापयित्वा
कं स्थापयित्वा ? - रथोत्तमम्
कुत्र स्थापयित्वा ? - मध्ये
कयोः मध्ये ? - उभयोः सेनयोः
किम् उवाच ? - पार्थ ! (सम्बोधनम्) पश्य इति ।
कः पश्य ? - त्वम्
कान् पश्य ? - कुरून्
कीदृशान् कुरून् ? - समवेतान्
पुनः कीदृशान् ? - एतान्

७. सन्धयः

विसर्गसन्धिः - २

२. विसर्गस्य लोपः

Observe the following sentences.

१. **मुकुन्द एवम्** अवदत् ।
२. संस्कृतं **बहव इच्छन्ति** ।
३. पूर्वस्यां दिशि **सूर्य उदेति** ।

४. षड्वादने **बालका आगताः** ।
५. प्रजाप्रभुत्वे **जना एव** निर्णायकाः ।
६. **बान्धवा मङ्गलवासरे** आगताः ।
७. एतस्मिन् पुस्तके **कथा दीर्घाः** सन्ति ।
८. **एष गोपालः** महाचतुरः ।
९. **स एव** खलु भवता दृष्टः ?
१०. **स विद्यालयः** उत्तमः अस्ति ।

In the examples above a visarga has elided in words that are printed in bold type.

There are three rules connected with विसर्गलोप सन्धिः ।

1. A visarga preceded by अकार and followed by any vowel except ह्रस्व-अकार, disappears (elides).

   Eg. - मुकुन्दः + एवम् = मुकुन्द एवम्
   बहवः + इच्छन्ति = बहव इच्छन्ति
   सूर्यः + उदेति = सूर्य उदेति ।

2. A visarga preceded by आकार and followed by either a vowel or a soft consonant (मृदुव्यञ्जनम्) elides.

   Eg. - बालकाः + आगताः = बालका आगताः
   जनाः + एव = जना एव
   बान्धवाः + मङ्गलवासरे = बान्धवा मङ्गलवासरे
   कथाः + दीर्घाः = कथा दीर्घाः

3. The visarga in the words सः and एषः When followed by any letter except ह्रस्व-अकार, elides.

   Eg. - एषः + गोपालः = एष गोपालः
   सः + एव = स एव
   सः + विद्यालयः = स विद्यालयः

Here are a few more examples of विसर्गलोपः

१. सञ्जयः + उवाच = सञ्जय उवाच
२. अन्तवन्तः + इमे = अन्तवन्त इमे

३. देहाः + नित्यस्य = देहा नित्यस्य
४. यः + एतम् = य एतम्
५. सः + पुरुषः = स पुरुषः
६. अशोष्यः + एव = अशोष्य एव
७. योगः + उच्यते = योग उच्यते
८. युक्तः + आसीत = युक्त आसीत
९. देवाः + भावयन्तु = देवा भावयन्तु
१०. देवाः + दास्यन्ते = देवा दास्यन्ते

अभ्यासः

I. Join sandhis.

१. अध्यापकः + आगतः = ...
२. सः + इष्टवान् = ...
३. बालाः + इच्छन्ति = ...
४. तरुणः + इव = ...
५. एषः + उत्तमः = ...
६. सर्वः + एव = ...
७. भक्ताः + नमन्तु = ...
८. भक्ताः + अर्चन्तु = ...
९. छात्राः + लिखन्तु = ...
१०. धर्मः + उक्तः = ...

II. Split sandhis.

१. श्रेष्ठा लताः = ... + ...
२. लता दीर्घाः = ... + ...
३. दीर्घा मार्गाः = ... + ...
४. पाठा बोधिताः = ... + ...
५. बोधिता उपायाः = ... + ...
६. उत्तमा बालाः = ... + ...
७. बाला अनलसाः = ... + ...
८. अलसा उपेक्षार्हाः = ... + ...

९. उपेक्षार्हा निन्द्याः = ... + ...

१०. निन्द्या निन्द्यन्ते = ... + ...

८. लौकिकन्यायाः

१३. घट्टकुटीप्रभातन्यायः - घट्टकुटी is a toll-station. A person travelling in a bullock-cart neared a toll station at night fall. In order to avoid paying toll he took a deviation with the intention of bypassing the toll gate and joining the main road further up. But unfortunately he lost his way and travelled the whole night ending up at the same toll-station at dawn !
This maxim is quoted when a lot of efforts doesnot bring the desired result.

१४. घुणाक्षरन्यायः - घुण is an insect that eats into timber. It bores wooden posts and planks making incisions that sometimes resemble a syllable or some other shape. The worm doesnot do it with the the intention of inscribing anything. Still we see a letter or a form. Thus while doing something if something unintentional appears to have been done, this न्याय is quoted.

९. सङ्ख्याविषयाः

अ. **अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः ।**
कृपः परशुरामश्च सप्तैते चिरजीविनः ।।

Ashwatthaman, Bali, Vyasa, Hanuman, Vibhishana, Krupa, Parashurama - these seven are chiranjeevins.

अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ।।

Ayodhya, Mathura, Haridwar (माया), Kashi, Kanchi, Ujjain (अवन्तिका), Puri Dwaraka, (द्वारावती पुरी) - these seven cities are called मोक्षदायिकाः (places where emancipation is achieved easily).

आ. Valmiki Ramayana in Samskrit is the source for all other Ramayanas. Ramayana is rewritten in many other Indian languages. The greatness of the work can be known from the fact that there are Ramayanas written in foreign languages too. Some of the well known Ramayanas in Indian languages are as follows.

Kannada	-	Pampa Ramayana
Telugu	-	Bhaskara Ramayana
Hindi	-	Ramacharitamanas
Bengali	-	Krittivasa Ramayana
Oriya	-	Vilanka Ramayana
Tamil	-	Kamba Ramayana
Malayalam	-	Adhyatma Ramayana

●●

शिक्षा - सप्तमः पाठः

प्रश्नाः

I. परस्मैपदधातूनां शत्रन्तपुंलिङ्गैकवचनान्तं रूपम् आत्मनेपदधातूनां शानजन्तं रूपं च यथोदाहरणं लिखत ।

उदा - पठति - पठन्, वन्दते - वन्दमानः

१. एधते - .... २. गच्छति - ....
३. करोति - .... ४. कुरुते - ....
५. वर्धते - .... ६. क्रीडति - ....
७. वेपते - .... ८. शक्नोति - ....
९. भुङ्क्ते - .... १०. गृह्णीते - ....

II. संस्कृतेन उत्तरयत ।

१. शास्त्राध्ययनं कस्य कारणं न ?
२. 'घुणः' नाम कः ?
३. योत्स्यमानाः कीदृशाः ?
४. रथं सेनयोः मध्ये स्थापयित्वा कृष्णः किम् उवाच ?
५. 'स गणेशः' इत्यत्र किमर्थं विसर्गस्य लोपः जातः ?

III. योजयत ।

अ	आ
१. करे	अ. गुरुपादप्रणयिता
२. शिरसि	आ. श्लाघ्यः त्यागः
३. हृदये	इ. सत्या वाणी
४. भुजयोः	ई. स्वच्छा वृतिः
५. मुखे	उ. अतुलं वीर्यम्

(**Note:** Answers for the above exercises are given in the end of this book. **(P.No. - 235)** After completing them, check your answers.)

शिक्षा - अष्टमः पाठः

।। वृत्तेन हि भवत्यार्यो न धनेन न विद्यया ।।

Good conduct makes one noble, neither wealth nor learning does.

१. कृदन्ताः

शानच्प्रत्ययः - २

In the previous lesson you got familiar with the nominative forms of शानच् प्रत्ययान्त words. In this lesson you will learn all the other vibhakti forms.

१. नारदः **वन्दमानं** ध्रुवकुमारम् [1]उत्थाप्य उक्तवान् ।

२. दशरथः [2]**वर्धमानान्** बालान् दृष्ट्वा हृष्टवान् ।

३. **भाषमाणेन** राजकीयपुरुषेण बहु प्रलपितम् ।

४. कार्यं **कुर्वाणैः** सर्वैरपि प्रायः फलं लभ्यते एव ।

५. धनं [3]**कामयमानाय** [4]कृपणाय अन्यत् किमपि न रोचते ।

६. **याचमानेभ्यः** भिक्षुकेभ्यः प्रायः सर्वे कुप्यन्ति ।

७. किञ्चित् [5]**स्पन्दमानादपि** वृक्षात् फलानि पतितानि ।

८. गुहासु **वर्तमानेभ्यः** व्याघ्रेभ्यः मृगाः भीताः ।

९. भाषणम् **आरभमाणस्य** उपन्यासकस्य अभिमुखं सर्वे स्वमुखं [6]परिवर्तितवन्तः ।

१०. [7]**प्रयतमानानां** कार्यसिद्धिः अवश्यं भवत्येव ।

११. देवं **सेवमाने** भक्ते शान्तिः वर्तते ।

---

1. having raised (made to get up) 2. growing (द्वि.वि.) 3. to him who is desiring 4. miser 5. form the shaking (tree) 6. turned 7. for those who put efforts

१२. **अधीयानेषु**[8] छात्रेषु श्रद्धा भवेत् एव ।
१३. [9]इतस्ततः **कम्पमानां** [10]रज्जुं दृष्ट्वा सः सर्पः इति भ्रान्तिं प्राप्तवान् ।
१४. **भजमानाः** पौत्रीः दृष्ट्वा पितामही सन्तुष्टा ।
१५. **बाधमानया** शिरोवेदनया मम भगिनी अस्वस्था ।
१६. **भिक्षमाणाभिः**[11] भिक्षुकीभिः सन्तोषः अनुभूतः किम् ?
१७. विशेषेण [12]**आलोचमानायै** लेखिकायै प्रशस्तिः प्रदत्ता ।
१८. **विक्रीणानाभ्यः**[13] शिक्षार्थिनीभ्यः पुस्तकं स्वीकुर्वन्तु ।
१९. [14]**उड्डयमानायाः** [15]श्येन्याः [16]शुकशावकः अत्यन्तं भीतः ।
२०. **स्पर्धमानाभ्यः** शिक्षार्थिनीभ्यः प्रशस्तिः दीयताम् ।
२१. रावणम् एव **आशङ्कमानायाः** सीतायाः मनसि हनूमतः दर्शनात् भीतिः उत्पन्ना ।
२२. **वेपमानानां**[17] युवतीनां बान्धवाः तत्र आगताः ।
२३. **खिद्यमानायां** वृद्धायां नूतनः अभिलाषः उत्पन्नः ।
२४. **स्पर्धमानासु** बालिकासु शालिनी तीक्ष्णमतिः ।
२५. आतपे[18] **प्रतीक्षमाणेभ्यः** मित्रेभ्यः पानकं रोचते ।
२६. **लम्बमानानि** फलानि स्वीकरोतु ।

Note 1. In the sentences above you find the singular and plural forms of शानजन्त (masculine and feminine) in all the vibhaktis and a few neuter gender forms too.

2. You might have observed that the **शानच्** forms are **अकारान्त** and declined like **राम** and **फल** in masculine and neuter genders and in feminine they are आकारान्त and resemble **रमाशब्दः** ।

अभ्यासः

I. *अधस्तनशब्दानाम् एकवचनान्तानि सूचितविभक्तिरूपाणि लिखत ।*

उदा - कम्पमाना वृद्धा - पञ्चमी - कम्पमानायाः वृद्धायाः

8. in those who are studying 9. hither and thither 10. rope (द्वि.वि.) 11. by those (स्त्री) who are begging 12. to the one who is thinking 13. from those (स्त्री) who are selling 14. flying 15. female hawk 16. Young one of a parrot 17. of those (who are) trembling 18. in hot Sun

१. जृम्भमाणः नाविकः - द्वितीया ....
२. आरभमाणा चर्चा - सप्तमी ....
३. विद्यमानं पुस्तकम् - पञ्चमी ....
४. प्रकाशमानः सूर्यः - तृतीया ....
५. दीप्यमानं मुखम् - चतुर्थी ....
६. त्रायमाणः देवः - षष्ठी ....
७. गृह्णानः मर्कटः - तृतीया ....
८. शयाना पुत्री - सप्तमी ....
९. जानाना सा - पञ्चमी ....
१०. तन्वानः सौचिकः - द्वितीया ....

II. *अधस्तनशब्दानां बहुवचनान्तरूपाणि लिखत ।*

उदा - युध्यमानं वीरम् - युध्यमानान् वीरान्

१. बुध्यमानात् विषयात् ....
२. राजमानं सिंहासनम् ....
३. चेष्टमानेन बालेन ....
४. त्वरमाणया अधिकारिण्या ....
५. प्रयतमानाय शिक्षकाय ....
६. भुञ्जानायाः नायिकायाः (षष्ठी)............. ....
७. बाधमानायां चिन्तायाम् ....
८. स्पन्दमानायै बालिकायै ....
९. अधीयानस्य पितुः ....
१०. विक्रीणानायां निर्वाहिकायाम् ....

III. *आवरणे दत्तानां शब्दानाम् उचितैः रूपैः रिक्तस्थानानि पूरयत ।*

उदा - देवः वन्दमानं भक्तम् अनुगृह्णाति । (वन्दमानः)

१. .... पत्नीं पतिः आहूतवान् । (भुञ्जाना)
२. वेदम् .... वटुभिः गुरुः नमस्कृतः । (अधीयानाः)
३................. आपणिकेन वस्तुनः मूल्यम् उक्तम् । (विक्रीणानः)
४. .... छात्रेषु उत्साहः महान् अस्ति । (स्पर्धमानाः)

५. .... कुतृणानाम् उत्पाटनं कारय । (वर्धमानानि)
६. आत्मानं............. तरुणानां स्नेहम् अहं न इच्छामि ।
(बहुमन्यमानाः)
७. .... मातामह्याः साहाय्यम् अवश्यं भवता करणीयम् । (खिद्यमाना)
८. माता .... बालेभ्यः अधिकानि मोदकानि दत्तवती । (मोदमानाः)
९. .... शिक्षिकाभिः पाठः न कृतः । (त्वरमाणाः)
१०. .... सस्यानि कीटाः बाधन्ते । (जायमानानि)
११. .... चर्चायां प्रवेशः मास्तु । (प्रवर्तमाना)
१२. .... लेखस्य अग्रिमभागः अत्र अस्ति । (अनुवर्तमानः)
१३. .... आरक्षकैः बहुविधाः प्रश्नाः पृष्टाः । (आशङ्कमानाः)
१४. .... शाखायाः फलं स्वीकुरु । (लम्बमाना)
१५. .... तस्मै भवती जलं दत्तवती किम् ? (भाषमाणः)

IV. *विशेष्यानुगुणं शानजन्तरूपं प्रयुज्य वाक्यानि लिखत ।*

उदा - सा कार्यम् आरभते । देवं प्रार्थयति ।
कार्यम् आरभमाणा सा देवं प्रार्थयति ।

१. पुत्रः वेदनां सहते । तं माता प्रीत्या पश्यति ।
....
२. कण्ठहाराः शोभन्ते । तेभ्यः सा बहु धनं दत्तवती ।
....
३. देवः त्रायते । तस्मात् भक्तः वरं प्राप्तवान् ।
....
४. वृक्षाः कम्पन्ते । तेभ्यः बालाः फलानि स्वीकुर्वन्ति ।
....
५. महिलाः विद्यन्ते । तासां नामानि लावण्या स्मरति ।
....
६. व्याघ्रः प्रतीक्षन्ते । ताभ्यः राजकुमाराः भीताः ।
....

७. सहोदरी ईहते । तस्यां तृप्तिः दृश्यते ।

....

८. सख्यः प्रयतन्ते । ताः भवती परिशीलयतु ।

....

९. भिक्षुकाः याचन्ते । तेषां मुखे अद्य सन्तोषः दृश्यते ।

....

१०. पल्लवी रमते । तया सह अहं तिष्ठामि ।

....

(**Note :** Compare your answers with those on the end of this book (**P.No. - 236**) and ascertain their correctness.)

२. पदसङ्ग्रहः

मन् – to think, to conceive an idea

१. मन्यते, २. मन्यते, ३. मंस्यते,

४. मन्तव्यम् – मननीयम्, ५. मतः – मता – मतम्, ६. मतवान् – मतवती, ७. मन्यमानः – माना ८. मत्त्वा – प्रमत्य, ९. मन्तुम् ।

मस्ज् – to take a dip, to drown

१. मज्जति, २. मज्ज्यते, ३. मङ्क्ष्यति,

४. मङ्क्तव्यम् – मज्जनीयम्, ५. मग्नः – मग्ना – मग्नम्, ६. मग्नवान् – मग्नवती, ७. मज्जन् – मज्जन्ती – मज्जती, ८. मङ्क्त्वा – निमज्ज्य, ९. मङ्क्तुम् ।

मन्थ् – to churn

१. मथ्नाति, २. मथ्यते, ३. मन्थिष्यति,

४. मन्थितव्यम् – मन्थनीयम्, ५. मथितः – मथिता – मथितम्, ६. मथितवान् – मथितवती, ७. मथ्नन् – मथ्नती ८. मथित्वा – मन्थित्वा – प्रमथ्य – प्रमन्थ्य, ९. मन्थितुम् ।

मा – to measure

१. माति, २. मीयते, ३. मास्यति,

४. मातव्यम् – मानीयम्, ५. मितः – मिता – मितम्, ६. मितवान् मितवती, ७. मान् – मन्ती – माती, ८. मित्वा – प्रमाय, ९. मातुम् ।

मुच् - to leave, abondon

१. मुञ्चति, २. मुच्यते, ३. मोक्ष्यति,
४. मोक्तव्यम् - मोचनीयम्, ५. मुक्तः - मुक्ता - मुक्तम्, ६. मुक्तवान् - मुक्तवती, ७. मुञ्चन् - मुञ्चन्ती - मुञ्चती, ८. मुक्त्वा - विमुच्य, ९. मोक्तुम् ।

३. प्रहेलिका

अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने ।
शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः ।।

1. Apparent meaning - O ! Beautiful one ! I have seen something which is strange and lovely. It has 'शो' in the middle. If anybody makes out, what it is, he is learned no doubt.
   In this verse the superficial meaning is not the one that is intended.
2. Intended meaning - The thing which I have seen is अपूर्व (beginning with अ) and कान्त (ending with क). The letter शो is in between them.

The answer is अशोक. It is the name of the tree which he saw.

४. सुभाषितम्

१५. आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतम्
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ?

पदविभागः

आयुः, वर्षशतम्, नृणाम्, परिमितम्, रात्रौ, तदर्धम्, गतम्, तस्य, अर्धस्य, परस्य, च, अर्धम्, अपरम्, बालत्ववृद्धत्वयोः, शेषम्, व्याधिवियोगदुःखसहितम्, सेवादिभिः, नीयते, जीवे, वारितरङ्गचञ्चल-तरे, सौख्यम्, कुतः, प्राणिनाम् ।।

सन्धिः

आयुः + वर्षशतम् - विसर्गसन्धिः (रकार), तस्य + अर्धस्य - सवर्णदीर्घसन्धिः, च + अर्धम् - सवर्णदीर्घसन्धिः, सेवादिभिः + नीयते -

तात्पर्यम्

Men live for hundred years. Half of it is spent in sleep, half of the remaining time is spent in childhood and old age. The remaining twenty five years are spent serving others and suffering due to sickness, separation from dear ones etc. Thus when life is as unsteady as waves in water, where is any happiness for beings of this world ?

अन्वयः

नृणां वर्षशतम् आयुः परिमितम् । तदर्धं रात्रौ गतम् । परस्य तस्य अर्धस्य अपरमर्धं बालत्ववृद्धत्वयोः गतम् । व्याधिवियोगदुःखसहितं शेषं सेवादिभिः नीयते । वारितरङ्गचञ्चलतरे प्राणिनां सौख्यं कुतः ?

प्रतिपदार्थः

वर्षशतम् - A span of hundred years, परिमितम् - is fixed, आयुः - as the life time, नृणाम् - of men. तदर्धम् - Half of it, गतम् - is spent, रात्रौ - during the night; अपरम् अर्धम् - one half, परस्य तस्य अर्धस्य - of the remaining half (fifty years), बालत्ववृद्धत्वयोः - in childhood and old age. शेषम् - The remainder, व्याधिवियोग-दुःखसहितम् - which is full of sickness, separation from loved ones and misery, नीयते - is spent, सेवादिभिः - serving others etc. जीवे - In life, वारितरङ्गचञ्चलतरे - that is as unsteady as waves in water, कुतः सौख्यम् - where is any happiness, प्राणिनाम् - for beings ?

१६. फलमलमशनाय स्वादु पानाय तोयं
क्षितिरपि शयनार्थं वाससे वल्कलं च ।
नवधनमधुपानभ्रान्तसर्वेन्द्रियाणाम्
अविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ।

पदविभागः

फलम्, अलम्, अशनाय, स्वादु, पानाय, तोयम्, क्षितिः, अपि, शयनार्थम्, वाससे, वल्कलम्, च, नवधनमधुपानभ्रान्तसर्वेन्द्रियाणाम्, अविनयम्, अनुमन्तुम्, न, उत्सहे, दुर्जनानाम् ।

सन्धिः

क्षितिः + अपि - विसर्गसन्धिः, न + उत्सहे - गुणसन्धिः

तात्पर्यम्

A saint speaks - Fruits are enough to eat, sweet water is enough for a drink, the ground is good enough for a bed and a bark dress will do for clothing. But never will we accept a wicked man who has lost control over his senses due to the drink in the form of sudden wealth.

In this sloka the word अलम् which is in the sense of 'sufficient' - पर्याप्तम्, is used with words in चतुर्थीविभक्ति according to a rule of grammar.

प्रतिपदार्थः

अशनाय - To eat, फलम् - fruit, अलम् - is enough, पानाय - to drink, स्वादु - sweet, तोयम् - water, अलम् - is enough, शयनार्थम् - to sleep, क्षितिः - the ground, अलम् - is enough, वाससे - (and) for clothing, वल्कलम् - bark cloth, अलम् - is enough, (But) न उत्सहे - I do not want, अनुमन्तुम् - to approve, अविनयम् - arrogance (rude behaviour), दुर्जनानाम् - of the wicked, नवधन.. याणाम् - whose sense organs are confused by drinking the wine called new (recently acquired) wealth.

५. काव्यकथा

तपोभङ्गप्रयत्नः

[a]शरत्कालस्सन्निहितः[1] । भूमिर्धान्यसमृद्ध्या[2] पूर्णा अभवत् । नदीनां सरोवराणाञ्च[3] जलं निर्मलमभवत् । गगनतले पक्षिसमूहो[4] मधुरङ्गानम्[5] अकरोत् । सुगन्धो[6] मारुतः मन्दं [b]मन्दं प्रावहत् । दिशः प्रसन्नाः ।

---

1. शरत्कालः + सन्निहितः - विसर्गसन्धिः (स), 2. भूमिः + धान्यसमृद्ध्या - विसर्गसन्धिः (र), 3. सरोवराणां + च - परसवर्णसन्धिः, 4. पक्षिसमूहः + मधुरम् - विसर्गसन्धिः (उ) + गुणसन्धिः, 5. मधुरं + गानम् - परसवर्णसन्धिः, 6.. सुगन्धः + मारुतः - विसर्गसन्धिः (उ) + गुणसन्धिः,

अर्जुनः इन्द्रकीलपर्वतं प्राप्तः । यक्षः उक्तवान् - ''अर्जुन ! शस्त्रं धृत्वा [c]तपस्यां कुरु । तपसो[7] मध्ये विघ्ना[8] भवन्त्येव[9] । तथापि[10] तदनन्तरं कल्याणं भविष्यति । अत[11] इन्द्रियचापलं परित्यज । शिवस्तव[12] सन्तापं परिहरतु । इन्द्रो[13] लोकपालाश्च[14] तपस्सिद्धये सहाया[15] भवन्तु ।'' एवम् आशीर्वादं कृत्वा यक्षः स्वस्थानं गतः ।

अर्जुनः इन्द्रकीलपर्वतेऽवसत्[16] । । पर्वतसमीपे गङ्गानदी प्रवहति । स[17] प्रदेशोऽतीव[18] रमणीय[19] आसीत् । तथा वृक्षा[20] [d]भ्रमरैरावृताः[21] । पक्षिणो[22] मधुरनादेन [e]कूजन्ति । प्रायस्ते[23] अर्जुनाय जयघोषं [f]कुर्वन्तीव[24] । तत्र [g]कलहंसाः गङ्गाजले तरन्ति । तदपि दृश्यं बहु मनोहरम् । एवं रम्यं दृश्यम् अर्जुनो [25]दृष्टवान् ।

पर्वतस्य परिसरः प्रशान्तः । अर्जुनस्तत्र[26] तपस्यामारब्धवान् । सर्वाणीन्द्रियाणि[27] स्वाधीनानि कृतवान् । कठिनं तप[28] एव आचरितवान् । तथापि[29] तपोऽनुष्ठानेन तेन खेदो[30] नानुभूतः[31] । तपसः प्रभावेण तस्य शरीरमुज्ज्वलमभवत् । शरीरकान्तिः सर्वत्र प्रसृता [h] । अर्जुनस्य तपः

---

7. तपसः + मध्ये - विसर्गसन्धिः (उ) + गुणसन्धिः, 8. विघ्नाः + भवन्ति - विसर्गसन्धिः (लोपः), 9. भवन्ति + एव - यण्सन्धिः, 10. तथा + अपि - सवर्णदीर्घसन्धिः 11. अतः + इन्द्रियचापलम् - विसर्गसन्धिः (लोपः), 12. शिवः + तव - विसर्गसन्धिः (स), 13. इन्द्रः + लोकपालाः - विसर्गसन्धिः (उ) + गुणसन्धिः, 14. लोकपालाः + च - विसर्गसन्धिः(स) + श्चुत्वम्, 15. सहायाः + भवन्तु - विसर्गसन्धिः (लोपः), 16. पर्वते + अवसत् - पूर्वरूपसन्धिः, 17. सः + प्रदेशः - विसर्गसन्धिः (लोपः), 18. प्रदेशः + अतीव - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः, 19. रमणीयः + आसीत् - विसर्गसन्धिः (लोपः), 20. वृक्षाः + भ्रमरैः - विसर्गसन्धिः (र), 21. भ्रमरैः + आवृताः - विसर्गसन्धिः (र), 22. पक्षिणः + मधुरनादेन - विसर्गसन्धिः (उ) + गुणसन्धिः, 23. प्रायः + ते - विसर्गसन्धिः (स), 24. कुर्वन्ति + इव - सवर्णदीर्घसन्धिः, 25. अर्जुनः + दृष्टवान् - विसर्गसन्धिः (उ) + गुणसन्धिः, 26. अर्जुनः + तत्र - विसर्गसन्धिः (स), 27. सर्वाणि + इन्द्रियाणि - सवर्णदीर्घसन्धिः, 28. तपः + एव - विसर्गसन्धिः (लोपः), 29. तथा + अपि - सवर्णदीर्घसन्धिः, 30. खेदः + न - विसर्गसन्धिः (उ) + गुणसन्धिः, 31. न + अनुभूतः - सवर्णदीर्घसन्धिः,

---

a. Autumn, b. gently c. penance. d. by honey bees, e. chirp f. are doing as it were, g. swans, h. spread

प्रभावयुतं[i] जातम् । तत्र वने क्रूरमृगा[32] अपि हिंसाकार्यं [j]पर्यत्यजन् । वृक्षाः [k]पल्लवैस्समृद्धा[33] अभवन् । आकाशः अपि निर्मलः अभवत् । भूतलमपि [l]धूलिकणरहितञ्जातम्[34] ।

अर्जुनस्य तपोवैभवेन वनचराणां[m] कष्टञ्जातम्[35] । आहारविहारेषु क्लेशोऽनुभूतः[36] । ते सर्वे इन्द्रसमीपं गताः । अर्जुनस्य तपोविचारं तस्मै निवेदिवन्तः । इदं श्रुत्वा इन्द्रो[37] हृष्टः । किन्तु सः सन्तोषं न प्रकटितवान् । [38]सोऽर्जुनस्य परीक्षां कर्तुम् इष्टवान् । इन्द्रः अर्जुनस्य तपोभङ्गं कर्तुम् अप्सरसां [n]सकाशे उक्तवान् - ''कटाक्षपातैः[o] अर्जुनस्य वशीकरणं कर्तव्यम् । शापभयं मास्तु'' इति । अप्सरसः प्रस्थिताः । ताः [39]विविधै-र्भूषणैर्विभूषिताः[40] । तपोविघ्नार्थं ताः [41]उच्चैर्वार्तालापं कृतवत्यः । हाव-भावान् प्रदर्शितवत्यः । किन्तु अर्जुनो[42] न विचलितः । स[43] जितेन्द्रियः । अतस्तासां[44] चेष्टा[45] विफला[46] जाताः । ताः स्वस्थानं प्रतिनिवृत्ताः ।

प्रश्नाः

१. अर्जुनः कुत्र अवसत् ?
२. तपसः प्रभावेण किम् अभवत् ?
३. वनचराणां कष्टं किमर्थं जातम् ?
४. इन्द्रः अप्सरसः किम् उक्तवान् ?
५. अप्सरसां चेष्टाः किमर्थं विफलाः जाताः ?

---

32. क्रूरमृगाः + अपि - विसर्ग-सन्धिः (लोपः), 33. समृद्धाः + अभवन् - विसर्गसन्धिः (लोपः), 34.रहितं + जातम् - परसवर्णसन्धिः 35. कष्टं + जातम् - परसवर्णसन्धिः, 36. क्लेशः + अनुभूतः - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः, 37. इन्द्रः + हृष्टः - विसर्गसन्धिः (उ) + गुणसन्धिः, 38. सः + अर्जुनस्य - विसर्गसन्धिः (उ) + गुणः + पूर्वरूपः 39. विविधैः + भूषणैः - विसर्गसन्धिः (र), 40. भूषणैः + विभूषिताः - विसर्गसन्धिः (र), 41. उच्चैः + वार्तालापम् - विसर्गसन्धिः (र), 42. अर्जुनः + न - विसर्गसन्धिः (उ) + गुणसन्धिः, 43. सः + जितेन्द्रियः - विसर्गसन्धिः (लोपः), 44. अतः + तासाम् - विसर्गसन्धिः (स), 45. चेष्टाः + विफलाः - विसर्गसन्धिः (लोपः), 46. विफलाः + जाताः - विसर्गसन्धिः (लोपः)

---

i. powerful, j. gave up, k. tender leaves, l. without dust, m. forest dwellers n. near in the presence of, o. by the side glances

६. अन्वयरचना

११. तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान् ।
कृपया परयाविष्टः विषीदन्निदमब्रवीत् ॥

पदविभागः

तान्, समीक्ष्य, सः, कौन्तेयः, सर्वान्, बन्धून्, अवस्थितान्, कृपया, परया, आविष्टः, विषीदन्, इदम्, अब्रवीत् ।

सन्धिः

सः + कौन्तेयः - *विसर्गसन्धिः - लोपः*, परया + आविष्टः - *सवर्णदीर्घसन्धिः*, विषीदन् + इदम् - *ङमुडागमसन्धिः*

तात्पर्यम्

Arjuna saw the army of Kauravas. There he found all his kith and kin.On seeing them he was overcome by compassion. There were his preceptors, brothers, sons, grand sons and relations and friends. He thought he would be committing a sin if he killed all of them. He became despondent and spoke these (following) words to Krishna.

वाक्यविश्लेषणम्

क्रिया	कर्तृपदम्	कर्मपदम्	कया
आविष्टः (क्तान्त-कर्मणि)	---	----	परया कृपया
समीक्ष्य (ल्यबन्तम्)	कौन्तेयः सः विषीदन्	तान्, सर्वान् बन्धून्, अवस्थितान्	
अब्रवीत्	(")	इदम्	

अन्वयरचना

अब्रवीत् - *क्रियापदम्*
कः अब्रवीत् ? - कौन्तेयः
कीदृशः कौन्तेयः ? - सः
कीदृशः सः ? - आविष्टः

कया आविष्टः ? - कृपया
कीदृश्या कृपया ? - परया
किम् अब्रवीत् ? - इदम्
किं कृत्वा अब्रवीत् ? - समीक्ष्य
कान् समीक्ष्य ? - तान् बन्धून्
कीदृशान् बन्धून् ? - सर्वान्
पुनः कीदृशान् ? - अवस्थितान्
किं कुर्वन् अब्रवीत् ? - विषीदन्

२०. दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।।

पदविभागः

दृष्ट्वा इमम् - The remaining words in the sloka are not joined.

सन्धिः

दृष्ट्वा + इमम् - गुणसन्धिः

तात्पर्यम्

Seeing my own kinsmen who have come with a desire to fight, Oh Krishna ! my limbs are becoming weary and my mouth is parched.

वाक्यविश्लेषणम्

क्रिया	सम्बोधनम्	कर्तृपदम्	कर्म
दृष्ट्वा (क्त्वान्तम्)	---	---	युयुत्सुम् समुपस्थितम् इमम् स्वजनम्
सीदन्ति	कृष्ण	गात्राणि ← मम	
परिशुष्यति	---	मुखम्	

* 'स्वजनम्' is in singular. Since it is a collective noun, it means 'our people'.

अन्वयरचना

सीदन्ति - क्रियापदम्
कानि सीदन्ति ? - गात्राणि
कस्य गात्राणि ? - मम
किं कृत्वा सीदन्ति ? - दृष्ट्वा
कं दृष्ट्वा ? - इमं स्वजनम्
कीदृशं स्वजनम् ? - समुपस्थितम्
पुनः कीदृशम् ? - युयुत्सुम्
परिशुष्यति - क्रियापदम्
किं परिशुष्यति ? - मुखम्

२१. निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥

पदविभागः

श्रेयः, अनुपश्यामि, स्वजनम्, आहवे.

The remaining words in the sloka are not joined.

सन्धिः

श्रेयः + अनुपश्यामि - विसर्गसन्धिः (उकारः + गुणः)

तात्पर्यम्

Oh keshava ! I am seeing adverse omens around me. I do not perceive any good in slaying my own kinsmen in this war.

वाक्यविश्लेषणम्

क्रिया	*सम्बोधनम्*	*कर्तृपदम्*	*कर्मपदम्*	*कुत्र*
पश्यामि	केशव !	(अहम्)	विपरीतानि निमित्तानि	---
न अनुपश्यामि	---	(अहम्)	श्रेयः	---
हत्वा (क्त्वान्तम्)	---	---	स्वजनम्	आहवे

There are two principal sentences here.

* 'न' denotes absence/non-existence. It should always be taken with the verb. Therefore in **अन्वयरचना** also it is taken with the verb and a question is put accordingly.
* This sloka also has **'स्वजनम्'** in singular and as a collective noun it refers to many kinsmen.

अन्वयरचना

केशव - सम्बोधनम् (Vocative case of address)
पश्यामि - क्रियापदम्
कः पश्यामि ? - (अहम् - अध्याहृतम्)
कानि पश्यामि ? - निमित्तानि
कीदृशानि निमित्तानि ? - विपरीतानि
न अनुपश्यामि - क्रियापदम्
कः न अनुपश्यामि ? - (अहम्)
किं न अनुपश्यामि ? - श्रेयः
किं कृत्वा न अनुपश्यामि ? - हत्वा
कान् हत्वा ? - स्वजनम्
कुत्र हत्वा ? - आहवे

७. सन्धयः

विसर्गसन्धिः - ३

(where विसर्ग is replaced by रेफ)

Read the following examples.

१. **'गुरुर्ब्रह्मा'** इति श्लोकम् अहं जानामि ।
२. **देशभक्तिर्गरीयसी** लोके ।
३. इदानीं **हरिर्गृहम्** आगच्छत् ।
४. अध्ययनेन **बुद्धिर्विस्तृता** भवति ।
५. **गुरोर्वचनं** सदा पालनीयम् ।
६. **सन्धिर्मया** सम्यक् अवगतः ।

७. रामः **पितुराज्ञां** पालितवान् ।
८. **गणपतिरादिपूज्यः** लोके ।
९. **मुनिरागतान्** जनान् वरेण अनुगृहीतवान् ।
१०. **भारतमातुरुन्नतिम्** अहं साधयितुम् इच्छामि ।

In the examples above visarga has changed to the letter 'र' (The letter 'र' is called रेफः in Samskrit)

Rule : A Visarga preceded by any vowel other than 'अ' and 'आ' and followed either by a vowel or a soft consonant, is replaced by रेफ ।

उदा - स्थाणुः + अचलः = स्थाणुरचलः
१. गुरुः + ब्रह्मा = गुरुर्ब्रह्मा
२. भक्तिः + गरीयसी = भक्तिर्गरीयसी
३. हरिः + गृहम् = हरिर्गृहम्
४. बुद्धिः + विस्तृता = बुद्धिर्विस्तृता
५. गुरोः + वचनम् = गुरोर्वचनम्
६. सन्धिः + मया = सन्धिर्मया
७. पितुः + आज्ञाम् = पितुराज्ञाम्
८. गणपतिः + आदिपूज्यः = गणपतिरादिपूज्यः
९. मुनिः + आगतान् = मुनिरागतान्
१०. मातुः + उन्नतिम् = मातुरुन्नतिम्

Here are a few more examples of the Sandhi.
१. स्थाणुः + अचलः = स्थाणुरचलः
२. मृत्युः + ध्रुवम् = मृत्युर्ध्रुवम्
३. बुद्धिः + योगे = बुद्धिर्योगे
४. बुद्धिः + एका = बुद्धिरेका
५. स्थितधीः + मुनिः = स्थितधीर्मुनिः
६. आत्मवश्यैः + विधेयात्मा = आत्मवश्यैर्विधेयात्मा
७. शान्तिः + अशान्तस्य = शान्तिरशान्तस्य
८. चिकीर्षुः + लोकसङ्ग्रहम् = चिकीर्षुर्लोकसङ्ग्रहम्

९. प्रकृतेः + गुणसम्मूढाः = प्रकृतेर्गुणसम्मूढाः
१०. तैः + दत्तान् = तैर्दत्तान्

विशेषनियमः

When a Visarga in an avyaya, is followed by either a vowel or a soft consonant it changes into 'र' ।

Eg. १. पुनः + अपि = पुनरपि
२. प्रातः + गच्छति = प्रातर्गच्छति
३. अन्तः + भागः = अन्तर्भागः
४. स्वः + लोकः = स्वर्लोकः
५. पुनः + वद = पुनर्वद

अभ्यासः

I. Join the sandhi.

उदा - गुरुः + अयम् = गुरुरयम्
१. बुद्धिः + उत्तमा = ...
२. नदीः + दृष्ट्वा = ...
३. गुरुः + अवदत् = ...
४. वधूः + आगच्छत् = ...
५. मातृः + अभ्यर्च्य = ...
६. हरेः + नाम = ...
७. बालैः + नमस्कृतम् = ...
८. गुरोः + बोधनम् = ...
९. गौः + धावति = ...
१०. देवैः + दत्तम् = ...

II. Split the sandhi.

१. शुद्धिर्भवतु = ...+ ....
२. मानवैर्निर्मितम् = ... + ...
३. स्थितधीरुत्तमः = ...+ ....
४. गोरागमनम् = ... + ...

५. सिन्धोर्जले = ... + ...
६. गुरोरादेशः = ... + ...
७. विंशतेर्जनानाम् = ... + ...
८. शक्तिरभिवर्धताम् = ... + ...
९. भूतिरैश्वर्यम् = ... + ...
१०. संहतिर्भवेत् = ... + ...

८. लौकिकन्यायाः

15. **कूपखानकन्यायः** - A person digging a well gets dirt all over his body. But when he strikes water he washes himself with it and drinks the same to dispel his fatigue. Thus many a time when we begin a work we have to endure discomfort. But, ultimately when we reap the fruit and are adequately rewarded for all our efforts it compensates for all the troubles endured.

We may apply this maxim to speaking in Samskrit. In The beginning our speech may be full of defects. But by constant practice we can and will overcome those and our language improves. The merit earned by speaking correctly will wash away the sin accrued by speaking wrong words .

16. **मात्स्यन्यायः** - In oceans and lakes many kinds of fish live. The bigger ones feed on the smaller ones. Similarly, the stronger men oppress the weaker ones and make a living in this world !

९. सङ्ग्राह्यविषयाः

अ. The five chaste women

अहल्या द्रौपदी सीता तारा मण्डोदरी तथा ।
पञ्चकं ना स्मरेन्नित्यं महापातकनाशनम् ।।

If a man remembers the five chaste women - Ahalya, Droupadi, Sita, Tara and Mandodari every day, his sins are destroyed.

मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्किर्नमोऽस्तु ते ।।

O Lord ! I salute you who has taken ten incarnations viz. मत्स्यः (fish), कूर्मः (tortoise), वराहः (boar), नरसिंहः (a man lion), वामनः, श्रीरामः, परशुरामः, कृष्णः, बुद्धः and कल्किः.

आ.

उपमा कालिदासस्य भारवेः अर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ।।

Kalidasa is renowned for his most appropriate similes, Bharavi for the profoundity in meaning and Dandin for the elegance in his words. However, in Magha's work Shishupalavadha, all these three qualities are found. The above couplet sings the glory of these poets.

Kalidasa's simile of दीपशिखा has earned him the fame ''दीपशिखा-कालिदासः''। Similarly there are other poets known for the following.

हर्षः	-	अनङ्गहर्षः
भासः	-	ज्वलनमित्रभासः
बाणः	-	तुरङ्गबाणः
मुरारिः	-	इन्दुमुरारिः
त्रिविक्रमः	-	यमुनात्रिविक्रमः
मङ्खः	-	कर्णिकारमङ्खः
माघः	-	घण्टामाघः
भारविः	-	छत्रभारविः

शिक्षा - अष्टमः पाठः

प्रश्नाः

I. यथोदाहरणम् अधः दत्तानां शानजन्तपदानां निर्दिष्टलिङ्गे तृतीया-चतुर्थी-पञ्चमी-एकवचनान्तरूपाणि लिखत ।

	तृतीया	चतुर्थी	पञ्चमी
उदा - राजमाना	राजमानया	राजमानायै	राजमानायाः
१. डयमानम्	....	....	....
२. शोभमानः	....	....	....
३. प्रयतमाना	....	....	....
४. मोदमाना	....	....	....
५. खिद्यमाना	....	....	....

II. यथोदाहरणं रिक्तस्थानानि पूरयत ।

उदा - अशोक - अपूर्वः शोऽन्तरः कान्तः

१. नयन - ....

२. जनक - ....

३. श्रीराम - ....

४. कोविद - ....

III. संस्कृतेन उत्तरयत ।

१. नृणाम् आयुः कियत् ?

२. बालत्ववृद्धत्वयोः कति वर्षाणि गच्छन्ति ?

३. जीवः कीदृशः ?

४. दुर्जनानाम् इन्द्रियाणि कीदृशानि ?

५. अर्जुनः रणे स्वजनान् दृष्ट्वा कानि अपश्यत् ?

(**Note:** Answers for the above exercises are given in the end of this book. **(P.No. - 236)** After completing them, check your answers.)

शिक्षा - नवमः पाठः

।। अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः ।।

Even a favour conferred on you by a fickle-minded person can be dangerous.

१. कृदन्ताः

सत्सप्तमी - १

In the earlier lessons you learnt the use of शतृ and शानच् affixes in detail. Now you will learn one more usage of these participles.

'When is Ravi coming home ?' This question can be either answered with 'He is coming in the evening/afternoon' or 'He is coming at 9 O' clock'. In the first one the part of the day is indicated while in the latter the time of his arrival is mentioned. There is a third way of answering such questions. ie., by indicating the time through another क्रिया ।

'Ravi is coming when his father returns from the office'. Here one क्रिया suggests another. This sentence when expressed in Samskrit will be पितरि आगच्छति (सति) पुत्रः (रविः) प्रत्यागच्छति ।

In this lesson you will be introduced to this usage of सप्तमीविभक्ति which it known as सत्सप्तमी or सति सप्तमीप्रयोगः - Locative Absolute. Read the following sentences carefully.

१. **शिक्षके आगच्छति (सति)** छात्राः उत्थितवन्तः ।
When the teacher came the students stood up.

२. **प्रदीपे स्नानं कुर्वति (सति)** जलागमनं स्थगितम् ।
When Pradipa was taking bath water stopped coming.

३. **पुत्रेषु आगच्छत्सु (सत्सु)** माता सन्तुष्टा ।
When her children came (were coming) the mother was happy.

४. **जनेषु कोलाहलं कुर्वत्सु (सत्सु)** चोरः पलायितवान् ।
When the people raised a hue and cry the thief ran away(escaped).

५. **कपिषु पश्यत्सु (सत्सु)** हनूमान् समुद्रलङ्घनं कृतवान् ।
While the monkeys watched Hanuman crossed the Ocean.

६. **सीतायां चिन्तयन्त्यां (सत्यां)** रामदूतः आगतः ।

७. **वानरीषु** फलं **चोरयन्तीषु (सतीषु)** पितृव्यः प्रकोष्ठं प्रविष्टवान् ।

८. **नारीषु जल्पन्तीष**[1] **(सतीषु)** अन्धकारः प्रसृतः ।

९. **गायिकासु गायन्तीषु (सतीषु)** श्रोतारः[2] सन्तोषम् अनुभूतवन्तः ।

१०. **शबर्यां ध्यायन्त्यां**[3] **(सत्यां)** रामः प्रत्यक्षः जातः ।

११. **सर्वेषु शयानेषु**[4] **(सत्सु)** चोरः गृहं प्रविष्टवान् ।

१२. **हरौ चेष्टमाने**[5] **(सति)** शिशुः अधः अपतत् ।

१३. **गोविन्दे प्रतीक्षमाणे**[6] **(सति)** पत्रवितारकः[7] आगतः ।

१४. **लतायाम् एधमानायां**[8] **(सत्यां)** कीटाः बाधन्ते ।

१५. **लतासु कम्पमानासु (सत्सु)** फलानि पतितानि ।

In all the sentences above there is सतिसप्तमीप्रयोगः/सत्सप्तमी-प्रयोगः । This usage is also called भावलक्षणा सप्तमी ।

To understand better read the following sentences.

१. **वृक्षे कम्पमाने** फलं पतितम् ।

२. **छात्रेषु आगच्छत्सु** शिक्षकः पाठम् आरब्धवान् ।

३. **जल्पन्त्यां गृहिण्यां** पतिः गृहम् आगतवान् ।

In these sentences there are two actions taking place. In the first the action of 'shaking' indicates when the other action viz., 'falling'

---

1. chit-chatting, 2. audience, 3. meditating, 4. asleep, 5. doing mischief, 6. waiting, 7. postman, 8. growing

takes place. In the second the action of 'coming' is indicative of the action of 'beginning' of the lesson. In the third the action of 'conversing' indicates when the husband arrived. This relation between the two actions, is known as ज्ञाप्यज्ञापकभावः । In the sentence वृक्षे कम्पमाने फलं पतितम्, कम्पनम् is the क्रिया found in 'वृक्ष' । Therefore the word वृक्ष takes सप्तमीविभक्ति । 'कम्पमान' is a word denoting a क्रिया and as it is an adjective of वृक्ष it also takes the same विभक्ति and वचन as the latter (विशेष्यम् - वृक्षे)

In this usage the word 'सत्' is supplied. Therefore it is known as सत्सप्तमी or सति सप्तमी । सत्शब्द takes the gender and number of the विशेष्यम् ।

उदा - रामे वदति सति .... पुं. ए.व.
रामलक्ष्मणयोः वदतोः सतोः ..... पुं. द्वि.व.
रामलक्ष्मणभरतेषु वदत्सु सत्सु .... पुं. ब.व.
सुतायां वदन्त्यां सत्याम् .... स्त्री. ए.व.
सीताकौसल्ययोः वदन्त्योः सत्योः .... स्त्री. द्वि.व.

When we translate these sentences into English we find that the सप्तमीविभक्ति actually conveys the sense of प्रथमाविभक्ति ।

उदा - रामे वदति सति - While Rama is speaking ... This usage of the Locative Absolute can substitute the use of the correlatives यदा...तदा ।

For Eg. - यदा सखी प्रविशन्ती आसीत् तदा पुत्री रुदितवती । The same can be expressed in सत्सप्तमी as सख्यां प्रविशन्त्यां (सत्यां) पुत्री रुदितवती ।

अभ्यासः

अ. *एतेषु वाक्येषु सत्सप्तमीप्रयोगयुक्तानां शब्दानाम् अधः रेखाङ्कनं कुरुत ।*

१. खगे डयमाने वृष्टिः आरब्धा ।

२. बालिकासु खिद्यमानासु सन्तोषवार्ता प्राप्ता ।

३. शिशुषु भाषमाणेषु पितरः सन्तुष्टाः ।

४. विश्वासे स्पर्धमाने ललितायाः उत्साहः प्रवृद्धः ।
५. न्यायाधीशे क्षममाणे चोरः धावितवान् ।
६. सवितायां गायन्त्याम् अनुजा नर्तनं कृतवती ।
७. बाले पतति माता भीता ।
८. साधकेषु जपत्सु नारदः आगतवान् ।

आ. *एतेषां सत्सप्तमीरूपं लिखत ।*

उदा – गच्छन् छात्रः – गच्छति छात्रे

१. रुदन् बालकः ....
२. चालयन्ती चालिका ....
३. नृत्यन् नर्तकः ....
४. पतत् पर्णम् ....
५. उद्गच्छत् क्षीरम् ....
६. भाषमाणाः निर्वाहकाः ....
७. लेपयन्त्यः तरुण्यः ....
८. गणयन्तः आपणिकाः ....
९. हसन्त्यः सुताः ....
१०. जिघ्रन्तः पाचकाः ....

इ. *आवरणे दत्तानां शब्दानां सत्सप्तमीरूपं लिखत ।*

१. .... (रामः गच्छन्) दशरथः अपतत् ।
२. .... (दमयन्ती आगच्छन्ती) नलः रूपं परिवर्तितवान् ।
३. .... (लक्ष्मणः अनुधावन्) मृगः अधावत् ।
४. .... (द्रौपदी आह्वयन्ती) श्रीकृष्णः अक्षयवस्त्रम् अनुगृहीतवान् ।
५. .... (इन्द्रः याचमानः) कर्णः सन्तुष्टः ।
६. .... (सर्वे पानकं पिबन्तः) श्रान्तिः निर्गता ।
७. .... (गोपिकाः स्मरन्त्यः) कृष्णः आगतः एव ।

ई. *उदाहरणानुगुणं वाक्यानि परिवर्तयत ।*

उदा –यदा विदूषकः विनोदकणिकां वदन् आसीत् तदा सर्वे हसितवन्तः ।

विदूषके विनोदकणिकां वदति सर्वे हसितवन्तः ।

१. यदा वाहनम् आगच्छत् आसीत् तदा बालाः धावितवन्तः ।
.... ।

२. यदा माता पुत्रं स्मरन्ती आसीत् तदा पुत्रः आगतवान् ।
.... ।

३. यदा अर्चकः पूजयन् आसीत् तदा पुष्पप्रसादः प्राप्तः ।
.... ।

४. यदा रवीन्द्रः कथयन् आसीत् तदा अहं मम बाल्यं स्मृतवती ।
.... ।

५. यदा भक्ताः स्मरन्तः आसन् तदा विष्णुः आगतः ।
.... ।

६. यदा भगिन्यः हसन्त्यः आसन् तदा पिता आगतवान् ।
.... ।

७. यदा शिक्षिका पाठयन्ती आसीत् तदा परिवीक्षकः परिशीलितवान् ।
.... ।

८. यदा सः गृहनिर्माणं कुर्वन् आसीत् तदा इष्टिकाः पतिताः ।
.... ।

(**Note :** Compare your answers with those on the end of this book **(P.No. - 237)** and ascertain their correctness.)

२. पदसङ्ग्रहः

मृजु - to cleanse, to wipe off, to sweep

१. मार्ष्टि, २. मृज्यते, ३. मार्जिष्यति - मार्क्ष्यति,
४. मार्जितव्यम् - मार्ष्टव्यम्, मार्जनीयम्, ५. मृष्टः - मृष्टा - मृष्टम्,
६. मृष्टवान् - वती, ७. मृजन् - ती, मार्जन् - ती, ८. मार्जित्वा - मृष्ट्वा, परिमृज्य, ९. मार्जितुम् - मार्ष्टुम् ।

या - to go

१. याति, २. यायते, ३. यास्यति,
४. यातव्यम् - यानीयम्, ५. यातः - ता - तम्, ६. यातवान् - वती,
७. यान् - ती - न्ती, ८. यात्वा - प्रयाय, ९. यातुम् ।

रुदिर् - to weep

१. रोदिति, २. रुद्यते, ३. रोदिष्यति,
४. रोदितव्यम् - रोदनीयम्, ५. रुदितः - ता - तम्, ६. रुदितवान् - वती, ७. रुदन् - ती, ८. रुदित्वा - प्ररुद्य, ९. रोदितुम् ।

रुधिर् - to stop, to obstruct

१. रुणद्धि २. रुध्यते ३. रोत्स्यति
४. रोद्धव्यम् - रोधनीयम् ५. रुद्धः - द्धा - द्धम् ६. रुद्धवान् - वती
७. रुन्धन् - ती ८. रुद्ध्वा - निरुध्य ९. रोद्धुम् ।

लप् - to speak

१. लपति २. लप्यते ३. लपिष्यति
४. लपितव्यम् - लपनीयम् ५. लपितः - ता - तम् ६. लपितवान् - वती ७. लपन् - न्ती ८. लपित्वा - विलप्य ९. लपितुम् ।

३. प्रहेलिका

यजमानेन कः स्वर्गहेतुः सम्यग्विधीयते ।
विहायाद्यन्तयोर्वर्णौ गोत्वं कुत्र स्थितं वद ।।

What is it a man performs to obtain heaven ? Leaving the first and the last letters off, you get the answer to the question "where are the attributes of a cow found ?". Find the answer.

Answer - **यागविधिः** - sacrificial rites

Leaving the first and the last letters we get **'गवि'** which means 'in the cow'. The attributes of a cow can be found in the cow only !

४. सुभाषितम्

१७. भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयम्
माने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयम्
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ।।

पदविभागः

भोगे, रोगभयम्, कुले, च्युतिभयम्, वित्ते, नृपालात्, भयम्, माने,

दैन्यभयम्, बले, रिपुभयम्, रूपे, जरायाः, भयम्, शास्त्रे, वादिभयम्, गुणे, खलभयम्, काये, कृतान्तात्, भयम्, सर्वम्, वस्तु, भयान्वितम्, भुवि, नृणाम्, वैराग्यम्, एव, अभयम् ।

सन्धिः

नृपालात् + भयम् - जश्त्वसन्धिः, जरायाः + भयम् - विसर्गसन्धिः (लोपः), कृतान्तात् + भयम् - जश्त्वसन्धिः, एव + अभयम् - सवर्णदीर्घसन्धिः

तात्पर्यम्

In enjoying wordly pleasures there is the fear of disease; a reputed family has the fear of disrepute; abundance of wealth causes the fear of a king & government; self respect has the fear of having to beg; power has the fear of enemies; beauty has the fear of old age; learning has the fear of an opponent; virtue has the fear of rumours spread by wicked men; and our body is in constant fear of death. Thus is everything in this world, there is some fear or other for men. Only when one renounces everything, there is no fear.

अन्वयार्थः

भोगे = As for sensual pleasures, **रोगभयम्** = there is the fear of disease, **कुले** = for a reputed family, **च्युतिभयम्** = the fear of disrepute, **वित्ते** = for wealth, **नृपालात् भयम्** = the fear of the king, **माने** = for self respect, **दैन्यभयम्** = the fear of having to beg, **बले** = for strength, **रिपुभयम्** = the fear of the enemy, **रूपे** = for beauty, **जरायाः भयम्** = the fear of old age, **शास्त्रे** = for learning, **वादिभयम्** = the fear of an opponent, **गुणे** = for virtues, **खलभयम्** = the fear of wicked men, **काये** = (and) for this body, **कृतान्तात् भयम्** = the fear of death. **भुवि** = In this world, **नृणाम्** = for men, **सर्वं वस्तु** = everything, **भयान्वितम्** = has a cause for fear. **वैराग्यम् एव** = Renunciation alone, **अभयम्** - causes no fear.

१८. आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥

पदविभागः

विशुद्धमनसः, नन्दन्ति । The remaining words in the sloka are not joined.

सन्धिः

विशुद्धमनसः + नन्दन्ति - विसर्गसन्धिः (उकारः)

तात्पर्यम्

Desire is a river; wishes are its water; greed is like the waves ; passion is the crocodile; and the thoughts to obtain various things are the birds flying over it. This river uproots the tree of courage. Ignorance is a whirlpool in this fathomless river which cannot be crossed. Worries are its banks. Great sages who have crossed this river called desire are blissful with a pure mind.

अन्वयार्थः

मनोरथजला = Wishes are water in it, तृष्णातरङ्गाकुला = Greed is the waves, रागग्राहवती = Passion is the crocodile, वितर्कविहगा = the thoughts to obtain various things are the birds flying over it. धैर्यद्रुमध्वंसिनी = This river uproots the tree of courage, मोहावर्त .. गहना = Ignorance is a whirl pool in this fathomless river which cannot be crossed, प्रोत्तुङ्गचिन्तातटी = Worries are its banks. योगीश्वराः = The great sages, विशुद्धमनसः = with a pure mind, तस्याः पारगताः = who cross, that river called desire, नन्दन्ति = are blissful.

५. काव्यकथा

अर्जुनस्य तपसः परीक्षा

अप्सरःस्त्रियः इन्द्रस्य [1]समीपेऽर्जुनस्येन्द्रियजयम्[2] उक्तवत्यः । इन्द्रो[3] वार्तां

श्रुत्वा सन्तुष्टः । [4]पुनरर्जुनस्य परीक्षां कर्तुं सं[5] ऐच्छत् । अतः स[6] मुनिवेषं धृतवान् । तपोवनं गतवान् । [7]मुनेर्दर्शनेन अर्जुनः प्रभावितः । स[8] मुनेः पूजासत्कारं कृतवान् । आसने उपवेष्टुं मुनिं प्रार्थितवान् ।

इन्द्रः आसने उपविष्टः । सः - "त्वम् अधुना तरुणः । तथापि [9]तपश्चरसि[a] । अयं सन्तोषस्य विषयः । अयं संसारो[10] दुःखमयः । अतो[11] विवेकिनः [12]संसारान्मोक्षमिच्छन्ति । त्वं परं मोक्षं [13]नेच्छसि । शत्रुविजयमभिलषसि । शत्रुनाशेन परपीडनं भवति । परपीडनं पापस्य कारणम् । अतो[14] विजयेच्छां[b] परित्यज । मोक्षार्थं प्रयत्नं कुरु । अयमिन्द्रकीलपर्वतो[15] गङ्गातीरेऽस्ति[16] । अतः पवित्रः । अत्र मोक्षप्राप्तिः सुलभा" इति उपदेशं कृतवान् ।

अर्जुनः उक्तवान् - "[17]त्वयोक्तं युक्तमेव । [18]किन्त्वहं न मोक्षमिच्छामि । [19]पाण्डुराजपुत्रोऽहमर्जुनोऽस्मि[20]। [21]दुर्योधनोऽस्माकं सर्वस्वमप्यपहृत-वान्[22] । अनेन [23]ममाग्रजो [24]युधिष्ठिरो [25]दुःखतप्तः । तपस्याम् आचरितुं तस्याज्ञा[26] वर्तते । इन्द्रः क्षत्रियकुलस्येष्टदेवः[27] । तम् आराधयितुम्

---

1. समीपे + अर्जुनस्य - पूर्वरूपसन्धिः, 2. अर्जुनस्य + इन्द्रियजयम् - गुणसन्धिः, 3. इन्द्रः + वार्ताम् - विसर्गसन्धिः + गुण, 4. पुनर् + अर्जुनस्य - वि.सन्धिः (रेफः), 5. सः + ऐच्छत् - वि.सन्धिः (लोपः) 6. सः + मुनिवेषम् - वि.सन्धिः (लोपः), 7. मुनेः + दर्शनेन - वि.सन्धिः (रेफः), 8. सः + मुनेः - वि.सन्धिः (लोपः), 9. तपः + चरसि - वि.सन्धिः (स) + श्चुत्वसन्धिः, 10. संसारः + दुःखमयः - वि.सन्धिः (उ) + गुणसन्धिः, 11. अतः + विवेकिनः - वि.सन्धिः (उ) + गुणसन्धिः, 12. संसारात् + मोक्षम् - अनुनासिकसन्धिः, 13. न + इच्छसि - गुणसन्धिः, 14. अतः + विजयेच्छाम् - वि.सन्धिः (उ) + गुणसन्धिः, 15. पर्वतः + गङ्गातीरे - वि.सन्धिः (उ) + गुणसन्धिः, 16. गङ्गातीरे + अस्ति - पूर्वरूपसन्धिः, 17. त्वया + उक्तम् - गुणसन्धिः, 18. किन्तु + अहम् - यण्सन्धिः, 19. पाण्डुराजपुत्रः + अहम् - वि.सन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः, 20. अर्जुनः + अस्मि - वि.सन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः, 21. दुर्योधनः + अस्माकम् - वि.सन्धिः (उ) + गु.सन्धिः + पू.सन्धिः, 22. अपि + अपहृतवान् - यण्सन्धिः, 23. मम + अग्रजः - सवर्णदीर्घसन्धिः, 24. अग्रजः + युधिष्ठिरः - वि.सन्धिः (उ) + गुणसन्धिः, 25. युधिष्ठिरः + दुःखतप्तः - वि.सन्धिः (उ) + गुणसन्धिः, 26. तस्य + आज्ञा - सवर्णदीर्घसन्धिः, 27. कुलस्य + इष्टदेवः - गुणसन्धिः,

---

a. (you are) practising penance, b. desire of victory,

अहमत्रागतः[28] । [29]ममाग्रजो द्यूते पराजितः । द्रौपदी मम धर्मपत्नी । दुर्योधनो[30] राजसभायां तस्याः वस्त्रापहरणं [c]कारितवान् । इदानीमपि दुर्योधनोऽस्मासु[31] द्वेषं करोति । अतः शत्रुस्सः[32] अस्माभिः [d]जेतव्यः । शत्रुविजये ममाभिलाषः[33] । मोक्षप्राप्तौ मम इच्छा नास्ति । अहम् [34]इन्द्रस्यानुग्रहं सम्पादयामि । अथवा जीवनं [35]पर्वतेऽस्मिन् समापयामि[e]'' इति ।

इन्द्रः अर्जुनस्य वचनानि श्रुत्वा सन्तुष्टः । शिवम् उद्दिश्य तपः कर्तुं सूचयित्वा अदृश्यो [36]जातः । शिवाराधनार्थम् अर्जुनः कठिनं तप [37]एव कृतवान् । उपवासमाचरितवान् । [38]एकेनैव पादेन स्थित्वा तपः कृतवान् । फलं, जलम् इत्यादिकं सर्वं त्यक्त्वा तपः आचरितवान् । घोरतपसानेन[39] सर्वत्र [40]तापस्सञ्जातः । तापम् [f]असहमाना [41]मुनयः शिवसमीपमगच्छन् । तापात् रक्षितुं प्रार्थितवन्तः । [42]शिवोऽभयं दत्तवान् ।

मूक [43]इति कश्चन दानवः[g] । [h]वराहरूपेण स [44]तपोविघ्नं कृतवान् । अर्जुनः कुपितः । वराहं [i]हन्तुमुद्युक्तः । [45]तदैव शिवः [j]किरातवेषेण आगतवान् । शिवो[46] वराहस्योपरि[47] बाणं [k]क्षिप्तवान् । अर्जुनोऽपि[48]

---

28. अत्र + आगतः - सवर्णदीर्घसन्धिः, 29. मम + अग्रजः - सवर्णदीर्घसन्धिः,30. दुर्योधनः + राजसभायाम् - वि.सन्धिः (उ) + गुणसन्धिः, 31. दुर्योधनः + अस्मासु - वि.सन्धिः (उ) + गुणसन्धिः + पू.सन्धिः, 32. शत्रुः + सः - वि.सन्धिः (सकारः), 33. मम + अभिलाषः - सवर्णदीर्घसन्धिः, 34. इन्द्रस्य + अनुग्रहम् - सवर्णदीर्घसन्धिः, 35. पर्वते + अस्मिन् - पूर्वरूपसन्धिः, 36. अदृश्यः + जातः - वि.सन्धिः (उ) + गुणसन्धिः, 37. तपः + एव - वि.सन्धिः (लोपः), 38. एकेन + एव - वृद्धिसन्धिः 39. तपसा + अनेन - सवर्णदीर्घसन्धिः, 40. तापः सञ्जातः - वि.सन्धिः (सकारः), 41. असहमानाः + मुनयः - वि.सन्धिः (लोपः), 42. शिवः + अभयम् - वि.सन्धिः (उ) + गु.सन्धिः + पू.सन्धिः, 43. मूकः+ इति - वि.सन्धिः (लोपः), 44. सः + तपोविघ्नम् - वि.सन्धिः (लोपः) 45. तदा + एव - वृद्धिसन्धिः, 46. शिवः + वराहस्य - वि.सन्धिः (उ) + गुणसन्धिः, 47. वराहस्य + उपरि - गुणसन्धिः, 48. अर्जुनः + अपि - विसर्गसन्धिः (उ) + गु.सन्धिः + पूर्वरूपसन्धिः,

---

c. had it done, d. must be won over, e. will end, f. unable to bear, g. demon, h. in the form of a boar, i. to kill, j. in the guise of a hunter, k. shot (an arrow)

तस्मिन्नेव[49] समये बाणम् अक्षिपत् । बाणद्वयं वराहस्य शरीरे [1]लग्नम् । वराहो[50] मृतः । अर्जुनः स्वस्य बाणं नेतुं वराहस्य समीपमागतवान् ।।

प्रश्नाः

१. इन्द्रः किमर्थं मुनिवेषं धृतवान् ?
२. विवेकिनः किम् इच्छन्ति ?
३. इन्द्रकीलपर्वतः किमर्थं पवित्रः ?
४. अर्जुनः किमर्थम् इन्द्रम् आराधयितुम् इच्छति ?
५. मुनयः किमर्थं शिवसमीपम् अगच्छन् ?

६. अन्वयरचना

२२. न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द ! किं भोगैर्जीवितेन वा ।।

पदविभागः

नः, राज्येन, भोगैः, जीवितेन - The remaining are single words.

सन्धिः

नः+ राज्येन = विसर्गसन्धिः(उकार), भोगैः + जीवितेन = विसर्गसन्धिः (रेफः)

तात्पर्यम्

I donot seek either victory in the war or the kingdom or even pleasures. Oh Govinda ! of what avail is the kingdom, joys or for that matter, our very life, to us ?

वाक्यविश्लेषणम्

	क्रिया	सम्बोधनम्	कर्तृपदम्	कर्मपदम्	केन
१.	न काङ्क्षे	कृष्ण	(अहम्)	विजयम्	....
२.	न (काङ्क्षे)	....	,,	राज्यं सुखानि च	....

49. तस्मिन् + एव - ङमुडागमसन्धिः, 50. वराहः + मृतः - विसर्गसन्धिः (उ) + गुणसन्धिः

1. got stuck

	क्रिया	सम्बोधनम्	कर्तृपदम्	कर्मपदम्	केन
३.	किम् (अस्ति)	गोविन्द	(प्रयोजनम्)	-----	राज्येन
४.	,, ,,	----	,,	-----	भोगैः जीवितेन वा

* There are four sentences in this sloka न काङ्क्षे is the verb in the first sentence. The second sentence has only 'न' । So, the verb काङ्क्षे is to be taken there also.
  In the third and fourth sentences we find only 'किम्' । It actually means 'किं प्रयोजनम् अस्ति' । 'प्रयोजनम्' is the कर्तृपदम् here and 'अस्ति', the verb. Both these words are supplied (अध्याहृतम्) ।

अन्वयरचना

कृष्ण !
न काङ्क्षे
कः न काङ्क्षे ? - अहम्
कं न काङ्क्षे ? - विजयम्
न काङ्क्षे
किं न काङ्क्षे ? - राज्यम्
पुनः कानि न काङ्क्षे ? - सुखानि च
किं प्रयोजनम् अस्ति
केन किं प्रयोजनमस्ति ? - राज्येन
पुनः कैः किं प्रयोजनमस्ति ? - भोगैः
पुनः केन किं प्रयोजनमस्ति ? - जीवितेन वा

२३. येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥

पदविभागः

येषाम्, अर्थे, काङ्क्षितम्, नः, राज्यम्, भोगाः सुखानि, च, ते, इमे, अवस्थिताः, युद्धे, प्राणान्, त्यक्त्वा, धनानि, च ।

सन्धिः

ते + इमे - यान्तादेशसन्धिः - यलोपः, इमे + अवस्थिताः - पूर्वरूपसन्धिः, अवस्थिताः + युद्धे - विसर्गसन्धिः (लोपः)

तात्पर्यम्

Those, for whose sake we desire for this kingdom, comforts and joys, are standing here in this war, renouncing all their wealth and ready to give up lives.

वाक्यविश्लेषणम्

	क्रिया	प्रथमा	द्वितीया	किंनिमित्तम्	कुत्र
१.	काङ्क्षितम् (अस्ति/सन्ति)	राज्यं भोगाः सुखानि च	.....	येषामर्थे	...
२.	अवस्थिताः (सन्ति)	ते इमे			युद्धे
	त्यक्त्वा क्त्वान्तम्	....	प्राणान् धनानि च	....	

* There are two sentences here that are joined by the correlatives यत् - तत् (येषाम् - ते)
* ते इमे - This is a commonly found usage in Samskrit adding style and charm to the expression. It means 'All of them'. while referring to a thing or somebody who is well-known, or one that is under discussion, this kind of expression is employed. In this particular sentence the words 'ते इमे' mean 'those whom we all know very well'.

Here are some more usages of the same kind.

१. **सोऽयं** बालकः उपस्थितः । That boy has arrived.
२. **सोऽहं** ब्रवीमि । - Such a person, I speak.
३. **त एते** मौनेन स्थितवन्तः । - They (the ones referred to earlier) remained silent.
४. **सोऽयं** देवः वाञ्छितं फलं ददातु । - Let that God bestow the desired result.

५. **सा एषा** वार्ता सर्वत्र प्रसृता । - That news spread every where.

अन्वयरचना

काङ्क्षितम् अस्ति
किं काङ्क्षितम् अस्ति ? - राज्यम्
पुनः के काङ्क्षिताः सन्ति ? - भोगाः
पुनः कानि काङ्क्षितानि सन्ति ? - सुखानि च
अवस्थिताः (सन्ति)
के अवस्थिताः सन्ति ? - ते इमे
कुत्र अवस्थिताः सन्ति ? - युद्धे
किं कृत्वा अवस्थिताः सन्ति ? - त्यक्त्वा
कान् त्यक्त्वा ? - प्राणान्
पुनः कानि त्यक्त्वा ? - धनानि च

२४ . एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥

पदविभागः

एतान्, न, हन्तुम्, इच्छामि, घ्नतः, अपि, मधुसूदन, अपि, त्रैलोक्यराज्यस्य, हेतोः, किम्, नु, महीकृते ।

सन्धिः

घ्नतः + अपि - विसर्गसन्धिः, गुणः, पूर्वरूपम्

तात्पर्यम्

O' Madhusudana ! I donot wish to slay these, even if I am slain by them, even if it be for the sovereignty of the three worlds. Much less will I do so for the sake of the earth (this kingdom).

वाक्यविश्लेषणम्

क्रिया	सम्बोधनम्	प्रथमा	निमित्तम्
न हन्तुम् इच्छामि	मधुसूदन !	घ्नतोऽपि अहम्	त्रैलोक्यराज्यस्य हेतोः
किं नु हन्तुम् इच्छामि ?		,,	महीकृते

* 'हेतोः' here means 'for the sake of'.
* 'महीकृते नु किम् ?' means "(when I am not prepared to kill them for the sovereignty over the three worlds) will I kill them for sovereignty over the earth ? Certainly not."

अन्वयरचना

न इच्छामि
कः न इच्छामि ? - (अहम्)
किं कर्तुं न इच्छामि ? - हन्तुम्
कान् हन्तुम् ? - एतान्
कीदृशः अहम् ? - घ्नतः अपि
कस्य हेतोः ? - त्रैलोक्यराज्यस्य हेतोः
किं नु हन्तुम् इच्छामि ?
कस्य कृते किं नु हन्तुम् इच्छामि ? - महीकृते ।

७. सन्धयः

विसर्गसन्धिः

४. विसर्गस्य सकारादेशः

Observe the Sandhi-words in the following sentences.

१. **शुभ्रश्चन्द्रः** आकाशे विराजते ।
२. '**शिष्यस्ते**ऽहम्' इति अर्जुनः कृष्णम् अवदत् ।
३. रामः **कृष्णश्च** गृहं गतवन्तौ ।
४. **ततस्सर्वे** कार्यम् आरब्धवन्तः ।
५. अहं **मातुश्चरणौ** प्रणमामि ।
६. **सेवकश्छत्रं** गृहीत्वा आगतः ।
७. **शिवष्षण्मुखम्** अवदत् ।
८. **यष्टीकते** सः टीकाकारः इति उच्यते ।
९. **भगिन्यास्स्यूततः** धनं पतितम् ।
१०. ते **उच्चैश्चर्चाम्** अकुर्वन् ।

In all the examples above visarga is replaced by the letter 'स्'

Rule - When a visarga is followed by any of the letters च, छ, ट, ठ, त, थ, श, ष or स, it is replaced by सकार । If this सकार is followed by च, छ or श श्चुत्वसन्धि also takes place and if followed by ट, ठ or ष ष्टुत्वसन्धि also takes place.

Combining the two changes mentioned above the rule may be stated like this.

A Visarga - 1. followed by स, त, थ, is replaced by सकार

2. followed by श, च, छ, is replaced by शकार

3. followed by ष, ट, ठ, is replaced by षकार

Eg. for सकार - शिष्यः + ते = शिष्यस्ते

ततः + सर्वे = ततस्सर्वे

तस्याः + स्यूततः = तस्यास्स्यूततः ।

for शकार - शुभ्रः + चन्द्रः = शुभ्रश्चन्द्रः

कृष्णः + च = कृष्णश्च

मातुः + चरणौ = मातुश्चरणौ

सेवकः + छत्रम् = सेवकश्छत्रम्

उच्चैः + चर्चाम् = उच्चैश्चर्चाम्

for षकार - शिवः + षण्मुखम् = शिवष्षण्मुखम्

यः + टीकते = यष्टीकते

Observe some more examples.

१. तुष्टः + स्थितप्रज्ञः = तुष्टस्स्थितप्रज्ञः

२. सिद्ध्यसिद्ध्योः + समः = सिद्ध्यसिद्ध्योस्समः

३. अधिकारः + ते = अधिकारस्ते

४. कः + चित् = कश्चित्

५. इन्द्रियार्थेभ्यः + तस्य = इन्द्रियार्थेभ्यस्तस्य

६. सङ्गः + तेषु = सङ्गस्तेषु

७. इन्द्रियैः + चरन् = इन्द्रियैश्चरन्

८. अभावयतः + शान्तिः = अभावयतश्शान्तिः

९. भावयन्तः + श्रेयः = भावयन्तश्श्रेयः

१०. सन्तुष्टः + तस्य = सन्तुष्टस्तस्य
११. असक्तः + सततम् = असक्तस्सततम्

अभ्यासः

I. Split the sandhis.

१. बालाश्चतुराः = ... + ...
२. कर्मकराश्छादयन्ति = ... + ...
३. श्रेष्ठष्टीकाकारः = ... + ...
४. धनुष्टङ्कारः = ... + ...
५. स्वच्छस्तटः = ... + ...
६. विरलस्थकारः = ... + ...
७. गुरोस्तल्पः = ... + ...
८. पण्डितैश्चर्च्यते = ... + ...
९. बालष्षण्मुखः = ... + ...
१०. दीर्घस्सर्पः = ... + ...

II. Join the sandhis.

१. सर्वैः + छात्रैः = ...
२. सर्वैः + शरैः = ...
३. सर्वैः + तस्करैः = ...
४. सर्वैः + चिन्तनैः = ...
५. सर्वाभिः + टीकाभिः = ...
६. तयोः + तरुणयोः = ...
७. मुनेः + तपस्या = ...
८. तुष्टाः + तरुण्यः = ...
९. दुष्टः + चोरः = ...
१०. चतुरः + छात्रः = ...

८. लौकिकन्यायाः

17. अशोकवनिकान्यायः - Ravana abducted Sita and kept her a prisoner in Ashokavanika. Was there no other place for him to

keep her ? Of course, there were many other places - jails and gardens too, where he could have kept her. But he chose अशोक-वनिका not with any special reason but because she had to be kept some where.

18. गुडजिह्विकान्यायः - Before giving a bitter medicine to a child a little bit of jaggery is smeared on his tongue. The child takes the medicine under the notion that it is sweet ! Before he realises that the medicine is after all bitter, he would have consumed it.
This maxim is quoted when a person is tempted with some incentive and persuaded to do a good thing.
Meritorious acts like worship of God are said to bring a lot of good results. But all those results are not realised at once.
The idea here is to persuade people to be religious. So, mostly the फलश्रुति that is heard at the end of stotras etc., is to be interpreted according to गुडजिह्विकान्याय ।

९. सङ्ग्राह्यविषयाः

अ. The Nine Sentiments - नवरसाः

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ शान्तेति रसा नव प्रकीर्तिताः ।।

शृङ्गार, वीर, करुण, अद्भुत, हास्य, भयानक, बीभत्स, रौद्र, शान्त - These are the nine sentiments depicted in literary works.

The Seven Notes - सप्तस्वराः

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ।।

निषाद, ऋषभ, गान्धार, षड्ज, मध्यम, धैवत, पञ्चम - These are the seven notes of music produced in the throat and in stringed instruments.

आ. Some ancient Indian scholars

* Charaka, Sushruta, Jeevaka, Divodasa - Physicians.

* Aryabhata - the mathematician who found the value of ‘ ’ and invented the formulae to find Square and Cube roots.
* Kanada propounded the Atomic theory.
* Pingalacharya taught the use of Binary method.
* Panini the grammarian who expounded Samskrit grammar in the most systematic manner.
* Bodhayanacharya found that the value of the square on the hypotenus is equal to the sum of the squares on the other two sides of a right angled triangle. (This is now famous as Pythogorus theorem.)

शिक्षा - नवमः पाठः

प्रश्नाः

I. अधस्तनवाक्यानि अवलम्ब्य शत्रन्त / शानजन्तप्रथमान्तं रूपं सत्सप्तम्यन्तरूपं च यथोदाहरणं लिखत ।

उदा - बालः गच्छति - बालः गच्छन् - बाले गच्छति सति

१. छात्रः क्रीडति । - .... - ....
२. अश्वः धावति । - .... - ....
३. पुष्पं विकसति । - .... - ....
४. भक्ता नमति । - .... - ....
५. सः वन्दते । - .... - ....

II. सन्धिविग्रहं कृत्वा नाम लिखत ।

१. गृहेऽप्यासीत् = ... + ... + ... - ....
२. मुनेर्दर्शनेनैव = ... + ... + ... - ....
३. तपश्चरामीति = ... + ... + ... - ....
४. तस्मान्मोक्षो जातः = ...+ ...... + ... - ....
५. ममाभिलाषोऽस्ति = ...+ ...... + ... - ....

III. अधः दत्तानां वाक्यविश्लेषणं लिखत ।

१. तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ।

* सम्बोधनम् .... * चतुर्थी ....
* क्रियापदम् .... * पञ्चमी ....
* प्रथमा ....

२. क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ।

* क्रियापदम् .... * सम्बोधनम् ....
* प्रथमा .... * द्वितीया .... * क्त्वान्तम् ....

(**Note:** Answers for the above exercises are given in the end of this book. **(P.No. - 237)** After completing them, check your answers.)

शिक्षा - दशमः पाठः

॥ उत्तिष्ठत, जाग्रत, प्राप्य वरान्निबोधत ॥

Arise, Awake, seek the best of men and learn (from them).

१. कृदन्ताः

सत्सप्तमी - २

Study the following sentences -

१. **सूर्ये** अस्तं **गते (सति)** वयं गृहं प्रत्यागताः ।

When the Sun set we returned home.

२. **शिक्षके आगते (सति)** छात्राः तूष्णीम् अभवन् ।

When the teacher came the students fell silent.

३. **श्रीरामे** वनं **गते (सति)** दशरथः प्राणान् अत्यजत् ।

When Rama went away to the forest Dasharatha died.

४. **कौसल्यायाम् आगतायां (सत्यां)** सीता उत्थितवती ।

When Kausalya came Sita stood up.

Try to understand the following sentences in the same manner as above.

५. **त्वयि आगते (सति)** अहं गृहे न आसम् ।

६. **घण्टायां वादितायां**[1] **(सत्यां)** सर्वे छात्राः गतवन्तः ।

७. **समये प्राप्ते**[2] **(सति)** सर्वे छात्राः गतवन्तः ।

८. **वसन्तकाले** [3]**सम्प्राप्ते (सति)** कोकिलः [4]कूजति ।

९. **पुत्रेषु** परीक्षायाम् **उत्तीर्णेषु (सत्सु)** माता सन्तुष्टा ।

---

1. When (the bell) struck 2. when (the time) came 3. when (spring) arrived 4. sings

१०. **अस्मासु आगतेषु**[5] **(सत्सु)** किमर्थं भवन्तः तूष्णीं स्थितवन्तः ?
११. धनिकेन **धने दीयमाने**[6] **(सति)** भिक्षुकाः आगताः ।
१२. **सर्वेषु शयानेषु**[7] **(सत्सु)** चोरः गृहं प्रविष्टवान् ।
१३. भक्तैः **ध्याने क्रियमाणे**[8] **(सति)** वार्तालापं मा कुरु ।
१४. राहुणा **चन्द्रे ग्रस्यमाने**[9] **(सति)** भोजनं न करणीयम् ।
१५. तया **गीते गीयमाने**[10] **(सति)** सर्वाः तृप्तिम् अनुभूतवत्यः ।
१६. **बालिकायाम् आगतवत्यां (सत्यां)** जनाः करताडनं कृतवन्तः ।
१७. **वृक्षे पतितवति**[11] **(सति)** वाहनानि स्थगितानि ।
१८. **गुरौ आहूतवति (सति)** शिष्याः आगतवन्तः ।
१९. **पितामह्यां** धान्यं **स्थापितवत्यां (सत्यां)** पक्षिणः समागताः ।
२०. सूचनां **दत्तवति राज्ञि**[12] सैनिकाः धावितवन्तः ।

Rules of सत्सप्तमी

I. You know that in the Locative Absolute construction the two verbs have ज्ञाप्यज्ञापकभावः – ie., the former verb indicates the latter. In the earlier lesson you came across sentences where the ज्ञापकक्रिया – (the former verb which indicates another) was a present participle ending in शतृ or शानच्प्रत्ययः । There are instances where the ज्ञापकक्रिया ends in some other affix also as in the sentences above.

Eg. - 1. सूर्ये अस्तं **गते** (सति), वयं गृहं प्रत्यागताः । Here गते is a क्तप्रत्ययान्त form.

2. धनिकेन धने **दीयमाने** (सति) भिक्षुकाः आगताः । दीयमाने is a passive form (कर्मणि) ending in शानच् ।

3. बालिकायाम् **आगतवत्यां** (सत्यां) जनाः करताडनं कृतवन्तः । आगतवत्याम् is a क्तवतुप्रत्ययान्त form.

---

5. when (we) came 6. when (money) was being given 7. when (all) were asleep 8. when (meditation) was being done 9. when (the moon) is eclipsed 10. when (a song) is being sung 11. as (the tree) had fallen 12. when (the king) had given

II. As you have observed earlier the locative Absolute can be used in all the three numbers namely singular, dual and plural.

उदा - (पुं) बालके गते / बालके गतवति (सति)...,
बालकयोः गतयोः / बालकयोः गतवतोः (सतोः)...,
बालकेषु गतेषु / बालकेषु गतवत्सु (सत्सु)...

(स्त्री) बालिकायां गतायां / बालिकायां गतवत्यां (सत्यां)...,
बालिकयोः गतयोः / बालिकयोः गतवत्योः (सत्योः)...
बालिकासु गतासु / बालिकासु गतवतीषु (सतीषु)....

III. Thus the ज्ञापकक्रिया can be a word ending in the suffixes क्त, शानच् (कर्मणि), क्तवतु etc., besides शतृ and शानच् ।
Here are a few more examples of the same.

1. ज्ञापकक्रिया ending in शतृ
   याने गच्छति (सति) वृक्षः पतितः ।
2. ज्ञापकक्रिया ending in शानच् (कर्तरि)
   सस्येषु वर्धमानेषु (सत्सु) कृषिकः सन्तुष्टः ।
3. ज्ञापकक्रिया ending in क्तप्रत्यय (कर्तरि)
   पितरि गते (सति) बालकः क्रीडाम् आरब्धवान् ।
4. ज्ञापकक्रिया ending in शानच् (कर्मणि)
   मया पुस्तके पठ्यमाने, सम्भाषणं मा कुरु ।
5. ज्ञापकक्रिया ending in क्तवतु -
   पितरि दृष्टवति (सति) बालकः धावितवान् ।
6. ज्ञापकक्रिया ending in क्तप्रत्यय (कर्मणि)
   कार्ये कृते (सति) गृहं गम्यताम् ।

अभ्यासः

I. *एतेषु वाक्येषु सत्सप्तमीप्रयोगयुक्तानां शब्दानाम् अधः रेखाङ्कनं कुरुत ।*

१. हनूमति आगते सीता सन्तोषम् अन्वभवत् ।

२. रामलक्ष्मणयोः आगतवतोः राक्षसाः पलायितवन्तः ।

३. विमानेषु आगतेषु बान्धवाः धावितवन्तः ।

४. शिशुषु रुदितवत्सु मातरः खिन्नाः जाताः ।

५. सर्वैः भोजने क्रियमाणे ते ताम्बूलम् आनीतवन्तः ।

६. तेन लेखे लिख्यमाने अतिथयः समागताः ।

II. *एतेषां सत्सप्तमीरूपं लिखत ।*

उदा - बालिका गता - <u>बालिकायां गतायाम्</u>

१. पार्वती प्राप्ता ....
२. वृक्षाः कम्पिताः ....
३. महिलाः रुदितवत्यः ....
४. पर्णानि पतितानि ....
५. पुष्पं विकसितम् ....
६. मित्रं धावितवत् ....
७. यानानि गतवन्ति ....
८. प्रमीला पठितवती ....
९. सुधीन्द्रः नीतवान् ....
१०. शिक्षिकाः पाठितवत्यः ....
११. उच्यमानः विषयः ....
१२. श्रूयमाणानि गीतानि ....
१३. रक्ष्यमाणाः शिशवः ....
१४. नीयमाना पुत्री ....
१५. गृह्यमाणः दण्डः ....

III. *आवरणे दत्तानां शब्दानां सत्सप्तमीरूपं लिखत ।*

१. .... (पिता गतः) शिशुः रुदितवान् ।
२. .... (मधुरं क्रियमाणं) अग्रजः आह्वयति ।
३. .... (नागराजः हसितवान्) नागवेणी दृष्टवती ।
४. .... (कपाटिका उद्घाटिता) वस्त्राणि पतितानि ।
५. .... (विवाहः सम्पन्नः) बान्धवाः निर्गताः ।

६. .... (परीक्षाः समाप्ताः) बालाः प्रवासार्थं गतवन्तः ।
७ .... (जलं नीयमानम्) घटः पतितः ।
८. .... (भवनानि निर्मीयमाणानि) विद्युत्सम्पर्कः प्राप्तः ।

IV. *उदाहरणानुगुणं वाक्यानि परिवर्तयत ।*

उदा - यदा वाहनम् आगतं तदा आरक्षकः स्थगितवान् ।
वाहने आगते आरक्षकः स्थगितवान् ।

१. यदा वृष्टिः आगता तदा वस्त्राणि आर्द्राणि ।
....
२. यदा उपाहारः क्रियमाणः आसीत् तदा सेविका पतितवती ।
....
३. यदा देशः सुभिक्षः जातः तदा जनाः सन्तुष्टाः ।
....
४. यदा विज्ञापिका प्राप्ता तदा सः धनं दत्तवान् ।
....
५. यदा गुरुः दृष्टः तदा सः नमस्कृतवान् ।
....
६. यदा शिशुना स्वप्नः दृश्यमानः आसीत् तदा उच्चैः क्रन्दनं श्रुतम् ।
....

(**Note :** Compare your answers with those on the end of this book **(P.No. - 238)** and ascertain their correctness.)

२. पदसङ्ग्रहः

लभ् - to obtain

१. लभते २. लभ्यते ३. लप्स्यते
४. लब्धव्यम् - लम्भनीयम् ५. लब्धः - ब्धा - ब्धम् ६. लब्धवान् - वती ७. लभमानः - माना ८. लब्ध्वा - उपलभ्य ९. लब्धुम् ।

लू - to cut, to divide

१. लुनाति २. लूयते ३. लविष्यति
४. लवितव्यम् - लवनीयम् ५. लूनः - ना - नम् ६. लूनवान् - वती ७. लुनन् - ती ८. लवित्वा - उल्लूय ९. लवितुम् ।

वद - to talk

१ वदति २. उद्यते ३. वदिष्यति

४. वदितव्यम् - वदनीयम् ५. उदितः - ता - तम् ६. उदितवान् - वती

७. वदन् - न्ती ८. उदित्वा - अनूद्य ९. वदितुम् ।

वस् - to live

१. वसति २. उष्यते ३. वत्स्यति

४. वस्तव्यम् - वसनीयम् ५. उषितः - ता - तम् ६. उषितवान् - वती

७. वसन् - न्ती ८. उषित्वा - न्युष्य ९. वस्तुम् ।

वृध् - to grow, increase

१. वर्धते २. वर्ध्यते ३. वर्धिष्यते

४. वर्धितव्यम् - वर्धनीयम् ५. वर्धितः - ता - तम् ६. वर्धितवान् - वती

७. वर्धमानः - माना ८. वर्धित्वा - संवर्ध्य ९. वर्धितुम् ।

३. प्रहेलिका

का कान्ता कालियारातेः पुनरर्थे किमव्ययम् ।
किं वन्द्यं सर्वदेवानां फलेषु किमु सुन्दरम् ।।

Who is the wife of Vishnu, the enemy of Kaliya ? Which indeclinable is used in the sense of 'again' ? What is revered by all the Gods ? Which is the nicest among fruits ? Answer in one word.

Answer - मातुलिङ्गम् - A kind of fruit (Guava), मा = Lakshmi, तु = again, लिङ्गम् = the Shivalinga.

४. सुभाषितम्

१९. ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ।।

पदविभागः

ऐश्वर्यस्य, विभूषणम्, सुजनता, शौर्यस्य, वाक्संयमः, ज्ञानस्य,

उपशमः, श्रुतस्य, विनयः, वित्तस्य, पात्रे, व्ययः, अक्रोधः, तपसः, क्षमा, प्रभवितुः, धर्मस्य, निर्व्याजता, सर्वेषाम्, अपि, सर्वकारणम्, इदम्, शीलम्, परम्, भूषणम् ।

सन्धिः

वाक्संयमः + ज्ञानस्य - वि.सन्धिः (उकारः), ज्ञानस्य + उपशमः - गुणसन्धिः, विनयः + वित्तस्य - वि.सन्धिः(उकारः), अक्रोधः + तपसः - वि.सन्धिः (सकारः), प्रभवितुः + धर्मस्य - वि.सन्धिः (रेफः)

तात्पर्यम्

Kindness of spirit adorns wealth. Restraint over speech adorns valour. Wisdom is adorned by detachment to worldly matters. Modesty adorns scholarship. Charity to the deserving adorns wealth. Absence of anger adorns Penance. Forbearance adorns the capable and lack of pretence adorns religious practices. But character which is the root cause of all these qualities is the greatest ornament.

अन्वयः

ऐश्वर्यस्य सुजनता, शौर्यस्य वाक्संयमः, ज्ञानस्य उपशमः, श्रुतस्य विनयः, वित्तस्य पात्रे व्ययः, तपसः अक्रोधः, प्रभवितुः क्षमा, धर्मस्य निर्व्याजता च विभूषणम् । सर्वेषाम् अपि सर्वकारणम् इदं शीलं परं भूषणम् ।

प्रतिपदार्थः

सुजनता = Kindness, विभूषणम् = is a decoration, ऐश्वर्यस्य = for wealth, वाक्संयमः = controlled speech, शौर्यस्य = for valour, उपशमः = detachment to wordly things, ज्ञानस्य = for wisdom, विनयः = modesty, श्रुतस्य = for learning, पात्रे व्ययः = distribution amongst the deserving, वित्तस्य = for wealth, अक्रोधः = absence of anger, तपसः = for penance, and क्षमा = forbearance, प्रभवितुः = for the powerful and निर्व्याजता = absence of pretence, धर्मस्य = for religious Practices. सर्वेषाम् = For everybody, सर्वकारणम् इदं शीलम् = character which is the

cause of everything, परं भूषणम् = is the greatest ornament.

२०. दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुः तदपि न मुञ्चत्याशावायुः ॥

पदविभागः

दिनयामिन्यौ, सायम्, प्रातः, शिशिरवसन्तौ, पुनः, आयातः, कालः, क्रीडति, गच्छति, आयुः, तत्, अपि, न, मुञ्चति, आशावायुः ।

सन्धिः

पुनः + आयातः - विसर्गसन्धिः(रेफः), गच्छति + आयुः - यण्सन्धिः, मुञ्चति + आशावायुः - यण्सन्धिः

तात्पर्यम्

Day and night, dusk and dawn, winter and spring keep coming. Time plays (with our lives). Life is spent. Inspite of all this the ghost of desire never leaves us.

प्रतिपदार्थः

दिनयामिन्यौ = Day and night, सायम् = evening, प्रातः = and morning, शिशिरवसन्तौ = winter and spring, आयातः = come, पुनः = again. कालः = Time, क्रीडति = plays. आयुः = Life, गच्छति = is spent, तदपि = Even then, आशावायुः = the ghost of desire, न मुञ्चति = does not leave (us).

५. काव्यकथा

किरातार्जुनीयम्

शिवः एकं वनेचरं प्रेषितवान् । स[1] आगत्य[a] अर्जुनं निवेदितवान् - "भवान् राजश्रेष्ठः इति ममाभिप्रायः[2] । अतः प्रार्थनां करोमि । अस्य वराहस्य शरीरे बाणो[3] लग्नः[b] । सोऽस्माकम्[4] अधिपस्य[c] बाणः । भवान्

---

1. सः + आगत्य - विसर्गसन्धिः (लोपः) 2. मम + अभिप्रायः - सवर्णदीर्घसन्धिः 3. बाणः + लग्नः - विसर्गसन्धिः (उ) + गुणसन्धिः 4. सः + अस्माकम् - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः

---

a. having come, b. is stuck, c. of (our) lord,

महापुरुषः । भवता [5]शिवबाणस्यापहरणं[d] न कर्तव्यम्'' इति ।

अर्जुनः उक्तवान् - ''शिवस्य बाणः कुत्रापि[6] लीनः[e] स्यात् । अयं ममैव[7] बाणः । शूरस्य मम अन्येषां[f] बाणस्यापेक्षा[8] नास्ति । किञ्च, युगपत्[g] बाणः प्रयुक्तः[h] । अयं शिवस्यैव[9] बाण[10] इति वक्तुं न युक्तिः[i] । अहं वनवासी । वराहं हन्तुं [11]ममाधिकारोऽ[12]स्त्येव[13]'' इति ।

वनेचरो निवृत्तः[j] । सः[14] शिवं सर्वमुक्तवान् । किरातरूपः शिवः प्रमथगणं[k] प्रेषितवान् । प्रमथगणः अर्जुनेन सह युद्धमकरोत् । किन्तु पराजितः[l] । अनन्तरं शिवस्य सुतः कार्त्तिकेयः[m] [15]युद्धायागतवान् । [16]अर्जुनस्तमपि पराजितवान्[n] । ततः स्वयं शिव[17] एव युद्धार्थं प्रस्थितः[o] ।

किरातार्जुनयोर्मध्ये[18] भीकरं युद्धं प्रवृत्तम् । युद्धं दृष्ट्वा [19]देवाश्चकिताः[p] । किरातोऽतीव[20] युद्धकुशलः । [21]अतस्तं [22]दृष्ट्वार्जुनस्तर्कितवान्[23][q] - ''[24]किरातोऽयं रथसैन्यहीनः । तथापि मम सामर्थ्यं कुण्ठितं[r] करोति । [25]अतोऽयं न किरातः । दिव्यास्त्रैरस्य[26] पराक्रमो[27] निवारणीयः'' इति ।

---

5. शिवबाणस्य + अपहरणम् - सवर्णदीर्घसन्धिः 6. कुत्र + अपि - सवर्णदीर्घसन्धिः 7. मम + एव - वृद्धिसन्धिः 8. बाणस्य + अपेक्षा - सवर्णदीर्घसन्धिः 9. शिवस्य + एव - वृद्धिसन्धिः 10. बाणः + इति - विसर्गसन्धिः (लोपः) 11. मम + अधिकारः - सवर्णदीर्घसन्धिः 12. अधिकारः + अस्ति - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः 13. अस्ति + एव - यण्सन्धिः 14. सः + शिवम् -विसर्गसन्धि (लोपः) 15. युद्धाय + आगतवान् - सवर्णदीर्घसन्धिः 16. अर्जुनः + तम् - विसर्गसन्धिः (स) 17. शिवः + एव - विसर्गसन्धिः (लोपः) 18. किरातार्जुनयोः + मध्ये - विसर्गसन्धिः (र) 19. देवाः + चकिताः - विसर्गसन्धिः (स) + श्चुत्वसन्धिः 20. किरातः + अतीव - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः 21. अतः + तम् - विसर्गसन्धिः (स) 22. दृष्ट्वा + अर्जुनः - सवर्णदीर्घसन्धिः 23. अर्जुनः + तर्कितवान् - विसर्गसन्धिः (स) 24. किरातः + अयम् - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः 25. अतः + अयम् - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः 26. दिव्यास्त्रैः + अस्य - विसर्गसन्धिः (र) 27. पराक्रमः + निवारणीयः - विसर्गसन्धिः (उ) + गुणसन्धिः

---

d. theft, e. hidden, f. of others, g. simultaneously, h. was shot, i. there is no logic, j. went back, k. a group of goblins, l. was defeated, m. Shanmukha, n. defeated o. left for, p. were astonished, q. reflected (thought),

ततोऽर्जुनः - 'प्रस्वापनम्' [28]नामास्त्रं विमुक्तवान्[s] । अनेन महादेवः कुपितः । तदा तस्य [29]तृतीयनेत्राज्ज्वालोत्पन्ना[30] । 'प्रस्वापनास्त्रं' विफलञ्जातम्[31] । अर्जुनः नागास्त्रं विमुक्तवान् । तदपि विफलम् अभवत् । ततः [32]किरातार्जुनयोर्बाहुयुद्धमेवारब्धम्[33] ।

भीकरं बाहुयुद्धम् । युद्धे महान् ध्वनिरुत्पन्नः[34] । [35]उभयोरपि शरीरं रक्तमयं जातम् । युद्धे शिवः उपरि उद्गतवान्[t] । किन्तु अर्जुनस्तस्य[36] पादं गृहीतवान् । इदं दृष्ट्वा शिवः बहु सन्तुष्टः । शिवः किरातवेषं परित्यज्य निजरूपमेव स्वीकृतवान् । अर्जुनः शिवं नमस्कृतवान् । [37]शिवोऽप्यर्जुनम्[38] आलिङ्गितवान्[u] । तदा दिव्यध्वनिरुत्पन्नः[39] । [40]पुष्पवृष्टिश्चाभवत्[41] ।

अर्जुनो[42] वरं प्रार्थितवान् - ''शत्रुवर्गस्य नाशार्थं साधनं देहि'' इति । शिवः सन्तोषेण रहस्ययुतं[v] 'पाशुपतास्त्रं' दत्तवान् । धनुर्वेदमपि शिक्षितवान्[w] । अर्जुनो[43] धनुर्वेदं पठित्वा शिवस्य प्रदक्षिणं कृतवान् । इन्द्रादिदेवा[44] अपि अर्जुनायास्त्राणि[45] दत्तवन्तः । [46]शिवस्याज्ञामनुसृत्य अर्जुनो[47] गृहं निवृत्तः ।

प्रश्नाः

१. कस्य अपहरणं न कर्तव्यम् इति वनेचरः उक्तवान् ?

---

28. नाम + अस्त्रम् - सवर्णदीर्घसन्धिः 29. तृतीय-नेत्रात् + ज्वाला - जश्त्वसन्धिः + श्चुत्वसन्धिः 30. ज्वाला + उत्पन्ना - गुणसन्धिः 31. विफलं + जातम् - परसवर्णसन्धिः 32. किरातार्जुनयोः + बाहुयुद्धम् - विसर्गसन्धिः (र) 33. एव + आरब्धम् - सवर्णदीर्घसन्धिः 34. ध्वनिः + उत्पन्नः - विसर्गसन्धिः (र) 35. उभयोः + अपि - विसर्गसन्धिः (र) 36. अर्जुनः + तस्य - विसर्गसन्धिः (स) 37. शिवः + अपि - विसर्गसन्धिः (उ) + गुणसन्धिः + पूर्वरूपसन्धिः 38. अपि + अर्जुनम् - यण्सन्धिः 39. दिव्यध्वनिः + उत्पन्नः - विसर्गसन्धिः (र) 40. पुष्पवृष्टिः + च - विसर्गसन्धिः (स) + श्चुत्वम् 41. च + अभवत् - सवर्णदीर्घसन्धिः 42. अर्जुनः + वरम् - विसर्गसन्धिः (उ) + गुणसन्धिः 43. अर्जुनः + धनुर्वेदम् - विसर्गसन्धिः (उ) + गुणसन्धिः 44. इन्द्रादिदेवाः + अपि - विसर्गसन्धिः (लोपः) 45. अर्जुनाय + अस्त्राणि - सवर्णदीर्घसन्धिः 46. शिवस्य + आज्ञाम् - सवर्णदीर्घसन्धिः 47. अर्जुनः + गृहम् - विसर्गसन्धिः (उ) + गुणसन्धिः

---

r. reduced, s. shot (left) t. jumped up, u. embraced, v. secret, w. taught

२. शिवः युद्धार्थं कं कं प्रेषितवान् ?

३. महादेवः किमर्थं कुपितः ?

४. शिवः किमर्थं सन्तुष्टः अभवत् ?

५. शिवः किम् अस्त्रम् अर्जुनाय दत्तवान् ?

६. अन्वयरचना

२५. तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥

पदविभागः

तस्मात्, न, अर्हाः, वयम् - these are the only words joined here.

सन्धिः

तस्मात् + न - अनुनासिकसन्धिः, न + अर्हाः - सवर्णदीर्घसन्धिः, अर्हाः + वयम् - विसर्गसन्धिः (लोपः), स्वजनम् + हि - अनुस्वारसन्धिः

तात्पर्यम्

Therefore we ought not to kill our relatives, the sons of Dhritarashtra. O' Madhava ! how could we gain happiness by slaying our own kinsmen ?

वाक्यविश्लेषणम्

क्रिया	सम्बो.	प्रथमा	द्वितीया	पञ्चमी	अव्ययम्
न अर्हाः(भवामः) हन्तुं (तुमुन्नन्तम्)	-	वयम्	धार्तराष्ट्रान् स्वबान्धवान्	तस्मात्	
स्याम	माधव	(वयम्) सुखिनः	-	-	कथम्
हत्वा (क्त्वान्तम्)	-	-	स्वजनम्	-	

अन्वयरचना

अर्हाः न (भवामः) ।

के अर्हाः न ? - वयम्

किं कर्तुम् अर्हाः न ? - हन्तुम्
कान् हन्तुम् ? - धार्तराष्ट्रान्
कीदृशान् धार्तराष्ट्रान् ? - स्वबान्धवान्
कस्मात् अर्हाः न ? - तस्मात्
कथं स्याम ?
के कथं स्याम - (वयम्)
कीदृशाः कथं स्याम ? - सुखिनः
किं कृत्वा कथं स्याम ? - हत्वा
कं हत्वा ? - स्वजनं हि

२६. अहो बत महत् पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ।।

पदविभागः

अहो, बत, महत्, पापम्, कर्तुम्, व्यवसिताः, वयम्, यत्, राज्यसुखलोभेन, हन्तुम्, स्वजनम्, उद्यताः ।

सन्धिः

व्यवसिताः + वयम् - विसर्गसन्धिः (लोपः)
यत् + राज्यसुखलोभेन - जश्त्वसन्धिः, हन्तुम् + स्वजनम् - अनुस्वारसन्धिः

तात्पर्यम्

Alas ! We are indeed committing the worst sin as we are getting ready to slay our kinsmen out of greed for the pleasure of the kingdom.

वाक्यविश्लेषणम्

	क्रिया	*प्रथमा*	*द्वितीया*	*तृतीया*
१.	व्यवसिताः (स्मः)	वयम्		
	कर्तुम्		महत् पापम्	
२.	उद्यताः (स्मः)	(वयम्)		
	हन्तुम्		स्वजनम्	राज्यसुखलोभेन

* There are two sentences here.
* अहो ! बत ! - These are exclamations conveying feelings of surprise, despondency, disgust, pity etc. They are generally found in the beginning of a sentence.
* 'यत्' is a word meaning 'as'. Here it connects a subordinate clause to the main sentence. In अन्वयरचना there is no question pertaining to this.

अन्वयरचना

व्यवसिताः (स्मः)
के व्यवसिताः ? - वयम्
किं कर्तुं व्यवसिताः ? - कर्तुम्
किं कर्तुं व्यवसिताः ? - पापम्
कीदृशं पापम् ? - महत्
उद्यताः (स्मः)
के उद्यताः ? - (वयम्)
किं कर्तुम् उद्यताः ? - हन्तुम्
कं हन्तुम् ? - स्वजनम्
केन कारणेन हन्तुम् उद्यताः ? - राज्यसुखलोभेन

२७. एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥

पदविभागः

एवम्, उक्त्वा, अर्जुनः, संख्ये, रथोपस्थे, उपाविशत्, विसृज्य, सशरम्, चापम्, शोकसंविग्नमानसः ।

सन्धिः

उक्त्वा + अर्जुनः - सवर्णदीर्घसन्धिः
रथोपस्थे + उपाविशत् - यान्तादेशसन्धिः (यलोपः)

तात्पर्यम्

Arjuna, who suddenly became despondent in the battle field, having spoken thus dropped his bow and arrow, got up from his

seat and sat in the middle of the chariot.

वाक्यविश्लेषणम्

क्रिया	*कर्तृपदम्*	*कर्मपदम्*	*कुत्र*	*कथम्*
उक्त्वा	अर्जुनः शोकसंविग्न-मानसः		संख्ये	एवम्
उपाविशत्	,,	–	रथोपस्थे	–
विसृज्य	,,	सशरं चापम्	–	–

अन्वयरचना

उपाविशत्
कः उपाविशत् ? - अर्जुनः
कीदृशः अर्जुनः ? - शोकसंविग्नमानसः
किं कृत्वा उपाविशत् ? - उक्त्वा
कुत्र उपाविशत् ? - रथोपस्थे
कथम् उक्त्वा ? - एवम्
कुत्र उक्त्वा ? - संख्ये
पुनः किं कृत्वा ? - विसृज्य
कं विसृज्य ? - चापम्
कीदृशं चापम् ? - सशरम्

To dispel Arjuna's despondency and cowardice Srikrishna had to give a detailed exposition of the truth about body and soul. At the end Arjuna said **'करिष्ये वचनं तव'** and rose to fight. This teaching of Srikrishna to Arjuna on the battle field of Kurukshetra is the 'Bhagavadgita'.

७. सन्धयः

In the earlier lessons, Different types of Svara Sandhi, Vyanjana Sandhi and Visarga Sandhi have been learnt. The letters that undergo change in these Sandhis are given below for your easy comprehension.

स्वरसन्धयः

पूर्वपदस्थवर्णः (the last letter of the former word)		उत्तरपदस्थवर्णः (the first letter of the following word)	सन्धिनाम
* अ/आ	+	अ/आ	- सवर्णदीर्घसन्धिः
इ/ई	+	इ/ई	
उ/ऊ	+	उ/ ऊ	
ऋ/ ॠ	+	ऋ/ ॠ	
* अ/आ	+	इ/ई, उ/ऊ, ऋ/ॠ, ऌ	- गुणसन्धिः
* अ/आ	+	ए, ऐ, ओ, औ	- वृद्धिसन्धिः
* इ/ई, उ/ऊ ऋ/ॠ, ऌ	+	असवर्णस्वरः any svara other than its सवर्ण	- यण्सन्धिः
* ए, ओ	+	अ	- पूर्वरूपसन्धिः
* ए, ओ	+	any vowel other than	- यान्तावान्तादेशसन्धिः
ऐ, औ	+	ह्रस्व अकार	

व्यञ्जनसन्धयः

* सकार & तवर्ग (स त थ द ध न) (either in the पूर्वपद or उत्तरपद)	+	शकार & तवर्ग (श च छ ज झ ञ) (either in the पूर्वपद or उत्तरपद)	- श्चुत्वसन्धिः
* सकार & तवर्ग (स त थ द ध न) (either in the पूर्वपद or उत्तरपद)	+	षकार & टवर्ग (ष ट ठ ड ढ ण) (either in the पूर्वपद or उत्तरपद)	- ष्टुत्वसन्धिः
* वर्गीयव्यञ्जनम्	+	स्वरः/मृदुव्यञ्जनम्	- जश्त्वसन्धिः
* वर्गीयव्यञ्जनम्	+	कर्कशव्यञ्जनम्	- चर्त्वसन्धिः

* वर्गीयव्यञ्जनम्	+	अनुनासिकाः (the fifth letter of each varga)	- अनुनासिकसन्धिः
* पदान्तमकारः	+	व्यञ्जनम्	- अनुस्वारसन्धिः
* अनुस्वारः	+	व्यञ्जनम् (except श, ष, स, ह)	- परसवर्णसन्धिः
* ङ, ण, न coming after a ह्रस्वस्वर	+	स्वरः	- ङमुडागमसन्धिः

(The rules of पूर्वसवर्ण and छत्वसन्धि are not included here.)

विसर्गसन्धिः

preceding visarga		Visarga		followed by		change in visarga
* ह्रस्व अकारः	+	:	+	अकारः/ मृदुव्यञ्जनम्	=	उकारः
* i) "	+	:	+	any vowel except ह्रस्व अकारः	=	लोपः
ii) आकारः	+	:	+	स्वरः / मृदुव्यञ्जनम्	=	लोपः
iii) सः/ एषः	+	:	+	any letter other than ह्रस्व अकारः	=	लोपः
* Any vowel other than अकारः	+	:	+	मृदुव्यञ्जनम्	=	रेफः
* Any letter (स्वरः/ व्यञ्जनम्)	+	:	+	स, च, छ	=	शकारः
	+	:	+	ष, ट, ठ	=	षकारः
	+	:	+	क,ख,प,फ	=	विसर्ग remains.

अभ्यासः

I. Join the following words and say what change visarga has undergone.

उदा - नृपतिः + अयम् = नृपतिरयम् (रेफः)

१. सुखिनः + भवन्तु = ... (..........)

२. नमः + नमः = ... (..........)
३. बालः + आगतः = ... (..........)
४. रविः + उदेति = ... (..........)
५. देवः + उवाच = ... (..........)
६. पुनः + एषः = ... (..........)
७. प्रातः + अपि = ... (..........)
८. गुरुः + विष्णुः = ... (..........)
९. सः + वदति = ... (..........)
१०. नमः + तुभ्यम् = ... (..........)
११. दुर्जनः + तु = ... (..........)
१२. बालः + नमति = ... (..........)
१३. शम्भुः + अवदत् = ... (..........)
१४. भीमः + अवदत् = ... (..........)
१५. गुरुः + गतः = ... (..........)

II. Split the Sandhi and say what change visarga has undergone.

उदा - नृपतिस्सः = नृपतिः + सः (सकारः)

१. शिवोऽर्चितः = ... + ... (..........)
२. मेघा आकाशे = ... + ... (..........)
३. नृपतेरादेशः = ... + ... (..........)
४. रामोऽनमत् = ... + ... (..........)
५. जनो गतः = ... + ... (..........)
६. स जनः = ... + ... (..........)

III. Join the following words.

(अ)

बालः + अस्ति = ...
बालः + आगच्छति = ...
बालः + हसति = ...
बालः + तिष्ठति = ...
बालः + करोति = ...

८. लौकिकन्यायाः

19. बकबन्धप्रयासन्यायः - Once there was a pond. In the afternoon two friends spotted a lone crane in the middle of the pond. They wanted to catch it. One of them suggested that they put some butter on the head of the bird and when it melted and obscured the sight of the bird they would catch it.
Then the other pointed out that they could actually catch the bird as they put butter on its head !
This maxim is quoted when a simple job is unnecessarily complicated.

20. शतपत्रपत्रशतभेदन्यायः - A needle is easily passed through a hundred lotus petals as they are very soft. Though the needle has pierced all hundred petals it was very fast. Similarly many things done in an orderly fashion, when accomplished quickly, one wonders how it was possible. Then the above maxim is quoted.

१०. सङ्ख्याविषयाः

अ) अष्ट सिद्धयः -

अणिमा महिमा चैव गरिमा लघिमा तथा ।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः ।।

अणिमा, महिमा, गरिमा, लघिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वम् and वशित्वम् are the eight Siddhis.

सप्त मातरः -

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः ।।

ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी and चामुण्डा are the seven mother-deities.

आ) Many a western author has made significant contribution to Samskrit by translating Samskrit works into English. Some of the well known works are mentioned below.

1. Rgveda (with Sayana's commentary) - Max Muller.
2. Vedic Reader - A.A. Macdonell.
3. Abhijnana Shakuntalam of Kalidasa - Sir William Jones.
4. Kadambari of Bana - A.B.Keith.
5. Samskrit drama - particularly Bhasa's plays - Pishel, Konow and Luders.
6. History of Samskrit literature - Winternitz.
7. History of Samskrit literature - W. B. Weber.
8. Samskrit English dictionary - Monier Williams.
9. Samskrit - English & English - Samskrit Dictionary - V.S. Apte

●●

शिक्षा - दशमः पाठः

प्रश्नाः

I. आवरणे दत्तानां पदानां सप्तम्यन्तरूपं लिखत ।

१. (भवनं पतितम्) .... जनाः धावितवन्तः ।
२. (अध्यापकः आगतः) .... छात्राः उत्थितवन्तः ।
३. (स्वामी आहूतवान्) .... सेवकः धावितवान् ।
४. (बालकः रुदितवान्) .... माता उत्थितवती ।
५. (मन्त्री दृष्टः) .... जनाः हर्षं प्राप्तवन्तः ।

II. एतेषु उदाहरणेषु स्थूलाक्षरैः लिखितं सप्तम्यन्तपदं किं प्रत्ययान्तम् इति निर्दिशत ।

उदा - रामे **गतवति** दशरथः मूर्च्छां गतः । (क्तवतुप्रत्ययान्तम्)
१. बालके **धावति** सति वृष्टिः आगता । (.................)
२. मयि **चिन्तितवति** सति माता आहूतवती । (.................)
३. तस्याम् **आगच्छन्त्याम्** एषा उत्थिता । (.................)
४. पाठे **पाठ्यमाने** सम्भाषणं न करणीयम् । (.................)
५. मित्रे **दृष्टे** कस्य सन्तोषः न भवति ? (.................)

III. युक्तं पदं लिखत ।

१. ऐश्वर्यम् - सुजनता, शौर्यम् - ....
२. ज्ञानम् - उपशमः, श्रुतम् - ....
३. पात्रे व्ययः - वित्तम्, अक्रोधः - ....
४. समर्थः - क्षमा, सर्वे - ....

(**Note:** Answers for the above exercises are given in the end of this book. **(P.No. - 238)** After completing them, check your answers.)

शिक्षा - एकादशः पाठः

।। सत्यार्जवे धर्ममाहुः परं धर्मविदो जनाः ।।

Wise men say that being truthful and straight forward is the greatest Dharma.

In the ten preceding lessons you learnt the rules of अन्वयरचना and their application in selected verses of the Bhagavadgita. Here, we give all those rules together for your easy comprehension.

I. The rules of अन्वयरचना

1. Identify the verb first. If there are more than one verb it means that there are as many sentences. You must then identify the कर्तृ, कर्म etc. of each verb.
2. In each sentence you must group the words of the same vibhakti and then put appropriate questions with respect to each of them depending on its relation with the verb.
3. To find the कर्तृपदम् the question should be कः/ का/ किम्
4. To find the कर्मपदम् the question should be कम् / काम् / किम्
5. The number (वचनम्) of the question should be according to that of the कर्तृ or कर्म ie., if the कर्तृ / कर्म is in एकवचनम् the question too should be in एकवचनम् and if it is in द्विवचनम् or बहुवचनम् the question will also be in द्विवचनम् or बहुवचनम् ।
6. The question कुत्र with respect to the verb will provide an answer that conveys a location or a word that is in सप्तमीविभक्तिः ।
7. The question कस्मात् or कुतः on the verb, elicits a word in पञ्चमी (अपादानवाचकम्) and one that conveys the reason for the action.

8. The question 'केन ?' elicits the करणवाचकम् (तृतीयान्तपदम्) as the answer. However in कर्मणि and भावे प्रयोग you must put the question केन to elicit the कर्तृपदम् also.

   Eg., i. रामः बाणेन रावणं हतवान् ।
   रामः केन हतवान् ? - बाणेन (करणम्)

   ii. रामेण रावणः निहतः ।
   रावणः केन निहतः ? - रामेण (कर्ता)

9. If there is the indeclinable 'कृते' in a sloka, the question should be किमर्थम् / कस्य कृते - 'what for ?'

10. To elicit the adjectives to कर्तृपदम् the question should be कीदृशः/ कीदृशी/ कीदृशम् (प्रथमान्तः) । Similarly adjectives to कर्मपदम् can be elicited with the question कीदृशम्/कीदृशीम्/ कीदृशम् (द्वितीयान्तः) । However, when a sentence is inpassive (कर्मणि प्रयोगः) or impersonal (भावे प्रयोगः) voice कर्तृपदम् is elicited with the question केन / कया / केन and कर्मपदम् with कः/का/किम् । Accordingly, their adjectives should also be elicited with a question in तृतीया as कीदृशेन/ कीदृश्या/ कीदृशेन and प्रथमा as कीदृशः/ कीदृशी/ कीदृशम् respectively.

11. For adverbs (क्रियाविशेषणानि) the question is 'कथम्'

    Eg., - सः शीघ्रम् अगच्छत् ।
    सः कथम् अगच्छत् ?

12. If a word has more than one adjective the first one is elicited with 'कीदृशः ?' and the subsequent ones with 'पुनः कीदृशः ?'

13. A क्त्वान्ताव्ययम् /ल्यबन्तम् is elicited with 'किं कृत्वा ?' ।

14. When there is no क्रियापदम् it is to be supplied according to the meaning. This feature is known as 'अध्याहारः' in Samskrit.
    Eg., परोपकारार्थमिदं शरीरम्. Here the verb अस्ति has to be supplied.

15. When a तुमुन्नन्ताव्ययम् is found in a sentence, the question should be 'किं कर्तुम् ?'

16. A विशेषण शत्रन्त can either be elicited with 'किं कुर्वन् ?' or 'कीदृशः ?'

17. In some sentences you may come across more than one word ending in द्वितीयाविभक्ति । In such places there will be one principal verb and the rest will be क्त्वान्त, ल्यबन्त तुमुन्नन्त etc. You must ascertain as to which verb is related to which word and carefully do the अन्वय ।
    Eg., अर्जुनः पाण्डवानीकं दृष्ट्वा आचार्यम् उपसङ्गम्य वचनम् अब्रवीत् ।
    In this sentence the action (क्रिया) दृष्ट्वा is syntactically connected with पाण्डवानीकम्, उपसङ्गम्य with आचार्यम् and अब्रवीत् with वचनम् । अब्रवीत् is the principal verb.
18. A word in the vocative case of address (सम्बोधना विभक्ति) should be placed in the beginning of the sentence as it is. There will be no question pertaining to it.
19. When a verb is found in मध्यमपुरुष - Eg, पश्य, गच्छसि etc., and the कर्तृपदम् is not mentioned, the word त्वम् is to be supplied. Similarly, when the verb is in उत्तमपुरुष - Eg, गच्छामि, पठामि etc., and the कर्तृपद is not mentioned, अहम् is to be supplied.
20. In अत्र शूराः युयुधानः विराटः द्रुपदः च (सन्ति) the verb सन्ति is supplied to the sentence as a whole. However, since it is a sentence with several subjects (कर्तृपदानि) when a question is put for each of those एकवचनान्त words the verb अस्ति has to be supplied.
21. Indeclinables like तदा, तु, एव, हि, अपि, च etc., should be taken with other words suitably. These lay emphasis on a statement.
22. The question pertaining to a क्तप्रत्ययान्त-भूतकृदन्त passive past participle should be 'कथम्भूतः ?' ।
23. Some times a single sentence runs through two or more verses. In such cases the अन्वय of both or all of them should be done together.
24. The question कस्य / कस्याः with respect to the कर्तृवाचक and कर्मवाचक words, elicits as answer, a word that says to whom the कर्तृ / कर्म belongs.

25. A word ending in षष्ठीविभक्ति must be placed along with that to which it is related.
26. Verbs like वदति, पृच्छति etc., are द्विकर्मक – ie., they have two कर्मपद each. In a sentence with द्विकर्मकक्रियापद you may come across two objects (कर्मपदे) । You must then put questions to each of them separately.

    उदा – कृष्णः अर्जुनं वाक्यम् आह ।

    कः आह ? – कृष्णः

    कम् आह ? – अर्जुनम्

    किम् आह ? – वाक्यम्
27. The use of two words in सप्तमी denotes time. It is a special usage known as भावलक्षणा सप्तमी - The Locative absolute. Here both the words in सप्तमी should be taken together.

    Eg., प्रवृत्ते शस्त्रसम्पाते – when the shooting / fall of weapons started.
28. यावत् – तावत्, यत् – तत् etc., are correlatives that connect two sentences. In अन्वयरचना suitable questions should be put for both the sentences. But there will be no question with respect to यावत् – तावत्, यत् – तत् etc.,
29. 'न' is a negative particle (निषेधार्थकः/ अभावार्थकः). It always goes with the क्रिया । So, while putting a question न must be taken with the क्रिया ।
30. Some collective nouns like स्वजनम् are actually ending in एकवचनप्रत्ययः । Therefore even if they refer to many, the question should be in singular only.
31. The first sentence may have a क्रियापदम् and the subsequent ones may have just 'न' । In such cases the verb is drawn from the first one to the subsequent sentences also.

    Eg., न काङ्क्षे विजयम् । न च राज्यम् । Here, in the second sentence also the same verb काङ्क्षे is taken.
32. Expressions like 'किं राज्येन' etc., mean किं प्रयोजनम् अस्ति ?'

'प्रयोजनम्' is the कर्तृपदम् here and अस्ति, the verb. Both these words are supplied.

33. In a sentence if the name of a person is mentioned and there is also a common noun the question 'किं नाम ?' is to be put.
    Eg., कृष्णः नाम बालः अस्ति । 'There is a boy by name Krishna'
    Here बालः is a common noun. To the question 'किं नाम बालः ?
    we get the answer 'कृष्णः नाम बालः' ।
34. When you find the word 'इव' in a sloka it should be included in the question also.
    Eg., 'राजा देवः इव अस्ति', 'वैद्यः यमः इव अस्ति', 'शासकः राक्षसः इव अस्ति' । When the question 'कः इव ?' is put you get the answer देवः इव, यमः इव and राक्षसः इव ।
35. The questions 'केन सह ?' and 'कया सह ?' elicit the word denoting the accompanying person.

उदा - i. रामः लक्ष्मणेन सह गच्छति ।
रामः केन सह गच्छति ?
लक्ष्मणेन सह गच्छति ।
ii. रामः सीतया सह गच्छति ।
रामः कया सह गच्छति ?
सीतया सह गच्छति ।

2. Participle forms

During the courses of Parichaya and Shiksha you have learnt the participle forms of several roots.The same have been listed here under for your convenience and easy comprehension.

Eg., अस्यति (असु - to throw)

१. असितव्यम् २. असनीयम् ३. अस्तः ४. अस्तवान् ५. अस्यन् - न्ती
६. असितुम् ७. असित्वा-अस्त्वा ८. उपन्यस्य ९. असनम्

To begin with the present tense form (लट् प्र.पु. एक) of the धातु and the धातु with its meaning, are given. Then nine participle forms of the same धातु are given.They are -

1. The form ending in 'तव्यत्'प्रत्ययान्तरूपम् (असितव्यम्)
2. ,, 'अनीयर्'प्रत्ययान्तरूपम् (असनीयम्)
3. ,, 'क्त'प्रत्ययान्तरूपम् (अस्तः)
4. ,, 'क्तवतु'प्रत्ययान्तरूपम् (अस्तवान्)
5. ,, 'शतृ'प्रत्ययान्तरूपम् (पुं, स्त्री) (अस्यन् - न्ती)
6. ,, 'तुमुन्'प्रत्ययान्तरूपम् (असितुम्)
7. ,, 'क्त्वा'प्रत्ययान्तरूपम् (असित्वा - अस्त्वा)
8. ,, 'ल्यप्'प्रत्ययान्तरूपम् (उपन्यस्य-उप-नि-अस्+ल्यप्)
9. ,, 'ल्युट्'प्रत्ययान्तरूपम् (असनम्)

You are familiar with the first eight forms. The ninth and the last is ल्युट्प्रत्ययः । Its usage in sentences is as follows.

1. सः सम्यक् **अध्ययनं** करोति ।
2. कविः ग्रन्थानां **परिशीलनं** करोति ।
3. पाषाणस्य **क्षेपणेन** सः फलं पातयति ।
4. **शयनात्** पूर्वं सः देवं स्मरति ।
5. **गमनस्य** अनन्तरं तेन पत्रं न लिखितम् ।

Let us now see the various participle forms of roots. They are given in the alphabetical order taking into consideration the लट्लकार form of the धातु and not the धातु itself.

१. अङ्कयति (अङ्क् - to mark, to put a symbol on)

१. अङ्कयितव्यम् २. अङ्कनीयम् ३. अङ्कितः ४. अङ्कितवान् ५. i. अङ्क-यन् - न्ती, ii. अङ्कयमानः ६. अङ्कयितुम् ७. अङ्कयित्वा ८. समङ्क्य ९. अङ्कनम्

२. अधीते (अधि + इङ् - to study)

१. अध्येतव्यम् २. अध्ययनीयम् ३. अधीतः ४. अधीतवान् ५. अधीयानः ६. अध्येतुम् ७. ....* ८. अधीत्य ९. अध्ययनम्

३. अटति (अट - to wander)

१. अटितव्यम् २. अटनीयम् ३. अटितः ४. अटितवान् ५. अटन् - न्ती ६. अटितुम् ७. अटित्वा ८. समाट्य ९. अटनम्

४. आप्नोति (आप्लृ - to obtain, attain, get)

---

* अयं धातुः नित्यम् अधिपूर्वः । अतः अस्य धातोः क्त्वान्तं रूपं नास्ति ।

१. आप्तव्यम् २. आपनीयम् ३. आप्तः ४. आप्तवान् ५. आप्नुवन् - ती
६. आप्तुम् ७. आप्त्वा ८. प्राप्य ९. प्रापणम्

५. इच्छति (इष - to desire)

१. एष्टव्यम् - एषितव्यम् २. एषणीयम् ३. इष्टः ४. इष्टवान्
५. इच्छन् - न्ती - ती ६. एष्टुम् - एषितुम् ७. एषित्वा - इष्ट्वा ८. प्रेष्य
९. एषणम्

६. ऊहते (ऊह - to guess)

१. ऊहितव्यम् २. ऊहनीयम् ३. ऊहितः ४. ऊहितवान् ५. ऊहमानः
६. ऊहितुम् ७. समुह्य ८. ऊहित्वा ९. ऊहनम्

७. कथयति (कथ - to narrate)

१. कथयितव्यम् २. कथनीयम् ३. कथितः ४. कथितवान् ५. i. कथ-
यन् - न्ती ii. कथयमानः ६. कथयितुम् ७. कथयित्वा ८. अनुकथय्य
९. कथनम्

८. कम्पते (कपि - to tremble, shake, shiver)

१. कम्पितव्यम् २. कम्पनीयम् ३. कम्पितः ४. कम्पितवान् ५. कम्प-
मानः ६. कम्पितुम् ७. कम्पित्वा ८. प्रकम्प्य ९. कम्पनम्

९. करोति (कृञ् - to do, make)

१. कर्तव्यम् २. करणीयम् ३. कृतः ४. कृतवान् ५. i. कुर्वन् - ती,
ii. कुर्वाणः ६. कर्तुम् ७. कृत्वा ८. उपकृत्य ९. करणम्

१०. कर्षति (कृष - to pull, draw)

१. क्रष्टव्यम् - कर्ष्टव्यम् २. कर्षणीयम् ३. कृष्टः ४. कृष्टवान्
५. कर्षन् - न्ती ६. क्रष्टुम् - कर्ष्टुम् ७. कृष्ट्वा ८. आकृष्य ९. कर्षणम्

११. किरति (कॄ - to scatter, spray)

१. करितव्यम् - करीतव्यम् २. करणीयम् ३. कीर्णः ४. कीर्णवान्
५. किरन् - न्ती - ती ६. करितुम् - करीतुम् ७. कीर्त्वा ८. विकीर्य
९. करणम्

१२. कुप्यति (कुप - to be angry)

१. कोपितव्यम् २. कोपनीयम् ३. कुपितः ४. कुपितवान् ५. कुप्यन् - न्ती
६. कोपितुम् ७. कुपित्वा - कोपित्वा ८. प्रकुप्य - प्रकोप्य ९. कोपनम्

१३. क्रन्दति (क्रदि - to cry aloud)

१. क्रन्दितव्यम् २. क्रन्दनीयम् ३. क्रन्दितः ४. क्रन्दितवान् ५. क्रन्दन् -

न्ती ६. क्रन्दितुम् ७. क्रन्दित्वा ८. आक्रन्द्य ९. क्रन्दनम्

१४. **क्रामति** (क्रमु - to walk, step, go)
१. क्रमितव्यम् २. क्रमणीयम् ३. क्रान्तः ४. क्रान्तवान् ५. क्राम्यन् - न्ती, क्रामन् - न्ती ६. क्रमितुम् ७. क्रमित्वा - क्रान्त्वा - क्रान्त्वा ८. प्रक्रम्य ९. क्रमणम्

१५. **क्रीणाति** (क्रीञ् - to buy)
१. क्रेतव्यम् २. क्रयणीयम् ३. क्रीतः ४. क्रीतवान् ५. i. क्रीणन् - ती, ii. क्रीणानः ६. क्रेतुम् ७. क्रीत्वा ८. विक्रीय ९. क्रयणम्

१६. **क्षाम्यति** (क्षमू - to pardon, forgive)
१. क्षमितव्यम् - क्षन्तव्यम् २. क्षमणीयम् ३. क्षान्तः ४. क्षान्तवान् ५. क्षाम्यन् - न्ती ६. क्षमितुम् - क्षन्तुम् ७. क्षमित्वा - क्षान्त्वा ८. प्रक्षम्य ९. क्षमणम्

१७. **क्षालयति** (क्षल - to wash)
१. क्षालयितव्यम् २. क्षालनीयम् ३. क्षालितः ४. क्षालितवान् ५. i. क्षालयन् - न्ती, ii. क्षालयमानः ६. क्षालयितुम् ७. क्षालयित्वा ८. प्रक्षाल्य ९. क्षालनम्

१८. **खनति** (खनु - to dig)
१. खनितव्यम् २. खननीयम् ३. खातः ४. खातवान् ५. i. खनन् - न्ती, ii. खनमानः ६. खनितुम् ७. खनित्वा - खात्वा ८. प्रखाय - प्रखन्य ९. खननम्

१९. **खादति** (खादृ - to eat)
१. खादितव्यम् २. खादनीयम् ३. खादितः ४. खादितवान् ५. खादन् - न्ती ६. खादितुम् ७. खादित्वा ८. प्रखाद्य ९. खादनम्

२०. **खिद्यते** (खिद - to be sad)
१. खेत्तव्यम् २. खेदनीयम् ३. खिन्नः ४. खिन्नवान् ५. खिद्यमानः ६. खेत्तुम् ७. खित्वा ८. सङ्खिद्य ९. खेदनम्

२१. **गच्छति** (गम्लृ - to go)
१. गन्तव्यम् २. गमनीयम् ३. गतः ४. गतवान् ५. गच्छन् - न्ती ६. गन्तुम् ७. गत्वा ८. आगत्य ९. गमनम्

२२. **गणयति** (गण - to count)
१. गणयितव्यम् २. गणनीयम् ३. गणितः ४. गणितवान् ५. i. गणयन्

- न्ती, ii. गणयमानः ६. गणयितुम् ७. गणयित्वा ८. विगणय्य ९. गणनम्

२३. गर्जति (गर्ज - to roar)
१. गर्जितव्यम् २. गर्जनीयम् ३. गर्जितः ४. गर्जितवान् ५. गर्जन् - न्ती ६. गर्जितुम् ७. गर्जित्वा ८. प्रगर्ज्य ९. गर्जनम्

२४. गायति (गै - to sing)
१. गातव्यम् २. गानीयम् ३. गीतः ४. गीतवान् ५. गायन् - न्ती ६. गातुम् ७. गीत्वा ८. अनुगाय ९. गानम्

२५. गिलति (गॄ - to swallow)
१. गलितव्यम् - गलीतव्यम्, गरितव्यम् - गरीतव्यम् २. गलनीयम् - गरणीयम् ३. गीर्णः ४. गीर्णवान् ५. गिलन् - गिरन् - न्ती - ती ६. गलितुम् - गलीतुम्, गरितुम् - गरीतुम् ७. गीर्त्वा ८. निगीर्य ९. गरणम्

२६. गृह्णाति (ग्रह - to grasp, hold, catch)
१. ग्रहीतव्यम् २. ग्रहणीयम् ३. गृहीतः ४. गृहीतवान् ५. i. गृह्णन् - न्ती ii. गृह्णानः ६. ग्रहीतुम् ७. गृहीत्वा ८. अनुगृह्य ९. ग्रहणम्

२७. चर्वति (चर्व - to chew and eat)
१.चर्वितव्यम् २. चर्वणीयम् ३. चर्वितः ४. चर्वितवान् ५. चर्वन् - न्ती ६. चर्वितुम् ७. चर्वित्वा ८. प्रचर्व्य ९. चर्वणम्

२८. चिनोति (चिञ् - to choose, select)
१. चेतव्यम् २. चयनीयम् ३. चितः ४. चितवान् ५. i. चिन्वन् - ती i. चिन्वानः ६. चेतुम् ७. चित्वा ८. निश्चित्य ९. चयनम्

२९. चिन्तयति (चिति - to think, reflect)
१. चिन्तयितव्यम् २. चिन्तनीयम् ३. चिन्तितः ४. चिन्तितवान् ५. i. चिन्तयन् - न्ती, ii. चिन्तयमानः ६. चिन्तयितुम् ७. चिन्तयित्वा ८. विचिन्त्य ९. चिन्तनम्

३०. चोरयति (चुर - to steal)
१. चोरयितव्यम् २. चोरणीयम् ३. चोरितः ४. चोरितवान् ५. i. चोर-यन् - न्ती, ii. चोरयमाणः ६. चोरयितुम् ७. चोरयित्वा ८. प्रचोर्य ९. चोरणम्

३१. छादयति (छद - to cover)
१. छादयितव्यम् २. छादनीयम् ३. छादितः - छन्नः ४. छादितवान् -

छन्नवान् ५. i. छादयन् - न्ती ii. छादयमानः ६. छादयितुम् ७. छादयित्वा ८. आच्छाद्य ९. छादनम्

३२. छिनत्ति (छिदिर् - to cut down)
१. छेत्तव्यम् २. छेदनीयम् ३. छिन्नः ४. छिन्नवान् ५. i. छिन्दन् - न्ती, ii. छिन्दानः ६. छेत्तुम् ७. छित्त्वा ८. विच्छिद्य ९. छेदनम्

३३. जपति (जप - to chant)
१. जपितव्यम् २. जपनीयम् ३. जपितः ४. जपितवान् ५. जपन् - न्ती ६. जपितुम् ७. जपित्वा ८. सञ्जप्य ९. जपनम्

३४. जयति (जि - to win)
१. जेतव्यम् २. जयनीयम् ३. जितः ४. जितवान् ५. जयन् - न्ती ६. जेतुम् ७. जित्वा ८. विजित्य ९. जयनम्

३५. जागर्ति (जागृ - to wake up)
१. जागरितव्यम् २. जागरणीयम् ३. जागरितः ४. जागरितवान् ५. जाग्रत् - जाग्रती ६. जागरितुम् ७. जागरित्वा ८. सञ्जागर्य ९. जागरणम्

३६. जानाति (ज्ञा - to know)
१. ज्ञातव्यम् २. ज्ञानीयम् ३. ज्ञातः ४. ज्ञातवान् ५. i. जानन् - ती, ii. जानानः ६. ज्ञातुम् ७. ज्ञात्वा ८. विज्ञाय ९. ज्ञानम्

३७. जायते (जनी - to be born)
१. जनितव्यम् २. जननीयम् ३. जातः ४. जातवान् ५. जायमानः ६. जनितुम् ७. जनित्वा ८. प्रजन्य - प्रजाय ९. जननम्

३८. जिघ्रति (घ्रा - to sniff, smell)
१. घ्रातव्यम् २. घ्राणीयम् ३. घ्राणः - घ्रातः ४. घ्राणवान् - घ्रातवान् ५. जिघ्रन् - न्ती ६. घ्रातुम् ७. घ्रात्वा ८. आघ्राय ९. घ्राणम्

३९. डयते (डीङ् - to fly)
१. डयितव्यम् २. डयनीयम् ३. डयितः - डियितः ४. डयितवान् - डियितवान् ५. डयमानः ६. डयितुम् ७. डयित्वा ८. उड्डीय ९. डयनम्

४०. तरति (तॄ - to swim)
१. तरितव्यम् - तरीतव्यम् २. तरणीयम् ३. तीर्णः ४. तीर्णवान् ५. तरन् - न्ती ६. तरितुम् - तरीतुम् ७. तीर्त्वा ८. वितीर्य ९. तरणम्

४१. ताडयति (तड - to beat)
१. ताडयितव्यम् २. ताडनीयम् ३. ताडितः ४. ताडितवान्

५. i. ताडयन् - न्ती, ii. ताडयमानः ६. ताडयितुम् ७. ताडयित्वा ८. सन्ताड्य ९. ताडनम्

४२. **तिष्ठति** (ष्ठा - to stand, stay)
१. स्थातव्यम् २. स्थानीयम् ३. स्थितः ४. स्थितवान् ५. तिष्ठन् - न्ती ६. स्थातुम् ७. स्थित्वा ८. प्रस्थाय ९.स्थानम्

४३. **तुष्यति** (तुष - to be happy)
१. तोष्टव्यम् २. तोषणीयम् ३. तुष्टः ४. तुष्टवान् ५. तुष्यन् - न्ती ६. तोष्टुम् ७. तुष्ट्वा ८. सन्तुष्य ९. तोषणम्

४४. **तोलयति** (तुल - to compare)
१. तोलयितव्यम् २. तोलनीयम् ३. तोलितः ४. तोलितवान् ५. i. तोलयन् - न्ती, ii. तोलयमानः ६. तोलयितुम् ७. तोलयित्वा ८. उत्तोल्य ९. तोलनम्

४५. **त्यजति** (त्यज - to leave, abandon)
१. त्यक्तव्यम् २. त्यजनीयम् ३. त्यक्तः ४. त्यक्तवान् ५. त्यजन् - न्ती ६. त्यक्तुम् ७. त्यक्त्वा ८. परित्यज्य ९. त्यजनम्

४६. **ददाति** (दाञ् - to give)
१. दातव्यम् २. दानीयम् ३. दत्तः ४. दत्तवान् ५. i. ददत् - ती, ii. ददानः ६. दातुम् ७. दत्त्वा ८. प्रदाय ९. दानम्

४८. **दशति** (दंश - to bite)
१. दंष्टव्यम् २. दंशनीयम् ३. दष्टः ४. दष्टवान् ५. दशन् - न्ती ६. दंष्टुम् ७. दष्ट्वा ८. विदश्य ९. दंशनम् - दशनम्

४९. **दहति** (दह - to burn)
१. दग्धव्यम् २. दहनीयम् ३. दग्धः ४. दग्धवान् ५. दहन् - न्ती ६. दग्धुम् ७. दग्ध्वा ८. प्रदह्य ९.दहनम्

५०. **दिशति** (दिश - to show, point out)
१. देष्टव्यम् २. देशनीयम् ३. दिष्टः ४. दिष्टवान् ५. i. दिशन् - न्ती, ii. दिशमानः ६. देष्टुम् ७. दिष्ट्वा ८. निर्दिश्य ९. देशनम्

५१. **दोग्धि** (दुह - to milk)
१. दोग्धव्यम् २. दोहनीयम् ३. दुग्धः ४. दुग्धवान् ५. i. दुहन् - ती, ii. दुहानः ६. दोग्धुम् ७. दुग्ध्वा ८. प्रदुह्य ९. दोहनम्

५२. धरति (धृञ् - to wear)
१. धर्तव्यम् २. धरणीयम् ३. धृतः ४. धृतवान् ५. i. धरन् - न्ती, ii. धरमाणः ६. धर्तुम् ७. धृत्वा ८. प्रधृत्य ९. धरणम्

५३. धावति (धावृ - to run, to clean, wash)
१. धावितव्यम् २. धावनीयम् ३. धावितः - धौतः ४. धावितवान् - धौतवान् ५. i. धावन् - न्ती, ii. धावमानः ६. धावितुम् ७. धावित्वा, धौत्वा ८. प्रधाव्य ९. धावनम्

५४. नमति (णम - to bow down)
१. नन्तव्यम् २. नमनीयम् ३. नतः ४. नतवान् ५. नमती - न्ती ६. नन्तुम् ७. नत्वा ८. प्रणत्य - प्रणम्य ९. नमनम्

५५. नयति (णीञ् - to take along)
१. नेतव्यम् २. नयनीयम् ३. नीतः ४. नीतवान् ५. i. नयन् - न्ती, ii. नयमानः ६. नेतुम् ७. नीत्वा ८. प्रणीय ९. नयनम्

५६. नश्यति (णश - to be destroyed, toget lost)
१. नशितव्यम् - नंष्टव्यम् २. नशनीयम् ३. नष्टः ४. नष्टवान् ५. नश्यन् - न्ती ६. नशितुम् - नंष्टुम् ७. नशित्वा - नंष्ट्वा - नष्ट्वा ८. प्रणश्य ९. नशनम्

५७. निन्दति (णिदि - to blame)
१. निन्दितव्यम् २. निन्दनीयम् ३. निन्दितः ४. निन्दितवान् ५. निन्दन् - न्ती ६. निन्दितुम् ७. निन्दित्वा ८. विनिन्द्य ९. निन्दनम्

५८. नुदति (णुद - to push, nudge)
१. नोत्तव्यम् २. नोदनीयम् ३. नुत्तः - नुन्नः ४. नुत्तवान् - नुन्नवान् ५. i. नुदन् - न्ती - ती ii. नुदमानः ६. नोत्तुम् ७. नुत्वा ८. प्रणुद्य ९. नोदनम्

५९. नृत्यति (नृती - to dance)
१. नर्तितव्यम् २. नर्तनीयम् ३. नृत्तः ४. नृत्तवान् ५. नृत्यन् - न्ती ६. नर्तितुम् ७. नर्तित्वा ८. परिनृत्य ९. नर्तनम्

६०. पचति (पचष् - to cook)
१. पक्तव्यम् २. पचनीयम् ३. पक्वः ४. पक्ववान् ५. i. पचन् - न्ती, ii. पचमानः ६. पक्तुम् ७. पक्त्वा ८. प्रपच्य ९. पचनम्

६१. पठति (पठ - to read)
१. पठितव्यम् २. पठनीयम् ३. पठितः ४. पठितवान् ५. पठन् - न्ती
६. पठितुम् ७. पठित्वा ८. प्रपठ्य ९. पठनम्

६२. पतति (पत्ऌ - to fall)
१. पतितव्यम् २. पतनीयम् ३. पतितः ४. पतितवान् ५. पतन् - न्ती
६. पतितुम् ७. प्रणिपत्य ८. पतनम्

६३. पश्यति (दृशिर् - to see)
१. द्रष्टव्यम् २. दर्शनीयम् ३. दृष्टः ४. दृष्टवान् ५. पश्यन् - न्ती
६. द्रष्टुम् ७. दृष्ट्वा ८. संदृश्य ९. दर्शनम्

६४. पालयति (पाल - to take care of)
१. पालयितव्यम् २. पालनीयम् ३. पालितः ४. पालितवान् ५. i. पालयन् - न्ती, ii. पालयमानः ६. पालयितुम् ७. पालयित्वा ८. सम्पाल्य ९. पालनम्

६५. पिबति (पा - to drink)
१. पातव्यम् २. पानीयम् ३. पीतः ४. पीतवान् ५. पिबन् - न्ती ६. पातुम्
७. पीत्वा ८. निपीय ९. पानम्

६६. पीडयति (पीड - to torment)
१. पीडयितव्यम् २. पीडनीयम् ३. पीडितः ४. पीडितवान् ५. i. पीडयन् - न्ती, ii. पीडयमानः ६. पीडयितुम् ७. पीडयित्वा ८. निष्पीड्य, निपीड्य
९. पीडनम्

६७. पूजयति (पूज - to worship)
१. पूजयितव्यम् २. पूजनीयम् ३. पूजितः ४. पूजितवान् ५. i. पूजयन् - न्ती, ii. पूजयमानः ६. पूजयितुम् ७. पूजयित्वा ८. सम्पूज्य ९. पूजनम्

६८. पृच्छति (प्रच्छ - to question)
१. प्रष्टव्यम् २. प्रच्छनीयम् ३. प्रष्टुम् ४. पृष्टवान् ५. पृच्छन् - न्ती - ती
६. प्रष्टुम् ७. पृष्ट्वा ८. आपृच्छ्य ९. प्रच्छनम्

६९. पोषयति (पुष - to look after)
१. पोषयितव्यम् २. पोषणीयम् ३. पोषितः ४. पोषितवान् ५. i. पोषयन् - न्ती, ii. पोषयमाणः ६. पोषयितुम् ७. पोषयित्वा ८. सम्पोष्य ९. पोषणम्

७० बध्नाति (बन्ध - to tie)
१. बन्धव्यम् २. बन्धनीयम् ३. बद्धः ४. बद्धवान् ५. बध्नन् - ती

६. बन्धुम् ७. बद्ध्वा ८. अनुबद्ध्य ९. बन्धनम्

७१. **बिभेति** (भी - to fear)

१. भेतव्यम् २. भयनीयम् ३. भीतः ४. भीतवान् ५. बिभ्यत् - ती ६. भेतुम् ७. भीत्वा ८. प्रभीय ९. भयम्*

७२. **बुद्ध्यते** (बुध - to know)

१. बोद्धव्यम् २. बोधनीयम् ३. बुद्धः ४. बुद्धवान् ५. बुद्ध्यमानः ६. बोद्धुम् ७. बुद्ध्वा ८. प्रबुध्य ९. बोधनम्

७३. **ब्रवीति** (ब्रूञ् - to speak)

१. वक्तव्यम् २. वचनीयम् ३. उक्त्वा ४. उक्तवान् ५. i. ब्रुवन् - ती, ii. ब्रुवाणः ६. वक्तुम् ७. उक्त्वा ८. प्रोच्य ९. वचनम्

७४. **भक्षयति** (भक्ष - to eat)

१. भक्षयितव्यम् २. भक्षणीयम् ३. भक्षितः ४. भक्षितवान् ५. i. भक्षयन् - न्ती, ii. भक्षयमाणः ६. भक्षयितुम् ७. भक्षयित्वा ८. सम्भक्ष्य ९. भक्षणम्

७५. **भवति** (भू - to be)

१. भवितव्यम् २. भवनीयम् ३. भूतः ४. भूतवान् ५. भवन् - न्ती ५. भवितुम् ७. भूत्वा ८. सम्भूय ९. भवनम्

७६. **भिनत्ति** (भिदिर् - to break)

१. भेत्तव्यम् २. भेदनीयम् ३. भिन्नः ४. भिन्नवान् ५. i. भिन्दन् - ती ii. भिन्दानः ६. भेत्तुम् ७. भित्त्वा ८. विभिद्य ९. भेदनम्

७७. **भुङ्क्ते** (भुज - to eat)

१. भोक्तव्यम् २. भोजनीयम् ३. भुक्तः ४. भुक्तवान् ५. भुञ्जानः ६. भोक्तुम् ७. भुक्त्वा ८. उपभुज्य ९. भोजनम्

७८. **भ्राम्यति** (भ्रमु - to wander)

१. भ्रमितव्यम् २. भ्रमणीयम् ३. भ्रान्तः ४. भ्रान्तवान् ५. भ्राम्यन् - न्ती, भ्रमन् - न्ती ६. भ्रमितुम् ७. भ्रमित्वा, भ्रान्त्वा ८. विभ्रम्य ९. भ्रमणम्

७९. **मज्जति** (मस्ज् - to take a dip, drown)

१. मङ्क्तव्यम् २. मज्जनीयम् ३. मग्नः ४. मग्नवान् ५. मज्जन् - न्ती - ती ६. मङ्क्तुम् ७. मङ्क्त्वा - मक्त्वा ८. निमज्य ९. मज्जनम्

---

* 'अच्'प्रत्ययान्तं रूपम् एतत् । ल्युडन्तं रूपम् अस्य धातोः नास्ति ।

८०. **मन्यते** (मन - to think, to conceiven idea)
१. मन्तव्यम् २. मननीयम् ३. मतः ४. मतवान् ५. मन्यमानः ६. मन्तुम् ७. मत्वा ८. अनुमत्य ९. मननम्

८१. **मन्थति** (मन्थ - to churn)
१. मन्थितव्यम् २. मन्थनीयम् ३. मथितः ४. मथितवान् ५. मन्थन् - न्ती ६. मन्थितुम् ७. मन्थित्वा - मथित्वा ८. विमथ्य ९. मन्थनम्

८२. **मिलति** (मिल - to meet)
१. मेलितव्यम् २. मेलनीयम् ३. मिलितः ४. मिलितवान् ५. i. मिलन् - - न्ती - ती, ii. मिलमानः ६. मेलितुम् ७. मिलित्वा, मेलित्वा ८. सम्मिल्य ९. मेलनम्

८३. **मृशति** (मृश - to touch)
१. म्रष्टव्यम् - मर्ष्टव्यम् २. मर्शनीयम् ३. मृष्टः ४. मृष्टवान् ५. मृशन् - न्ती - ती ६. म्रष्टुम् - मर्ष्टुम् ७. मृष्ट्वा ८. विमृश्य ९. मर्शनम्

८४. **म्रियते** (मृङ् - to die)
१. मर्तव्यम् २. मरणीयम् ३. मृतः ४. मृतवान् ५. म्रियमाणः ६. मर्तुम् ७. मृत्वा ८. अनुमृत्य ९. मरणम्

८५. **यतते** (यती - to try)
१. यतितव्यम् २. यतनीयम् ३. यत्तः ४. यत्तवान् ५. यतमानः ६. यतितुम् ७. यतित्वा ८. प्रयत्य ९. यतनम्

८६. **याचते** (याचृ - to beg)
१. याचितव्यम् २. याचनीयम् ३. याचितः ४. याचितवान् ५. i. याचन् - न्ती, ii. याचमानः ६. याचितुम् ७. याचित्वा ८. प्रयाच्य ९. याचनम्

८७. **युङ्क्ते** (युजिर् - to unite)
१. योक्तव्यम् २. योजनीयम् ३. युक्तः ४. युक्तवान् ५. i. युञ्जन् - ती, ii. युञ्जानः ६. योक्तुम् ७. युक्त्वा ८. प्रयुज्य ९. योजनम्

८८. **रक्षति** (रक्ष - to protect)
१. रक्षितव्यम् २. रक्षणीयम् ३. रक्षितः ४. रक्षितवान् ५. रक्षन् - न्ती, ६. रक्षितुम् ७. रक्षित्वा ८. संरक्ष्य ९. रक्षणम्

८९. **रचयति** (रच - to arrange, prepare, make ready)
१. रचयितव्यम् २. रचनीयम् ३. रचितः ४. रचितवान् ५. i. रचयन् - न्ती, ii. रचयमानः ६. रचयितुम् ७. रचयित्वा ८. विरचय्य ९. रचनम्

१०. **रभते** (रभ - to start)
१. आरब्धव्यम् २. आरम्भणीयम् ३. आरब्धः ४. आरब्धवान् ५. आरभमाणः ६. आरब्धुम् ७. रब्ध्वा ८. आरभ्य ९. आरम्भणम्

११. **रुणद्धि** (रुधिर् - to obstruct)
१. रोद्धव्यम् २. रोधनीयम् ३. रुद्धः ४. रुद्धवान् ५. i. रुन्धन् - ती, ii. रुन्धानः ६. रोद्धुम् ७. रुध्वा ८. अनुरुध्य ९. रोधनम्

१२. **रोदिति** (रुदिर् - to weep)
१. रोदितव्यम् २. रोदनीयम् ३. रुदितः - रोदितः ४. रुदितवान् ५. रुदन् - ती ६. रोदितुम् ७. रोदित्वा - रुदित्वा ८. प्ररुद्य ९. रोदनम्

१३. **रोहति** (रुह - to climb)
१. रोढव्यम् २. रोहणीयम् ३. रूढः ४. रूढवान् ५. रोहन् - न्ती ६. रोढुम् ७. रूढ्वा ८. आरुह्य ९. रोहणम्

१४. **लभते** (लभष् - to obtain)
१. लब्धव्यम् २. लम्भनीयम् ३. लब्धः ४. लब्धवान् ५. लभमानः ६. लब्धुम् ७. लब्ध्वा ८. उपलभ्य ९. लम्भनम्

१५. **लिखति** (लिख - to write)
१. लेखितव्यम् २. लेखनीयम् ३. लिखितः ४. लिखितवान् ५. लिखन् - ती - न्ती ६. लेखितुम् ७. लिखित्वा - लेखित्वा ८. विलिख्य ९. लेखनम्

१६. **लुण्ठति** (लुठि - to rob, to roll on the ground)
१. लुण्ठितव्यम् २. लुण्ठनीयम् ३. लुण्ठितः ४. लुण्ठितवान् ५. लुण्ठन् - न्ती ६. लुण्ठितुम् ७. लुण्ठित्वा ८. विलुण्ठ्य ९. लुण्ठनम्

१७. **लेढि** (लिह - to lick)
१. लेढव्यम् २. लेहनीयम् ३. लीढः ४. लीढवान् ५. लिहन् - ती ६. लेढुम् ७. लीढ्वा ८. अवलिह्य ९. लेहनम्

१८. **लोकते** (लोकृ - to see, to observe)
१. लोकितव्यम् २. लोकनीयम् ३. लोकितः ४. लोकितवान् ५. लोकमानः ६. लोकितुम् ७. लोकित्वा ८. अवलोक्य ९. लोकनम्

१९. **वदति** (वद - to talk)
१. वदितव्यम् २. वदनीयम् ३. उदितः ४. उदितवान् ५. वदन् - न्ती ६. वदितुम् ७. उदित्वा ८. अनूद्य ९. वदनम्

१००. वन्दते (वदि - to salute)

१. वन्दितव्यम् २. वन्दनीयम् ३. वन्दितः ४. वन्दितवान् ५. वन्दमानः ६. वन्दितुम् ७. वन्दित्वा ८. अभिवन्द्य ९. वन्दनम्

१०१. वर्णयति (वर्ण - to describe)

१. वर्णयितव्यम् २. वर्णनीयम् ३. वर्णितः ४. वर्णितवान् ५. i. वर्णयन् - न्ती, ii. वर्णयमानः ६. वर्णयितुम् ७. वर्णयित्वा ८. उपवर्ण्य ९. वर्णनम्

१०२. वर्तते (वृतु - to be)

१. वर्तितव्यम् २. वर्तनीयम् ३. वृत्तः ४. वृत्तवान् ५. वर्तमानः ६. वर्तितुम् ७. वर्तित्वा - वृत्वा ८. निर्वर्त्य ९. वर्तनम्

१०३. वर्धते (वृध् - to grow, increase)

१. वर्धितव्यम् २. वर्धनीयम् ३. वृद्धः ४. वृद्धवान् ५. वर्धमानः ६. वर्धितुम् ७. वर्धित्वा, वृद्ध्वा ८. विवर्ध्य ९. वर्धनम्

१०४. वर्षति (वृषु - to rain)

१. वर्षितव्यम् २. वर्षणीयम् ३. वृष्टः ४. वृष्टवान् ५. वर्षन् - न्ती ६. वर्षितुम् ७. वर्षित्वा - वृष्ट्वा ८. प्रवृष्य ९. वर्षणम्

१०५. वसति (वस - to live)

१. वस्तव्यम् २. वसनीयम् ३. उषितः ४. उषितवान् ५. वसन् - न्ती ६. वस्तुम् ७. उषित्वा ८. अध्युष्य ९. वसनम्

१०६. वहति (वह - to flow)

१. वोढव्यम् २. वहनीयम् ३. ऊढः ४. ऊढवान् ५. i. वहन् - न्ती, ii. वहमानः ६. वोढुम् ७. ऊढ्वा ८. निरुह्य ९. वहनम्

१०७. विशति (विश - to enter)

१. वेष्टव्यम् २. वेशनीयम् ३. विष्टः ४. विष्टवान् ५. विशन् - न्ती - ती ६. वेष्टुम् ७. विष्ट्वा ८. उपविश्य ९. वेशनम्

१०८. वृणोति (वृञ् - to agree, to marry, to select)

१. वरितव्यम्, वरीतव्यम् २. वरणीयम् ३. वृतः ४. वृतवान् ५. i. वृण्वन् - ती, ii. वृण्वानः ६. वरितुम्, वरीतुम् ७. वृत्वा ८. विवृत्य ९. वरणम्

१०९. शक्नोति (शक्लृ - to be able)

१. शक्तव्यम् २. शकनीयम् ३. शक्तः ४. शक्तवान् ५. शक्नुवन् - ती

६. शक्तुम् ७. शक्त्वा ८. प्रशक्य ९. शकनम्

११०. शङ्कते (शकि - to doubt, suspect)

१. शङ्कितव्यम् २. शङ्कनीयम् ३. शङ्कितः ४. शङ्कितवान् ५. शङ्कमानः ६. शङ्कितुम् ७. शङ्कित्वा ८. आशङ्क्य ९. शङ्कनम्

१११. शंसति (शंसु - to praise)

१. शंसितव्यम् २. शंसनीयम् ३. शस्तः ४. शस्तवान् ५. शंसन् - न्ती ६. शंसितुम् ७. शंसित्वा, शस्त्वा ८. प्रशस्य ९. शंसनम्

११२. शास्ति (शासु - to rule, to govern)

१. शासितव्यम् २. शासनीयम् ३. शिष्टः ४. शिष्टवान् ५. शासत् - शासती ६. शासितुम् ७. शासित्वा - शिष्ट्वा ८. अनुशिष्य ९. शासनम्

११३. शृणोति (श्रु - to hear)

१. श्रोतव्यम् २. श्रवणीयम् ३. श्रुतः ४. श्रुतवान् ५. शृण्वन् - ती ६. श्रोतुम् ७. श्रुत्वा ८. संश्रुत्य ९. श्रवणम्

११४. शेते (शीङ् - to sleep)

१. शयितव्यम् २. शयनीयम् ३. शयितः ४. शयितवान् ५. शयानः ६. शयितुम् ७. शयित्वा ८. संशय्य ९. शयनम्

११५. श्वसिति (श्वस - to breathe)

१. श्वसितव्यम् २. श्वसनीयम् ३. श्वसितः - (आ)श्वस्तः ४. श्वस्तवान् ५. श्वसन् - ती ६. श्वसितुम् ७. श्वसित्वा ८. निःश्वस्य ९. श्वसनम्

११६. सरति (सृ - to proceed, creep, move on)

१. सर्तव्यम् २. सरणीयम् ३. सृतः ४. सृतवान् ५. धावन्, सरन् - न्ती ६. सर्तुम् ७. सृत्वा ८. अनुसृत्य ९. सरणम्

११७. सहते (षह - to bear with, tolerate)

१. सोढव्यम्, सहितव्यम् २. सहनीयम् ३. सोढः ४. सोढवान् ५. सहमानः ६. सोढुम्, सहितुम् ७. सोढ्वा, सहित्वा ८. विषह्य ९. सहनम्

११८. सिञ्चति (षिच - to sprinkle)

१. सेक्तव्यम् २. सेचनीयम् ३. सिक्तः ४. सिक्तवान् ५. सिञ्चन् - न्ती - ती ६. सेक्तुम् ७. सिक्त्वा ८. निषिच्य ९. सेचनम्

११९. सिध्यति (षिधु - to succeed)

१. सेद्धव्यम् २. सेधनीयम् ३. सिद्धः ४. सिद्धवान् ५. सिद्ध्यन् - न्ती

६. सेद्धुम् ७. सिद्ध्वा - सिधित्वा - सेधित्वा ८. निषिध्य ९. सेधनम्

१२०. सूचयति (सूच - to indicate)

१. सूचयितव्यम् २. सूचनीयम् ३. सूचितः ४. सूचितवान् ५. i. सूचयन् - न्ती, ii. सूचयमानः ६. सूचयितुम् ७. सूचयित्वा ८. संसूच्य ९. सूचनम्

१२१. सृजति (सृज - to create)

१. स्रष्टव्यम् २. सर्जनीयम् ३. सृष्टः ४. सृष्टवान् ५. सृजन् - न्ती - ती ६. स्रष्टुम् ७. सृष्ट्वा ८. विसृज्य ९. सर्जनम्

१२२. स्खलति (स्खल - to falter, to trip over)

१. स्खलितव्यम् २. स्खलनीयम् ३. स्खलितः ४. स्खलितवान् ५. स्खलन् - न्ती ६. स्खलितुम् ७. स्खलित्वा ८. प्रस्खल्य ९. स्खलनम्

१२३. स्नाति (ष्णा - to bath)

१. स्नातव्यम् २. स्नानीयम् ३. स्नातः ४. स्नातवान् ५. स्नान् - न्ती - ती ६. स्नातुम् ७. स्नात्वा ८. प्रस्नाय ९. स्नानम्

१२४. स्पर्धते (स्पर्ध - to compete)

१. स्पर्धितव्यम् २. स्पर्धनीयम् ३. स्पर्धितः ४. स्पर्धितवान् ५. स्पर्धमानः ६. स्पर्धितुम् ७. स्पर्धित्वा ८. संस्पर्ध्य ९. स्पर्धनम्

१२५. स्पृशति (स्पृश - to touch)

१. स्प्रष्टव्यम् - स्पर्ष्टव्यम् २. स्पर्शनीयम् ३. स्पृष्टः ४. स्पृष्टवान् ५. स्पृशन् - न्ती - ती ६. स्प्रष्टुम् - स्पर्ष्टुम् ७. स्पृष्ट्वा ८. संस्पृश्य ९. स्पर्शनम्

१२६. स्मरति (स्मृ - to remember)

१. स्मर्तव्यम् २. स्मरणीयम् ३. स्मृतः ४. स्मृतवान् ५. स्मरन् - न्ती ६. स्मर्तुम् ७. स्मृत्वा ८. विस्मृत्य ९. स्मरणम्

१२७. स्रवति (स्रु - to leak)

१. स्रोतव्यम् २. स्रवणीयम् ३. स्रुतः ४. स्रुतवान् ५. स्रवन् - न्ती ६. स्रोतुम् ७. सृत्वा ८. संसृत्य ९. स्रवणम्

१२८. स्वपिति (ष्वप् - to sleep)

१. स्वप्तव्यम् २. स्वपनीयम् ३. सुप्तः ४. सुप्तवान् ५. स्वपन् - ती ६. स्वप्तुम् ७. सुप्त्वा ८. प्रसुप्य ९. स्वपनम्

१२९. स्वादयति (ष्वद - to taste)

१. स्वादितव्यम् २. स्वादनीयम् ३. स्वादितः ४. स्वादितवान् ५. i. स्वादयन् - न्ती ii. स्वादमानः ६. स्वादितुम् ७. स्वादित्वा ८. आस्वाद्य ९. स्वादनम्

१३०. हन्ति (हन - to kill)

१. हन्तव्यम् २. हननीयम् ३. हतः ४. हतवान् ५. घ्नन् - ती ६. हन्तुम् ७. हत्वा ८. निहत्य ९. हननम्

१३१. हरति (हृञ् - to carry away)

१. हर्तव्यम् २. हरणीयम् ३. हृतः ४. हृतवान् ५. i. हरन् - न्ती ii. हरमाणः ६. हर्तुम् ७. हृत्वा ८. संहृत्य ९. हरणम्

१३२. हसति (हसे - to laugh)

१. हसितव्यम् २. हसनीयम् ३. हसितः ४. हसितवान् ५. हसन् - न्ती ६. हसितुम् ७. हसित्वा ८. विहस्य ९. हसनम्

१३३. ह्वयति (ह्वेञ् - to call, to invite)

१. ह्वातव्यम् २. ह्वानीयम् ३. हूतः ४. हूतवान् ५. i. ह्वयन् - न्ती, ii. ह्वयमानः ६. ह्वातुम् ७. हूत्वा ८. आहूय ९. ह्वानम्

शिक्षा - द्वादशः पाठः

।। स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।।

यः स्वीयेषु कार्येषु निरतः भवति सः एव मानवः सिद्धिं प्राप्नोति ।

प्रियबन्धो,

एतावता भवन्तः शिक्षापरीक्षायाः एकादश पाठान् पठितवन्तः । द्वादशे एतस्मिन् पाठे प्रश्नपत्रिका एका, तत्रत्यानां प्रश्नानाम् उत्तराणि च दीयन्ते । अन्ते पुनः अन्या प्रश्नपत्रिका अपि दत्ता अस्ति । एतेषाम् अभ्यासेन भवतां परीक्षायाः पूर्वसन्नाहः उत्तमः भवति इति विश्वसिमः वयम् । आशास्महे च यत् भवन्तः परीक्षायाम् उत्तमान् अङ्कान् लब्ध्वा उत्तीर्णाः भवेयुः इति ।

प्रश्नपत्रिका - 1

समयः - घण्टात्रयम् **अङ्काः - १००**

I. अ. *संस्कृतभाषया* ***पञ्चानां*** *प्रश्नानाम् उत्तरम् एकैकेन वाक्येन लिखत ।* **5**

१. रावणः पूर्वस्मिन् जन्मनि कः आसीत् ?
२. धर्मराजस्य का भीतिः ?
३. कुत्र युद्धावकाशः भवति इति उद्धवः उक्तवान् ?
४. अर्जुनः तपः आचरितुं कुत्र गतवान् ?
५. इन्द्रः किमर्थं मुनिवेषं धृतवान् ?
६. शिवः अर्जुनेन सह योद्धुं कं कं प्रेषितवान् ?

आ. ***एकस्य*** *श्लोकस्य पदविभागम् अन्वयरचनां च कृत्वा तात्पर्यं कन्नडभाषया आङ्ग्लभाषया वा लिखत ।* **6**

१. पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ।।
२. अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तस्सर्व एव हि ।।

इ. *सुभाषित**द्वयस्य** अन्वयार्थं तात्पर्यं च कन्नडभाषया आङ्ग्लभाषया वा लिखत ।* **8**

१. आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ।।
२. प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ।।
३. एते सत्पुरुषाः परार्थघटकाः स्वार्थान् परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ।।

II. अ. *प्रश्न**त्रयस्य** उत्तरं कन्नडभाषया आङ्ग्लभाषया वा लिखत ।* **6**

१. 'नरं वरं दुर्लभमेव मन्ये ।' विवृणुत ।
२. 'तस्य तृतीया गतिर्भवति ।' कस्य ? किमर्थम् ?
३. 'तदपि न मुञ्चत्याशावायुः' । विवृणुत ।
४. 'न नाममात्रेण करोत्यरोगम् ।' किं तत् ?

आ. *ससन्दर्भं कन्नडभाषया आङ्ग्लभाषया वा विवृणुत । (चत्वारि)* **12**

१. नीतिकाराः वदन्ति 'व्याधिः, वर्धमानः शत्रुः च नोपेक्षणीयौ' इति ।
२. केवलम् उत्साहो न कार्यसाधकः ।

३. श्रीकृष्ण एव सर्वोत्तमः पूजार्हः ।
४. शत्रुनाशेन परपीडनं भवति । परपीडनं पापस्य कारणम् ।
५. कटाक्षपातैः अर्जुनस्य वशीकरणं कर्तव्यम् । शापभयं मास्तु ।
६. मुनिश्रेष्ठ ! तवागमनेन अस्माकं जन्म सफलम् ।

इ. *प्रहेलिकाद्वयस्य उत्तरम् अर्थं च कन्नडभाषया आङ्ग्लभाषया वा लिखत ।* **6**

१. राजन् कमलपत्राक्ष तत्ते भवतु चाक्षयम् ।
आसादयति यद्रूपं करेणुः करणैर्विना ।।

२. राज्ञः सम्बोधनं किं स्यात् ? सुग्रीवस्य तु का प्रिया ?
अधनास्तु किमिच्छन्ति ? आर्तैः किं क्रियते वद ।।

३. अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने ।
शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः ।।

III. अ. *अधः दत्तानां कृदन्तानाम् इतरवचनरूपाणि लिखत ।* **4**

१. कुर्वत्याः (पं) ....
२. .... पठन्ति
३. .... गच्छतोः (ष) ....
४. शयानम् ....

आ. *आवरणे लिखितस्य धातोः वर्तमानकृदन्तरूपेण रिक्तस्थानानि पूरयत ।* **6**

१. शिशुः .... पतति । (धाव्)
२. ते पुरुषाः प्रादेशिकभाषां .... अपि स्वमातृभाषया एव वदन्ति । (ज्ञा)
३. .... मयूरं दृष्ट्वा सर्पाः पलायितवन्तः । (नृत्)
४. वसन्ते .... कोकिलैः वनं व्यापृतम् । (कूज्)
५. .... यानानि अहं दृष्टवती । (गम्)
६. उत्तरपत्रिकाः .... अध्यापिकया सह सम्भाषणं मा कुरु । (परि + शील्)

इ. *गणे अनर्हं पदं पृथक्कुरुत ।* 5

१. दीपमूलम्, दीपाग्रम्, दीपमध्यम्, दीपच्छाया ।
२. गङ्गा, यमुना, सरस्वती, कपिला ।
३. रामेश्वरम्, अयोध्या, मथुरा, काशी ।
४. शृङ्गारः, वीरः, करुणः, मधुरः ।
५. हनूमान्, वैनतेयः, अङ्गदः, वृकोदरः ।

IV. अ. *सन्धिं विभज्य सन्धिनाम लिखत । (**षण्णामेव**)* 6

१. बृहच्छत्रम्   २. सम्पादयति   ३. मग्ना अभवन्
४. गच्छन्नस्ति   ५. विद्वाँल्लिखति   ६. गृहं पश्यामि
७. जगद्धिताय   ८. किरातोऽयम्

आ. *सन्धिं कृत्वा विसर्गस्य स्थाने कः आदेशः केन नियमेन प्राप्तः इति लिखत । (**षण्णाम्**)* 6

१. जनः + एषः   २. विनीतः + जनः
३. पुनः + एव   ४. शूराः + महेष्वासाः
५. अर्जुनः + तर्कितवान्   ६. बुद्धिः + योगे
७. बाणः + अयम्   ८. वधूः + आगच्छत्

इ. *रिक्तस्थानेषु आवरणे दत्तानां शब्दानां सत्सप्तमीरूपं लिखत ।* 6

१. .... (शिक्षकः आगच्छन्) छात्राः उदतिष्ठन् ।
२. .... (माता स्मरन्ती) पुत्रः आगच्छत् ।
३. .... (अतिथयः आगताः) उत्सवस्य आरम्भः अभवत् ।
४. .... (सर्वे शयानाः) चोरः गृहं प्रविष्टवान् ।
५. ....धान्यं...... (पितामही स्थापितवती) पक्षिणः समागताः ।
६. मया ...... (पुस्तकं पठ्यमानम्) सम्भाषणं मा कुरु ।

ई. *अधः दत्तानि पदानि उपयुज्य वाक्यानि रचयत । (**पञ्च**)* 5

१. प्रतिगृह्य २. चिन्तयन्ती ३. गणयितुम् ४. पश्यन्तम्
५. जिघ्रता ६. शृण्वत्यः

V. अ. *अधः दत्तेषु* ***एकं*** *विषयम् अधिकृत्य दशभिः वाक्यैः लघुप्रबन्धं लिखत ।* **5**

१. नारदसस्य द्वारकागमनम्

२. बलरामस्य श्रीकृष्णं प्रति स्वाभिप्रायकथनम्

३. युधिष्ठिरं प्रति भीमस्य वचनानि

आ. *एतौ न्यायौ कन्नडभाषया आङ्ग्लभाषया वा विवृणुत ।* **4**

१. अन्धपङ्गुन्यायः २. पिष्टपेषणन्यायः

इ. *कन्नडभाषया आङ्ग्लभाषया वा अनुवदत ।* **5**

१. धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।

२. वृत्तेन हि भवत्यार्यो न धनेन न विद्यया ।

३. तां योगमिति मन्यन्ते स्थिरमिन्द्रियधारणाम् ।

४. वज्रादपि हि धीराणां चित्तरत्नमखण्डितम् ।

५. सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।

ई. *संस्कृतभाषया अनुवदत ।* **5**

1. ಮಹೇಶನು ತಿನ್ನುತ್ತಾ ನಾಟಕವನ್ನು ನೋಡುತ್ತಾನೆ.
   While eating Mahesh watches a play.
2. ವಿದ್ಯಾರ್ಥಿಗಳು ಶಾಲೆಗೆ ಹೋಗುತ್ತಾ ಮಾತನಾಡುತ್ತಾರೆ.
   While going to school students converse.
3. ನಿನ್ನೆ ನನ್ನ ಸೋದರಮಾವನು ಬಂದನು.
   Yesterday my maternal uncle came.
4. ಅಲುಗಾಡುತ್ತಿರುವ ಮರದಿಂದ ಕಪಿಗಳು ಜಿಗಿಯುತ್ತಿವೆ.
   Monkeys jump from the shaking tree.
5. ಕುರುಕ್ಷೇತ್ರದಲ್ಲಿ ಅರ್ಜುನನು ತನ್ನ ಬಂಧುಗಳನ್ನು ನೋಡಿದನು.
   Arjuna saw his kinsmen in Kurukshetra.

शिक्षापरीक्षा
प्रथमप्रश्नपत्रिकायाः उत्तराणि

[अत्र उत्तराणि अतिसङ्क्षिप्ततया दत्तानि । परीक्षायाम् अपेक्षानुसारं तानि विस्तरणीयानि । क्वचित् पाठसंख्या पुटसंख्या च सूचिता । तादृशे प्रसङ्गे उत्तराणि ततः चेतव्यानि ।]

I. अ. १.हिरण्यकशिपुः । २. यागस्य मध्ये विघ्नो भवेदिति । ३. यागे एव । ४. इन्द्रकीलपर्वतं गतवान् । ५. अर्जुनस्य परीक्षां कर्तुम् । ६. प्रमथगणं कार्त्तिकेयं च ।

आ. १.द्वितीयः पाठः P.No . 34 २. पञ्चमः पाठः P.No . 92

इ. १. अष्टमः पाठः - सुभाषितम् -15 २. चतुर्थः पाठः - सुभाषितम् 8 ३. पञ्चमः पाठः - सुभाषितम् - 9

II. अ. १. प्रथमः पाठः P.No . 9 २. द्वितीयः पाठः P.No . 30 ३. दशमः पाठः P.No . 185 ४. तृतीयः पाठः P.No . 50

आ. १. द्वितीयः पाठः P.No . 32 २. तृतीयः पाठः P.No . 52 ३. पञ्चमः पाठः P.No . 90 ४. नवमः पाठः P.No . 132 ५. अष्टमः पाठः P.No . 147 ६. सप्तमः पाठः P.No . 127

इ. १.द्वितीयः पाठः P.No . 29 २. पञ्चमः पाठः P.No . 88 ३.अष्टमः पाठः P.No . 143

III. अ. १. कुर्वतीभ्याम्, कुर्वतीभ्यः २. पठत्, पठती ३. गच्छतः, गच्छताम् ४. शयानौ, शयानान्

आ. १.धावन् २. जानन्तः ३. नृत्यन्तम् ४. कूजद्भिः ५. गच्छन्ति ६. परिशीलयन्त्या

इ. १. दीपच्छाया, २. कपिला, ३. रामेश्वरम् ४. मधुरः, ५. अङ्गदः ।

IV. अ. १.बृहत् + छत्रम् = श्चुत्वम् २. सं + पादयति = परसवर्णः ३.मग्नाः + अभवन् = विसर्गसन्धिः ४. गच्छन् + अस्ति = ङमुडागमः ५. विद्वान् + लिखति = परसवर्णः ६. गृहम् + पश्यामि = अनुस्वारसन्धिः ७. जगत् + हिताय = जश्त्वं, पूर्वसवर्णः च ८. किरातः + अयम् = विसर्गसन्धिः, गुणः, पूर्वरूपम्

आ. १.जन एषः (लोपः - सप्तमः पाठः, नियमः - १)
२.विनीतो जनः (उकारः - षष्ठः पाठः, नि. -१)
३.पुनरेव (रेफः - अष्टमः पाठः - विशेषनियमः)
४.शूरा महेष्वासाः (लोपः - सप्तमः पाठः, नियमः - २)
५.अर्जुनस्तर्कितवान् (सकारः - नवमः पाठः, नियमः - १)
६.बुद्धिर्योगे (रेफः - अष्टमः पाठः, नियमः - १)
७.बाणोऽयम् (उकारः - षष्ठः पाठः, नियमः -१)
८.वधूरागच्छत् (रेफः - अष्टमः पाठः, नियमः - १)

इ. १. शिक्षके आगच्छति २. मातरि स्मरन्त्याम् ३. अतिथिषु आगतेषु ४.सर्वेषु शयानेषु ५. पितामह्यां स्थापितवत्याम् । ६. पुस्तके पठ्यमाने ।

ई. १. उपायनं प्रतिगृह्य गुरुः सन्तुष्टः ।
२. कृष्णं चिन्तयन्ती गोपिका मूर्च्छिता ।
३. मूर्खः सिकताकणान् गणयितुं प्रयतते ।
४. चित्रं पश्यन्तं जनं सः आह्वयत् ।
५. कुसुमस्य सुगन्धं जिघ्रता तेन आनन्दः अनुभूतः ।
६. गानं शृण्वत्यः ताः महिलाः परिसरं विस्मृतवत्यः ।

V. अ. १.प्रथमः पाठः P.No . 11 २. तृतीयः पाठः P.No . 51
३.सप्तमः पाठः P.No . 126

आ. १. तृतीय पाठः P.No . 60 २. पञ्चमः पाठः P.No . 98

इ. १. पञ्चमः पाठः P.No . 82 २. अष्टमः पाठः P.No . 138
३. षष्ठः पाठः P.No . 101 ४. सप्तमः पाठः P.No . 118
५. प्रथमः पाठः P.No . 1

ई. १. महेशः खादन् नाटकं पश्यति ।
२. विद्यार्थिनः शालां गच्छन्तः वार्तालापं कुर्वन्ति ।
३. ह्यः मम मातुलः आगच्छत् (आगतवान्) ।
४. कम्पमानात् वृक्षात् वानराः उत्पतन्ति ।
५. कुरुक्षेत्रे अर्जुनः स्वबन्धून् अपश्यत् ।

प्रश्नपत्रिका - २

समयः - घण्टात्रयम् **अङ्काः - १००**

I. अ. ***एकस्य*** *श्लोकस्य पदविभागम् अन्वयरचनाञ्च कृत्वा तात्पर्यं कन्नडभाषया आङ्ग्लाभाषया वा लिखत ।* ५

१. भवान् भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिर्जयद्रथः ।।

२. ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ।।

आ. *सुभाषित**द्वयस्य** तात्पर्यम् अन्वयार्थं च कन्नडभाषया आङ्ग्लभाषया वा लिखत ।* ८

१. दम्भेन लोभेन भिया ह्रिया वा प्रायो विनीतो जन एष सर्वः ।
वैराग्यतस्त्वाहृदयं विनीतं नरं वरं दुर्लभमेव मन्ये ।।

२. शास्त्राण्यधीत्यापि भवन्ति मूर्खाः
यस्तु क्रियावान् पुरुषः स विद्वान् ।
सुचिन्तितं चौषधमातुराणां
न नाममात्रेण करोत्यरोगम् ।।

३. सत्यं तपो ज्ञानमहिंसतां च विद्वत्प्रणामं च सुशीलतां च ।
एतानि यो धारयते स विद्वान् न तत्र शास्त्राध्ययनं हि कारणम् ।।

इ. ***द्वयोः*** *अभिप्रायं कन्नडभाषया आङ्ग्लभाषया वा लिखत ।* ३

१. मनो हि हेतुः सर्वेषाम् इन्द्रियाणां प्रवर्तने ।

२. अप्रकटीकृतशक्तिः शक्तोऽपि जनस्तिरस्क्रियां लभते ।

३. अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः ।।

II. अ. *प्रश्न**त्रयस्य** उत्तरं कन्नडभाषया आङ्ग्लभाषया वा लिखत ।* ६

१. नाधः शिखा यान्ति कदाचिदेव - कस्य शिखाः ? किमर्थम् ?

२. एतत्त्रयं जगति पुण्यकृतो लभ्यते । किं तत् त्रयम् ?

३. तस्याः पारगताः योगीश्वराः नन्दन्ति । का सा ? कीदृश्याः ?

४. विरलः सरलो जनः । कीदृशः विरलः ?

५. न तत्र शास्त्राध्ययनं हि कारणम् । विद्वत्तायाः कारणं किम् ?

आ. *ससन्दर्भं* ***चत्वारि*** *वाक्यानि कन्नडभाषया आङ्ग्लभाषया वा विवृणुत ।* **१२**

१. सः नीतिपूर्वकं राज्यशासनं करोति ।

२. शिशुपालस्य शतम् अपराधान् मृष्यामि ।

३. सः युद्धसन्नाहं करोति । त्वं तं शरणं गच्छ ।

